सुरोत्तमं चित्रविभूषणोज्वलम् ॥

आदित्यम् ।

आदित्यस्य नमस्कारं ये कुर्वन्ति दिवाकरम् ।
तेषां जन्मसहस्राणां दारिद्र्यं नोपजायते ॥

Colophon :

इति श्रीमन्महाभारते अरण्यपर्वणि कृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं समाप्तम ॥

33

Sl. No. 20596 आदित्यहृदयम् (महाभारतीयम्) Ms. No. P. 6188/1

Beginning

अर्जुन उवाच—

विज्ञानं धर्मशास्त्राणां गुह्याद्गुह्यतरं परम् ।
मम कृष्ण परिज्ञानं वाङ्मयं सचराचरम् ॥ १ ॥
+ + + + +

अस्य श्रीआदित्यहृदयमन्त्रस्य– श्रीकृष्ण ऋषिः । श्रीसूर्यनारायणो देवता ॥

End:

पद्ममायोपवेदाय नमोस्तु × × × त्मने ।
पद्मासनः पद्मकरः पद्मगर्भसम × × ॥

× × रथसंयुक्तो द्विभुज × × × ।
× × × नमस्कारं दिने दिने ॥
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥

Colophon :

इति श्रीमहाभारते ·:· + ·:· + संवादे आदित्यहृदयं समाप्तम् ॥ १५० ॥

34

Sl. No. 20598 आदित्यहृदयम् **Ms. No. P. 6621**

Beginning :

अस्य श्रीओंनमो भगवते आदित्यहृदयस्तोत्रमहामन्त्रस्य– अगस्त्यो भगवान् ऋषिः ; अनुष्टुप् छन्दः; सूर्यनारायणो देवता ·:· ·:· + प्रभाकराय कवचाय हुम् । सूर्यनारायण-नेत्रत्रयाय वौषट् । मार्ताण्डाय अस्त्राय फट् । भूर्भुवस्सुवरोम्– इति दिग्बन्धः ॥

End :

सूर्यं सुन्दरलोकनाथममृतं वेदान्तसारं शिवं
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचिन्त्यं स्वयम् ।
इन्द्रादैत्य (?) नराधिपं सुरगुरुं त्रैलोक्यचूडामणिं
ब्रह्मा (?) विष्णुस्वरूपहृदयं वन्दे सदा भास्करम् ॥

Colophon :

– – – –

35

Sl. No. 20607 अदित्यहृदयम् **Ms. No. P. 8368**

Beginning :

शौनक उवाच—

इममर्थं मया पृष्टं शङ्खचक्रगदाधरम् ।
प्रणम्य शिरसा × अर्जुनेन महात्मना ॥
धर्मक्षेत्रे महारा × × सुवृत्ता सारथे रणे ।

क्षीरोदवासमादित्यमादित्यं लोकपूजितम् ।।
कृताञ्जलिपुटो भूत्वा प्रार्थयित्वाब्रवीदिदम् ।।

End :

आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ।।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष दिवाकर ।।

Colophon:

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं सम्पूर्णम् ।।

36

Sl. No. 20613 आदित्यहृदयम् Ms. No. P. 10053/48

(सूर्यहृदयस्तोत्रम्—कूर्मपुराणान्तर्गतम्)

Beginning :

अथोपतिष्ठेदादित्यमुदयन्तं (?) समाहितः ।
सौरैश्च विविधैर्मन्त्रैः ऋग्यजुस्सामसम्भवैः ।।

सर्वोत्कृष्टाय सूर्याय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते विष्णुरूपिणे ।।

\+ + + + +

End :

यस्तुनित्यं पठेद्विद्वान् संप्रेक्षन् सूर्यमण्डलम् ।
महापातकयुक्तोऽपि पूयते नात्र संशयः ।।

क्षयापस्मारकुष्ठाद्यैर्व्याधिभिः पीडितोभृशम् ।
जप्त्वाशतगुणं स्तोत्रमुल्लाघो भवति ध्रुवम् ।।

भूतग्रहपिशाचादि राजव्यसनकारिभिः ।
स्तुवन् ध्यात्वा रविं विप्रो मुच्यते नात्र संशयः ॥

Clophon:

इति कूर्मपुराणे व्यासप्रोक्त सूर्यहृदयस्तोत्रं समाप्तम् ।

37

Sl. No. 20626 आदित्यहृदयम् Ms. No C. 401

(भविष्योत्तरपुराणीयम्)

Beginning :

कथमादित्यमुद्यन्तमुपतिष्ठेत् द्विजोत्तमः ।
एतन्मे ब्रूहि विप्रेन्द्र प्रपद्ये शरणं तव ॥

सुमन्त उवाच–

इममर्थं पुरा दृष्ट्वा शङ्खचक्रगदाधरः ।
प्रणम्य शिरसा देवमर्जुनेन महात्मन ॥

+ + + + +

अस्य श्री आदित्यहृदयस्तोत्रमन्त्रस्य कृष्णः ऋषिः सूर्यनारायणो देवता अनुष्टुप् छन्दः ।
+ + आदित्यममन्त्रसंयुक्तं आदित्यं परमेश्वरम् ।
प्रणमामि × × सदा ॥

End :

उदयगिरिमुपेतं भास्करं पद्मसंस्थं
सकलभुवननेत्रं रत्नरत्नोपधेयम् ।
तिमिरकरिमृगेन्द्रं मंदकं पद्मिनीनां
सुरवरमभिवन्दे सुन्दरं विश्ववरम् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं समाप्तम् ॥

38

Sl. No. 20654 आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रम् Ms. No. B. 281/1
(अथर्वणरहस्यान्तर्गतम्)

Beginning :

आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रमहामन्त्रस्य– भार्गव ऋषिः + + +

हस्तद्वयेन कमले धारयन्ती स्वलीलया ।
हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तये ॥

+ + + + +

वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्वलाङ्गीम् ।
बीजापूरं कनककलशं हेमपद्मं दधानां
आद्यां शक्तिं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥

End:

ध्यायामि त्वां प्रहसितमुखीं कोटिबालर्कवर्णा
विद्युद्वर्णम्बरवरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं
भर्त्रा युक्तां मुहुरभयदां मह्यमप्यच्युतश्रीः ॥

olophon :
इत्यथर्वणरहस्ये उत्तरभागे श्रीलक्ष्मीहृदयस्तोत्रं समाप्तम् ॥

39

Sl. No. 20661 आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रव्याख्या Ms. No. B. 1029/B
(लक्ष्मीहृदयस्तोत्रव्याख्या समूला)

Beginning :

वन्दे रमापतिं ज्ञानानन्दादिगुणवारिधिम् ।
निर्दोषं ब्रह्मरुद्रादिबन्दितं सिद्धयेऽनघम् ॥

+ + + + +

श्रीमध्वशास्त्रपारीणान् विदुषः सद्गुणैषितान् ।
प्रणम्य लक्ष्मीहृदयं व्याकरिष्ये यथामति ।।

श्रीमत्कमलकरकमलार्चितपादयुगळस्य श्रीनारायणस्य परमप्रसादः ·|· भवतीति तदर्थं + श्रीदेव्याः प्रसादोऽपेक्षित इति मनसि कृत्वा भार्गवेन मुनिना ·|· महालक्ष्मीं पुरस्कृत्य तदन्तर्गतं तन्नामवाच्यं भगवन्तं + देवीं चारयितुं (?) + ·|· + रमारमेश्वरयोः स्तवनं विधीयते— ।। वन्दे लक्ष्मीमित्यादिना ।।

End :

अच्युतश्रीरिति। ·|· स्वभक्तानामस्माकं सर्वेष्टसिद्धिं सम्पाद्य सर्वानिष्टनिवृत्तिं विदध्याता-मित्यशेषमतिमङ्गलम् ।। + + ·|·

श्रीवेङ्कटेशरचिता व्याख्या श्रीहृदयस्य तत् ।
भूयात्सदुपकारार्था सततं श्रीशतोषणात् ।।

अनया व्याख्यया यत्स्यात्पुण्यमेतद्गुरोर्भवेत् ।
तदनुग्रहलेशोऽस्तु सततं शुभमस्तु ते ।।

Colophon :

इति श्रीनारायणसुतवेङ्कटेशविरचितलक्ष्मीहृदयव्याख्या समाप्ता ।।

40

Sl. No. 20663 — आपदुध्दारकस्तोत्रम् — Ms. No. P. 7533/6

श्रीविष्णुआपदुद्धरणमहामन्त्रस्तोत्रम्

Beginning:

अस्य श्रीआपदुद्धरणस्तोत्रमहामन्त्रस्य— ब्रह्मा ऋषिः ; अनुष्टुप् छन्दः ; श्रीरामचन्द्र-प्रसादसिध्यर्थे जपे विनियोगः ।

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।।

End

सदैवं पठति श्रीमान् आपदुद्धरणं मनुः ।
देवताऽनुग्रहैर्हैः गौरि मुच्यते सर्वसम्पदः ॥
संसारबन्धनान्मुक्तिः सर्वथा सर्वथाभवेत् ।
इह भुक्त्वाऽखिलान् भोगान् अन्ते विष्णोः परं पदम् ॥

Colophon :

इति श्रीविष्णु-आपदुद्धरणमहामन्त्रस्तोत्रं सम्पूर्णम् ॥

41

Sl. No. 20666 आपन्निवारणस्तोत्रम् Ms. No. C. 550

(रामायणाद्यन्तकथारूपम्- गायत्रीरामायणम्- हनुमत्कृतम्)

Beginning :

करण्यन्वयजाताय तारकब्रह्ममूर्तये ।
नमः श्रीकौसल्येयाय रामायापन्निवारिणे ॥१॥

सरसीरुहनेत्राय सर्वेष्टार्थप्रदायिने ।
नमः सत्रैकरक्षित्रे रामायापन्निवारिणे ॥२॥

End :

स्त्रोत्रेणानेन सन्तुष्टो रामः सत्यपराक्रमः ।
आपन्निवारणं कृत्वा सर्वान् कामान् प्रयच्छति ॥

Colophon :

इति श्रीआञ्जनेयकृतं रामायणाद्यन्तकथापरिमण्डितं गायत्रीरामायणं सम्पूर्णम् ॥

42

Sl. No. 20667 आवरणकवचम् (रेणुकतन्त्रीयम्) Ms. No. P. 2477/11

Beginning :

पार्वत्युवाच —

भगवन् सर्वलोकेश सर्वलोकहिते रत ।
गुह्याद्गुह्यतमं [illegible] श्रोतुमिच्छामि [illegible] ॥

शिवः –

गुह्याद्गुह्यतमं गौरि गोपनीयं प्रयत्नतः ।
अवाच्यमपि वक्ष्यामि सर्वलोकहिताय ते ॥

End :

मु × धिकवश्याय यस्तस्यापि सुखस्थितः ।
त्रिसहस्रेण राजानं परायन्त्येव नान्यथा ॥

× × शुक्रपानपात्रमात्वलं(?)योनिरेव च ।
एताश्च रघुमातंग्याः पञ्चमुद्राः प्रकीर्तिताः ॥
ग्र- ॥

Colophon:

इति रेणुकतन्त्रे आवरणकवचं सम्पूर्णम् ॥

43

Sl. No. 20669 इन्द्रस्तुतिः Ms. No. B. 280/3

Beginning :

इन्द्रः–

एकं ब्रह्माद्वितीयं च परिपूर्णं परात्परम् ।
इति यो गीयते वेदैस्तं वन्दे सोमसुन्दरम् ॥१॥

ज्ञातृज्ञानज्ञेयरूपं विश्वं व्याप्य व्यवस्थितम् ।
स्वयं सर्वैरदृश्योस्तं वन्दे सो सुन्दरम् ॥२॥

End :

अणोरणुस्त्वं महसे महोस्त्वं
सर्वात्मभावात्परिपूर्ण एकः ।
त्वमेव शम्भो महिमा त्वदीया
वेत्तु कृती कस्त्वमिह क्षमस्व ॥१३॥

Colophon :

इतीन्द्रस्तुतिः समाप्ता ॥

44

Sl. No. 20670 इन्द्रस्तोत्रम् Ms. No. B. 281/5

(ललितोपाख्यानान्तर्गत- ब्रह्माण्डोत्तरपुराणीयहयग्रीवागस्त्यसंवादात्मकम्)

Beginning:

जयदेवि जगन्मातर्जयदेवि परात्परे ।
जय कल्याणनिलये जय कामकलात्मिके ॥
जय शङ्करि कामाक्षि जय कामाक्षिकाभिधे ।
जयाखिलसुराराध्ये जय कामेशि कामदे ॥

End :

एवं लब्धवरान् देवानेवेन्द्रोऽपि महाबलः ।
आमोदं परमं जग्मुः तां विलोक्य मुहुर्मुहुः ॥

Colophon :

इति ब्रह्माण्डोत्तरपुराणे हयग्रीवागस्त्यसंवादे ललितोपाख्यानं नाम × × ॥

45

Sl. No. 20671 इन्द्राक्षीकवचस्तोत्रम् Ms. No. P. 8687/9

(पुरन्दरकल्पान्तर्गतः)

Beginning:

इन्द्राक्षीकवचस्तोत्रमन्त्रस्य- पुरन्दरऋषिः ; अनुष्टुप् छन्दः ; श्री इन्द्राक्षी देवता + + + इन्द्राक्षीप्रीत्यर्थे जपे विनियोगः ॥

End :

एकाहिकं द्व्याहिकं च त्र्याहिकं च चतुर्थकम् ।
त्रिसन्ध्यापठनादेव मुच्यते नात्र संशयः ॥

Colophon :

इति श्रीपुरन्दरकल्पे इन्द्राक्षीकवचं समाप्तम् ॥

46

Sl. No. 20672 इन्द्राक्षीकवचस्तोत्रम् **Ms. No. C. 583**

Beginning:

अस्य श्रीइन्द्राक्षीकवचस्तोत्रमहामन्त्रस्य— शचीपुरन्दर ऋषिः । अनुष्टुप् छन्दः। इन्द्राक्षी देवता । लक्ष्मीः बीजम् । भुवनेश्वरी शक्तिः । भवानीति कीलकम् । इन्द्राक्षी-प्रीत्यर्थे इन्द्राक्षीप्रसादसिध्यर्थे जपे विनियोगः—

\+ \+ \+ \+ \+

इन्द्राक्षी परिचिन्तयामि मनसा प्रत्यक्षसिद्धिप्रदाम् ।

End:

सर्वाङ्गसिद्धिं वाराही प्राणान्नारायणी मम ।
पठेत्तत्कवचं नित्यं धारयेत्प्रयतो नरः ॥
कालमृत्यूं जयत्याशु किमुताद्यपमृत्युना ॥

Colophon :

इति इन्द्राक्षीकवचम् ॥

47

Sl. No. 20673 इन्द्राक्षीज्वरहरस्तोत्रम् **Ms. No. P. 5590/1**

Beginning :

ओम् अस्य श्रीइन्द्राक्षीस्तोत्रमहामन्त्रस्य शशिपुरन्दरो भगवानृषिः । अनुष्टुप् छन्दः; इन्द्राक्षी देवता । + + + +

इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता ।
देवी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता ॥

End:

तं नो ज्वरः प्रचोदयात् ॥

Colophon :

ज्वरहरस्तोत्रं सम्पूर्णम् । इन्द्राक्षीस्तोत्रं सम्पूर्णम् ।

48

Sl. No. 20674 इन्द्राक्षीस्तोत्रम् (व्यासस्तुतिः) Ms No. P. 5056/35

Beginning :

अस्य श्रीइन्द्राक्षीस्तोत्रमहामन्त्रस्य- शचीपुरन्दर ऋषिः + + भूर्भुवस्सुवरोमिति दिग्बन्धः ।

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन करग्रहाम् ॥

End :

इन्द्र उवाच-

इन्द्राक्षी नाम सा देवी दैवतैस्समुदाहृता ।
देवी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता ॥

Colophon :

- - - -

49

Sl. No. 20677 इन्द्राक्षीस्तोत्रम् (ऐन्द्रम्) Ms. No. P 5930/139

Beginning :

अस्य श्रीइन्द्रक्षीस्तोत्रमन्त्रस्य- शचीपुरन्दर ऋषिः ; + + + ध्यानम्—

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

End :

इन्द्रस्तोत्रमिदं पुण्यं जपेदायुष्यवर्धनम् ।
विनाशाय च रोगाणां अपमृत्युहराय च ॥

Colophon :

- - - -

50

Sl. No. 20679 इन्द्राक्षीस्तोत्रम् Ms. No. P. 5972/3

Beginning :

अस्य श्रीइन्द्राक्षीस्तोत्रमहामन्त्रस्य— शचीपुरन्दर ऋषिः । ✣ इन्द्राक्षी देवता ✣ ✣ + ध्यानम्—

किंशुकदलविशाललोचनीं
किञ्च नागसरवल्लवाइनीम् (?) ।
अङ्कचम्पकसमानवर्णिनीं
शङ्करप्रियसखीं नमाम्यहम् ॥

End :

इन्द्रस्तोत्रमिदं पुण्यं जपेदायुष्यवर्धनम् ।
विनाशाय च रोगाणां अपमृत्युहराय च ॥

Colophon :

इति इन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥

51

Sl No. 20680 इ द्राक्षीस्तोत्रम् Ms. No. P. 6961/1

Beginning :

अस्य श्री इन्द्र क्षीस्तोत्रमहामन्त्रस्य— शचीपुरन्दर ऋषिः ; अनुष्टुप् छन्दः ; इन्द्राक्षि देवता ; महालक्ष्मीति बीजम् ; भुवनेश्वरीति शक्तिः ॥

End:

या देवी शिवकेशवादिजननी या वै जगन्मोहिनी
या ब्रह्मादिपिपीलिकान्तजगदाधारैकसन्धायिनी ।
या पञ्चप्रणवद्विरेफनयनी या चित्कलामालिनी
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥

Colophon :

52

Sl No. 20682 इन्द्राक्षीस्तोत्रम् (मान्त्रिकम्) Ms. No P. 7458/4

Beginning :

ओं अस्य श्रीइन्द्राक्षीस्तोत्रमहामन्त्रस्य– शचीपुरन्दर ऋषिः ; ई शक्तिर्देवता ; अनुष्टुप् छन्दः ; लक्ष्मीः बीजम् ; भुवनेश्वरी शक्तिः ; माहेश्वरीति कीलकं ; मम इन्द्राक्षी प्रसादसिध्यर्थे जपे विनियोगः ॥

End :

उच्चाटने च विद्वेषे तथाधिदिकृतौ (?) वषट् ।
विघ्नग्रहविनाशे च हुंफट्कारं प्रयोजयेत् ॥
मन्त्राद्दीपनकार्ये च लाभालाभे वषट् स्मृतः ।
त्तत्तत्कर्मानुरूपेण तत्तन्मन्त्रं प्रयोजयेत् ॥

Colophon :

– – – –

53

Sl. No. 20683 इन्द्राक्षीस्तोत्रम् (मान्त्रिकम्) Ms. No. P. 7677

Beginning:

अथातः संप्रवक्ष्यामि इन्द्राक्ष्याश्च विधिं क्रमा. ।
सांगोपांगवि × × नेन शृणुष्व परमेश्वरि ॥
मूलमन्त्रं चांगमन्त्रं मूलमन्त्रं विशेषतः ।
तद्रहस्यं च विधिवच्छृणु × × महामनुम् ॥

End :

ज्वरं मृत्युं घोरं ज्वरे ते ज्वरनाशनम् ।
आयुरारोग्यमैश्वर्यं ज्ञानं वित्तं यशो बलम् ॥
शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्तयन्सहस्रं तु लभते वाञ्छितं फलम् ॥

Colophon :

54

Sl. No. 20684 इन्द्राक्षीस्तोत्रम् (ब्रह्मतान्त्रिकान्तर्गतम्) Ms. No. P. 8626

Beginning :

इन्द्राक्षी द्विभुजां देवी पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥
इन्द्राक्षीं सह युवतीं नानालङ्कारभूषिताम् ।
प्रसन्नवदनाम्भोजां अप्सरोगणसेविताम् ॥

End :

द्विजैस्त्रिभिश्चतुर्भिर्वा पञ्चभिर्वापि चाष्टभिः ।
पूजनीया प्रयत्नेन त्र्यहं वा पञ्चवासरम् ॥
ताम्बूलदक्षिणायुक्तं फलं देयं गुडोदकम् ।
एवं क्रमेण कुर्वीत सिद्धिर्भवति सर्वदा ॥

Colophon :

इति ब्रह्मतान्त्रिके इन्द्राक्षीस्तोत्रविधियोगो नाम त्रयोदशोऽध्यायः ॥

55

Sl. No. 20700 इन्द्राक्षीस्तोत्रम् (देवीभागवतीयम्) Ms. No. B. 326/39

Beginning :

इन्द्राक्ष्या स्तोत्रमाख्याहि नारायण गुणार्णव ।
परं कौतूहलं मेऽद्य पार्वत्यै शिवभाषितम् ॥

नारायण उवाच—

इन्द्राक्षीस्तोत्रमन्त्रस्य माहात्म्यं केन वोच्यते ।
इन्द्रेणादौ कृतं स्तोत्रं सर्वापद्विनिवारणम् ।

End :

नारायण उवाच--

इन्द्राक्षीकल्पमखिलं प्रोक्तं नारद सुव्रत ।
कियत्त्रिपुण्ड्रमाहात्म्यं किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीदेवीभागवते महापुराणे एकादशस्कन्धे नारदनारायणसंवादे इन्द्राक्षीस्तोत्र-निरूपणं नाम त्रयोविंशोऽध्यायः ॥

56

Sl. No. 20703 इन्द्राक्षीस्तोत्रम् (नारायणप्रोक्तम्) Ms. No. C. 694/59

Beginning:

नारद उवाच--

इन्द्राक्ष्याः स्तोत्रमाख्याहि नारायणगुणार्णव ।
परं कौतूहलं मेऽद्य पार्वत्यै शिवभाषितम् ॥

नारायण उवाच--

इन्द्राक्षीस्तोत्रमन्त्रस्य माहात्म्यं केन वोच्यते ।
इन्द्रेणादौ कृतं स्तोत्रं सर्वापद्विनिवारणम् ॥

End:

अनुष्टुबादिकरन्यासः स्वभिः षभिश्च नामभिः ।
इन्द्राक्षी च महालक्ष्मीस्तथा माहेश्वरीति च ।।

कात्यायन्यम्बुजाक्षी च कौमारीति प्रकीर्तिताः ।
न्यासश्च हृदया × × × × ॥

Colophon :

57

Sl. No. 20705 इन्द्राक्षीस्तोत्रम् Ms. No. C. 4252

(इन्द्रबृहस्पतीसंवादरूपम्)

Beginning :

अस्य श्रीइन्द्राक्षीस्तोत्रमन्त्रस्य– पुरन्दर ऋषिः ; अनुष्टुप् छन्दः ; श्रीइन्द्राक्षी देवता ओं लक्ष्मीरिति बीजम् । भुवनेश्वरीति शक्तिः ; तवातीति कीलकम् ; मम सर्वाभीष्टफल-सिध्यर्थे जपे विनियोगः ॥

End:

शतमावर्तयेद्यस्तु मुच्यते व्याधि × धनात् ।
आवर्तेशा (?) सहस्रेण लभते वांच्छितं फलम् ॥
राजानो वशमा×न्ति षण्मासान्नात्र संशयः ।
नानासिद्धिकरा देवी सर्वपापं व्यपोहति ॥

Colophon :

इति श्रीइन्द्रबृहस्पतिसंवादे इन्द्राक्षीस्तोत्रं सम्पूर्णम् ।

58

Sl No. 20708 ईश्वरस्तोत्रम् Ms. No. P. 4999/3

(मार्कण्डेयीयम्)

Beginning :

× × × कमलवर्णं पूर्णलक्ष्मीप्रदात्रं (?)
गजमुखमरुणाक्षं × × × × ।
× × × × ×
× × गणपति × × × मं नौमि सर्वेपसिध्यै ॥

पञ्चाङ्गं पञ्चवक्त्रं स्फुटविकटजटाबद्धजूटेशशाङ्कं
× × × ×
× × × × ।
क्रीडान्तो × ... नमामि ॥

End :

वभ्रुभूश्मश्रुकेशं शशिशिखरहिमगिरिरंगिनदावाग्निमाला-
शंखश्याभरणव[र्]त्र × × × भिवरविभिश्छिद्रित कालमेघम् ।
दंष्ट्राचन्द्रप्रभाभिः प्रकटितपगह्वां तालुपालुमूलं (?)
घोराभं घोरवक्त्रं त्रिदशभयहरं हेतिकं दक्षिणस्या(?) ॥

Colophon :

– – – – – –

59

Sl. No. 20709 ईश्वरस्तोत्रम् (मार्कण्डेयीयम्) Ms. No. C. 3424/6

Beginning :

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
कालकण्ठं कलामूर्तिं कालाग्निं कालनाशनम् ॥

End :

मार्कण्डेयमिदं स्तोत्रं यः पठेच्छिवसन्निधौ ।
कालमृत्युभयं नास्ति अपमृत्युभयं कुतः ॥ २२ ॥
मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
अमृतेशाय श × य महादेवाय ते नमः ॥ २२ ॥

Colophon :

इति मार्कण्डेयस्तोत्रम् ॥

60

Sl. No. 20710 ईश्वरस्तोत्रम् (लिङ्गपुराणान्तर्गतम्) Ms. No. C. 4340

Beginning :

सूत उवाच—

ब्रह्माणमग्रतः कृत्वा ततः स गरुडध्वजः ।
अतीतैश्च भविष्यैश्च वर्तमानैस्तथैव च ॥

नामभिश्चाष्टादशैश्चैव इदं स्तोत्रमुदीरयत् ।
विष्णो रुद्र नमस्तुभ्यं सुव्रतानततेजसे ॥

End :

पापाचारोऽपि यो मर्त्यः शृणुयाच्छिवसन्निधौ ।
जपेद्वासौ विनिर्मुक्तो ब्रह्मलोकं प्रपद्यते ॥
श्राद्धे वा दैविके कार्ये यज्ञान्तेऽवभृथान्तिके ।
कीर्तयेद्यः सतां मध्ये तदानन्त्याय कल्पते ॥

Colophon:

इति श्रीलिङ्गपुराणे ब्रह्मविष्णुभ्यां कृते ईश्वरस्तवः समाप्तः ॥

61

Sl. No. 20712 ऋणविमोचनस्तोत्रम् (स्कान्दीयम्) **Ms. No. P. 5788/18**

Beginning :

नमामि देवदेवेशं वक्रतुण्डं महाबलम् ।
षडक्षरं महाशिवं नमामि ऋणमुक्तये ॥
महागणपतिं देवं महासत्त्वं महाबलम् ।
महाविघ्नहरं चैव नमामि ऋणमुक्तये ॥

End :

सर्वाम्बरं सर्ववर्णं सर्वगन्धानु लेपनम् ।
सर्वयज्ञोपवीतञ्च नमामि ऋणमुक्तये ॥
एतद्दणहरणस्तोत्रं त्रिसन्ध्यां यः पठेन्नरः ।
षण्मासाभ्यान्तरेणैव ऋणभेदो भविष्यति ॥

Colophon :

इति श्रीस्कान्दपुराणे ऋणविमुक्तंस्तोत्रं (?)सम्पूर्णम् ॥

62

Sl. No. 20713 ऋणविमोचनस्तोत्रम् Ms. No. P 7550/17

(नृसिंहपुराणीयम् - नृसिंहस्तोत्रम् – अगस्त्यनारदसंवादात्मकम्)

Beginning:

देवताकार्यसिध्यर्थं सभास्तम्भात्समुत्थितम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥
लक्ष्म्यालिंगितवामांगं भक्तानां वरदायकम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ।

End :

वेदेवेदान्तयज्ञेशं ब्रह्मरुद्रादिसंस्थितम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥
यदिदं पठते नित्यं ऋणविमोचनसंस्थितम् ।
अनृणी जायते सद्यः धनं शीघ्रमवाप्नुयात् ॥

Colophon:

इति श्रीनृसिंहपुराणे अगस्त्यनारदसंवादे ऋणविमोचनस्तोत्रं सम्पूर्णम् ॥

63

Sl. No. 20714 ऋणविमोचनस्तोत्रम् Ms. No. P. 7637/3

(गणपतिस्तोत्रम् - शुक्राचार्यकृतम्)

Beginning :

शुक्राचार्य उवाच -

अस्य श्रीऋणविमोचनमहागणपतिस्तोत्रमहामन्त्रस्य- शुक्राचार्य ऋषिः ; अनुष्टुप् छन्दः; ऋणविमोचनमहागणपतिर्देवता ; गां बीजम् ; गीं शक्तिः ; गुं कीलकम् ॥

End :

अष्टौ गणपतिस्तोत्रमिदं चैव ऋणापहम् ।
अनेन स्तौमि विघ्नेशं नमा × × × ॥

एतद् ऋणापहं स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः ।
षण्मासाभ्यन्तरेणैव ऋणच्छेदो भवेद्ध्रुवम् ॥

Colophon:

इति श्रीशुक्राचार्यकृतं ऋणविमोचनगणपतिस्तोत्रं सम्पूर्णम् ॥

64

Sl.No. 20717 ऋणविमोचनस्तोत्रम् Ms. No. C. 4618/4

(नृसिंहस्तोत्रम्– नृसिंहपुराणीयम्)

Beginning :

देवताकार्यसिध्यर्थं सभास्तम्भसमुद्भवम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमोचनम् ॥

लक्ष्यालिंगितवामांगं भक्तानां वरदायकम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमोचनम् ॥

End :

वेदवेदान्तयज्ञेशं ब्रह्मरुद्रादिसंयुतम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमोचनम् ॥

य इदं पठते नित्यमृणमोचनसंज्ञितम् ।
अनृणी जायते सद्यो × धनं शीघ्रमवाप्नुयात् ॥

Colophon :

इति श्रीनृसिंहपुराणे ऋणविमोचनस्तोत्रं समाप्तम् ॥

65

Sl. No. 20720 कपीन्द्रद्वादशनामस्तोत्रम् Ms. No. P. 5176/21

Beginning;

मनोजवं मारुतसाम्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥

End :

उदधिक्रमणश्चैव सीताशोकविनाशनम् ।
× × प्राणदाता च दशग्रीवस्य दर्पहा ॥
एतानि द्वादशनामानि कपीन्द्रस्य महात्मनः ।
स्वा × × ते नित्यं यात्राकाले वि × × × ॥
× × मृत्युभयं नास्ति सर्वत्र विजयी भवेत् ॥

Colophon :

-- -- --

66

Sl. No. 20723 कार्तवीर्यार्जुनकवचम् Ms. No P. 792/4
(सुदर्शसंहितीयम्– कार्तवीर्योपदेशात्मकम्)

Beginning :

श्रीपार्वत्युवाच—

कैलासशिखरे रम्ये देवदेवं सनातनम् ।
सच्चिदानन्दमद्वैतं उमा प्रोवाच शङ्करम् ॥
देवदेव जगन्नाथ सर्वज्ञ करुणानिधे ।
कवचं कार्तवीर्यस्य वक्तव्यं सर्वरक्षक ॥

End :

एतन्मन्त्रं लिखित्वा तु तत्तत्स्थने निवेशयेत् ।
नष्टप्राप्तिर्भवेत्सत्यं कार्तवीर्यप्रभावतः ।।

Clophon:

इति सुदर्शनसंहितायां उपदेशं (?) कार्तवीर्यार्जुनकवचं नाम पञ्चपञ्चादशोऽध्यायः ॥

67

Sl. No. 20724 कार्तवीर्यार्जुनकवचम् Ms. No. P. 2706/3

(डामरान्तीयम्-- उमामहेश्वरसंवादरूपम्)

Beginning :

अस्य श्री कार्तवीर्यार्जुनकवचस्तोत्रमन्त्रस्य- दत्तात्रेय ऋषिः ; अनुष्टुप् छन्दः ; श्री-कार्तवीर्यार्जुनो देवता ; कार्तवीर्यार्जुनसिध्यर्थे जपे विनियोगः ॥

End:

सुभक्ताय सुशिष्याय दद्यात्सर्वस्वदायिने ।
साधकानां हितार्थाय यदुक्तं चन्द्रमौलिना ॥१४७॥

कार्तवीर्यस्य कवचं तदुक्तं वै मया तव ।
येन संरक्षिता देवि कालेनापि न जीर्यते ॥१४७॥

Colophon :

इति श्री × डामरेश्वरतन्त्रे उमामहेश्वरसंवादे कार्तवीर्यार्जुनकवचं सम्पूर्णम् ॥

68

Sl. No. 20725 कार्तवीर्यार्जुनकवचम् Ms No. P 5746/2

(चौद्धापुरेश्वरतन्त्रीयम्)

Beginning :

अस्य श्रीकार्तवीर्यार्जुनकवचस्तोत्रमहामन्त्रस्य- दत्तात्रेयभगवान् ऋषिः ; अनुष्टुप् छन्दः ; श्रीकार्तवीर्यार्जुनो विष्णुश्चक्रवर्ती देवता । ... ... ध्यानम्—

धनुः पञ्चशतं बामे दक्षिणेनावृतान् शरान् ।
बिभर्ति कार्तवीर्योऽसौ राजा रक्षतु मां सदा ॥

End :

कार्तवीर्यस्य कवचं शिरसा यः प्रकाशितुम् ।
× × नात्पूजयेद्वापि तस्य लक्ष्मीः स्थिरा भवेत् ॥

ऐं ऐं आं ऐं + + हुं फट् स्वाहा ॥

Colophon :

इति श्रीचौद्धापुरेश्वरतन्त्रे कार्तवीर्यार्जुनकवचं सम्पूर्णम् ॥

69

Sl. No. 20726 कार्तवीर्यार्जुनकवचम् Ms. No. P. 5764/22
(डामरतन्त्रीयमीश्वरोक्तम्)

Beginning :

देव्युवाच—

देवादिदेव सर्वज्ञ सर्वलोकहिते रता ।
केन रक्षा भवेन्नृणां भूताना विविधापदि ॥

राजचोरादिपीडासु शस्त्राग्निविषपातने ।
मारीदुस्स्वप्नपीकासु (?) गृहरोगभयेषु च ॥

+ + + + +

ईश्वर उवाच—

श्रुणु गुह्यतमं देवि गोपनीयं प्रयत्नतः ।
अवाच्यमपि बक्ष्यामि सर्वलोकहिताय वै ॥

End :

सम्यक् द्वादशधा रात्रौ प्रजपेत् बन्धमुक्तये ।
त्रिदिनानि गळग्रस्ताः मुच्यते न विचारणा ॥

अनेनैव विधानेन सर्वसाधनकर्मणि ।
असाध्यमपि सप्ताहं साधयेन्मन्त्रवित्तमः ॥

Colophon :

श्रीमद्डामरतन्त्रे ईश्वरप्रोक्ते उमामहेश्वरसंवादे श्रीकार्तवीर्यार्जुनकवचन्नाम द्वितीयोध्यायः ॥

70

Sl. No. 20730 **कार्तवीर्यार्जुनकवचम्** (डामरीयम्) Ms. No. P. 6852/5

Beginning :

कार्तवीर्यार्जुनो धन्वी राजेन्द्रो हैहयेश्वरः ।
दत्तात्रेयप्रियतमः सहस्रभुजमण्डलः ॥
चापी सङ्गी रथी बाणी तूणी वल्ली महाबलः ॥

End:

वर्धते सौख्यसौभाग्यबलपुण्यानि नित्यशः ।
नमः पञ्चशतं सव्ये दक्षिणे तावतः शरान् ॥
बिभ्रत्स कार्तवीर्योसौ चोरेभ्यो रक्षतादिह ॥

Colophon :

इति डामरेश्वरतन्त्रे × × × × उमामहेश्वरसंवादे ईश्वरप्रोक्तं श्रीकार्तवीर्यार्जुन कवचस्तोत्रं सम्पूर्णम् ॥

71

Sl No. 20732 **कार्तवीर्यार्जुनकवचम्** (काशीखण्डान्तर्गतम्) Ms. No. P 7499/3

Beginning :

× × × × गळदायकाः ।

सर्वतस्तु ज्वालाकवा वरकमारिणामव ॥

अव्याहतबलैश्वर्यां भक्तिसामर्थ्यविग्रहाः ।
ओं ग्रों क्षे × × × मदभञ्जनः ।
प्राचीदिशं रक्ष मे बाणबाणासनायुध ॥

End :

कार्तवीर्यस्य कवचं यदुक्तं वै मया तव ।
तस्मात्सर्वप्रयत्नेन कवचं यो धारयेत्सुधीः ॥
धनुः पञ्चशतं बामे दक्षिणे तव तत्स्मरन् ।
× × भात्स कार्तवीर्यो × × येत्सकलं मम ॥

Colophon :

इति श्रीउमामहेश्वरसंवादे काशीखण्डे कार्तवीर्यार्जुनकवचस्तोत्रं समाप्तम् ॥

72

Sl. No. 20740 कार्तवीर्यार्जुनद्वादशनामस्तोत्रम् Ms. No. P. 5933/12

Beginning:

कार्तवीर्यः कलिद्वेषी कृतबीर्यसुतो बली ।
व्रती सहस्रबाहुभ्यो रक्तवासा धनुर्धरः ॥
रक्तगन्धो रक्तमाल्यो × ×× × षदः ॥

End:

द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् ।
सम्पदः तस्य जायन्ते चोरा × × श्यन्ति शत्रवः ॥
संग्रामे विजयं तस्य पार्थस्येव न संशयः ॥

Colophon :

73

Sl No. 20743 कार्तवीर्यार्जुनद्वादशनामस्तोत्रम् Ms. No. C. 4654/21
(मान्त्रिकम्)

Beginning :

ओं अस्य श्रीकार्तवीर्यार्जुनद्वादशनामस्तोत्रमन्त्रस्य-- दत्तात्रेय ऋषिः ; अनुष्टुप् छन्दः कार्तवीर्यार्जुनो देवता ; ओं फं बीजम् ; च्छ्रीं शक्तिः ; फट् कीलकम् ; श्रीकार्तवीर्यार्जुनप्रसादसिध्यर्थे जपे विनियोगः ॥

End:

राजानो वशतां यान्ति श्रेयोऽपि वशगो ततः ।
अनपत्यं च दूरस्थं क्षेमलाभयुतं प्रिये ॥६॥
सर्वसिद्धिकरं स्तोत्रं यः पठेत्सर्वकामदम् ॥७॥
ओं क्रौं च्छ्रीं क्लीं भ्रु + + + स्वाहा ॥
कार्तवीर्यार्जुनो नाम + + + + + + लभ्यते ॥
चोरव्याघ्र + + + + + न कुरु स्वाहा ॥

Colophon :

-- -- -- --

74

Sl. No. 20744 कार्तवीर्यार्जुनस्तोत्रम् Ms. No. B. 1122/20
(अरिनिग्रहस्तवराजः)

Beginning :

सहस्रबाहुं सशरं सचापं
रक्ताम्बरं रक्तकिरीटकुण्डलम् ।
चोरादिदुष्टभयनाशनमिष्टदं तं
वन्दे महाबलविजम्भितकार्तवीर्यम् ॥

End :

कार्तवीर्य महावीर्य सर्वदुष्टविनाशन ।
सर्वत्र सर्वदा तिष्ठ दुष्टान्नाशय पाहि माम् ॥
कृतवीर्यसुतो राजा सहस्रभुजमण्डितः ।
अवतारो हरेः साक्षात् पालयेत्सकलं मम ॥

Colophon:

.. – .. –

75

Sl. No. 20745 कार्तवीर्यार्जुनस्तोत्रम् Ms. No. P. 572/4

(उड्डामरतन्त्रीयम् - उमामहेश्वरसंवादात्मकम्)

Beginning :

देव्युवाच–

देवदेव महादेव भक्तानुग्रहकारक ।
+ + + + +
स्तोत्रं वद महादेव अरिनिग्रहकारकम् ।
कार्तवीर्यस्य नृपतेः सर्वसिद्धिकरं नृणाम् ॥

End :

त्रिसन्ध्यानियमेनैव यः पठेदेकवत्सरम् ॥१४१॥
जप्त्वा सकालजं मृत्युं न भजेत कदाचन ॥

Colophon :

इति श्रीउड्डामरेश्वरतन्त्रे ईश्वरप्रोक्ते उमामहेश्वरसंवादे कार्तवीर्यार्जुन-अरिनिग्रहस्तव-राजः समाप्तिमगमत् ॥

76

Sl. No. 20747 कार्तवीर्यार्जुनस्तोत्रपञ्जकम् Ms. No. P. 8768

(डड्डामरेश्वरतन्त्रीयम्– देवीश्वरसंवादरूपम्)

Beginning:

देव्युवाच–

देवदेव जगन्नाथ त्रिपुरान्तक शङ्कर ।
दत्तात्रेयकृतं स्तोत्रं कार्तवीर्यस्य गोपतेः ॥

ब्रूहि देव ममाग्रे तद्भक्तानां शीघ्रसिद्धिदम् ।
यस्य स्मरणमात्रेण कृतकृत्यो भवेन्नरः ॥

+ + + + +

दत्तात्रेयः–

ओंनमः कार्तवीर्याय सूर्याय विमलौजसे ।
अर्जुनाय रमाधाम्ने साम्ने नृपतितेजसे ॥

End :

वने वा सङ्करे वापि नानाचोरसमाकुले ।
पठेन्नास्ति भयं तस्य × स्थो बहुरूपवान् ॥२०॥

कार्तवीर्यस्य भक्तोऽपि विष्णुभक्तिपरायणः ।
सर्वान् कामानवाप्नोति यात्यन्ते हरिमन्दिरम् ॥२५॥

Colophon :

इति डड्डामरेश्वरतन्त्रे उमामहेश्वरसंवादे कार्तवीर्यार्जुनस्तोत्रपञ्जरं समाप्तम् ॥

77

Sl.No. 20748 कालभैरवाष्टकम् Ms. No. B 1266/15

(तीक्ष्णदंष्ट्रकालभैरवाष्टकम्)

Beginning :

तीक्ष्णदंष्ट्रेति प्रार्थनम् । भैरवोस्य देवता ।

ओं यं यं यँ यक्षरूपं दश दिशि विदितं भूमिकूपायमानं
सं सं संहारमूर्तिं शिरमकुटजटाशेखरं चन्द्रबिम्बम् ।
दं दं दं दीर्घकायं विकृतनखमुखं ह्यूर्ध्वरोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ १ ॥

End :

सिन्दूरारुणगात्रं च सर्वजन्मविनिर्मितम् ।
मुकुटाग्रधरं देवं भैरवं प्रणमाम्यहम् ॥

Colophon :

इति तीक्ष्णदंष्ट्रकालभैरवाष्टकं समाप्तम् ॥

Extra information:

ग्रन्थान्ते–

स्वस्वमानसकातर्यमालोक्य स्वस्वमानसम् ।
शिक्षयन्तस्ततो रामे तुष्टुवुस्ते पृथक् पृथक् ॥

इति पद्यमेकं दृश्यते ॥

60

Sl. No. 20749 कार्तीयीकदामोदरस्तोत्रम् (पाञ्चरात्रीयम्) Ms. No. C. 2800/

Beginning :

मत्स्याकृतिधर जय देवेश वेदविबोधक कूर्मस्वरूप ।
मन्दरगिरिधर सूकररूप भूमिविदारक जय देवेश ॥

काञ्चनलोचन नरहरिरूप दुष्टहिरण्यकभञ्जन जय भो ।
जय जय वामन बलिविध्वंसिन् दुष्टकुलान्तक भार्गवरूप ॥ +

End :

दुर्जनमोदक बुद्धस्वरूप
सज्जनबोधक कालिकस्वरूप ।
जय युगकृतदुर्जनविध्वंसिन्
जय जय जय भो जय विश्वात्मन् ॥

इति मन्त्रं पठन्नेव कुर्यान्नीराजनं बुधः ।
घटिकाद्वयशिष्टायां स्नानं कुर्याद्यथाविधि ॥
अन्यथा नरकं याति यावदिन्द्राश्चतुर्दश ॥

Colophon:

इति श्रीमत्पाञ्चरात्रागमे कार्तीयीकदामोदरस्तोत्रं समाप्तम् ॥

79

Sl. No. 20751 कुञ्जिकास्तोत्रम् Ms. No. C. 4685/4

(रुद्रयामलीयम्– गौरीतन्त्रान्तर्गतम्– शिवदेवीसंवादरूपम्)

Beginning:

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि ।
नमः कैटभहारिण्यै नमस्ते महिषार्दिनि ॥१॥

End :

यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् ।
न तस्य जायते सिद्धिररण्ये रोदनं यथा ॥

Colophon :

इति रुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं समाप्तम् ॥

80

Sl. No. 20754 कृष्णकवचम् **Ms. No. P 5176/17**

(ब्रह्माण्डान्तर्गतम्-- उमामहेश्वरसंवादरूपम्)

Beginning :

कृष्णकवचस्तोत्रमन्त्रस्य— ईश्वर ऋषिः ; अनुष्टुप् छन्दः ; श्रीकृष्णो देवता ; श्रीकृष्णप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

वाजपेयसहस्राणां फलं प्राप्नोति तत्त्वतः ।
भुक्त्वा तु विपुलान् भोगान् परब्रह्मादि गच्छति ॥

प्रयाणे गरुडारूढं पारिजातहरं हरिम् ।
सत्यया सहितं ध्यायेत्सर्वकामार्थसिद्धये ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उमामहेश्वरसंवादे श्रीईश्वरप्रोक्तं कृष्णकवचं समाप्तम् ॥

81

Sl. No. 20759 कृष्णद्वादशनामस्तोत्रम् **Ms. No. P. 3816/17**

(व्यासोक्तम्)

Beginning:

श्रीवेषा उवाच—

प्रथमं तु हरिं विद्यात् द्वितीयं केशवात्परम् ।
तृतीयं पद्मनाभं च चतुर्थं वामनं स्मृतम् ॥
पञ्चमं वेदगर्भं च षष्ठं तु मधुसूदनम् ॥

End :

गोघ्नश्चैव कृतघ्नश्च भ्रूणहत्यां व्यपोहतु ।
स्त्रीबालघातकश्चैव सुरापो वृषलीपतिः ॥
मुच्यते सर्वपापेभ्यो विष्णुसायुज्यमाप्नुयात् ॥

Clophon:

वेदव्यासप्रोक्तश्रीकृष्णद्वादशनामस्तोत्रं समाप्तम् ॥

82

Sl. No. 20760 कृष्णद्वादशनामस्तोत्रम् Ms. No. P. 5570/2

(भारतान्तर्गतम्)

Beginning :

शृणुध्वं मुनयस्सर्वे गोपालस्य महात्मनः ।
अनन्तस्याप्रमेयस्य नामद्वादशकं स्तवम् ॥
अर्जुनाय पुरा गीतं गोपालेन महात्मना ।
द्वारकायां प्रार्थयते यशोदायाश्च सन्निधौ ॥

End:

एतद्द्वादशनामानि मया प्रोक्तानि फल्गुना ।
कालत्रयं पठेद्यस्तु तस्य पुण्यफलं शृणु ॥
चान्द्रायणसहस्रस्य कन्यादानशतस्य च ।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥

Colophon :

इति श्रीमहाभारते अरण्यपर्वाणि श्रीकृष्णद्वादशनामस्तोत्रं समाप्तम् ॥

83

Sl. No. 20762 कृष्णषडक्षरस्तोत्रम् Ms. No. P. 10251/12

Beginning;

अस्य श्रीकृष्णषडक्षरीस्तोत्रमन्त्रस्य– ब्रह्मा ऋषिः ; गायत्री छन्दः ; श्रीपरमात्मा श्रीकृष्णो देवता । + + + मम श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥

End:

ध्यायेद्धरिं मणिनिभं जगदेकवन्द्यं
सौन्दर्यसारमनिशं च वराभयानि ।
दोर्भिर्दधानमथकं सरसं च (?) भीष्म-
संन्यासमेतमखिलप्रदमिन्दिरेशम् ॥

Colophon :

— — —

84

Sl. No. 20763 — कृष्णस्तवराजः (गौतमतन्त्रान्तर्गतः) — Ms. No. P. 3136/13

Beginning :

ऋषयः ऊचुः—

भगवन् सर्वतत्त्वज्ञ सर्वशास्त्रविशारद ।
श्रीकृष्णस्तवराजं नः कृपया वक्तुमर्हसि ॥

गौतमः—

श्रीकृष्णस्तवराजस्य ऋषिर्नारद ईरितः ॥

End:

त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ।
राजवल्लभतामेति भवेत्सर्वजनप्रियः ॥

अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥

Colophon :

इति गौतमीये तन्त्रे दशमोऽध्यायः । श्रीकृष्णस्तवराजः समाप्तः ॥

85

Sl. No 20765 **कृष्णावतारस्तोत्रम्** **Ms. No P. 8761/10**

(भागवतीयम्)

Beginning :

तमद्भुतं बालकमम्बुजेक्षणं
चतुर्भुजं शङ्खगदाद्युदायुधम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं
पीताम्बरं सान्द्रपयोदसौभगम् ॥ १ ॥

End :

सविस्मयोत्फुल्लविलोचनो हरिं
सुतं विलोक्यानकदुन्दुभिस्तदा
कृष्णावतारोत्सवसम्भ्रमान्मुदा
स्मरन् द्विजेभ्योऽयुतमाप्लुतो गवाम् ॥

Colophon :

-- -- --

86

Sl No. 20770 **केतुकवचम्** **Ms No C. 461/18**

(ब्रह्माण्डपुराणीयम्)

Beginning :

अस्य श्रीकेतुकवचस्तोत्रमन्त्रस्य– प्रियंवर ऋषिः ; अनुष्टुप् छन्दः ; केतुर्देवता; केतुप्रसादसिध्यर्थे जपे विनियोगः । ध्यानम्–

केतुं कराळवदनं चित्रवर्णं किरीटिनम् ।
प्रणमामि सदा देवं ध्वजाकारं ग्रहेश्वरम् ॥ १ ॥

चित्रवर्णः शिरः पातु फालं मे धूमवर्णकः ।
पातु नेत्रे पिङ्गळाक्ष श्रोत्रे मे रक्तलोचनः ॥२॥

End :

य इदं कवचं दिव्यं सर्वरोगविनाशनम् ।
सर्वशत्रुविनाशं च पठेत्सर्वजयो भवेत् ॥६॥

Colophon :

इति श्रीब्रह्माण्डपुराणे केतुकवचं समाप्तम् ॥

87

Sl. No. 20773 केतुस्तोत्रम् Ms. No. P. 6614

(ब्रह्माण्डपुराणीयम्-- प्रियंवदसूर्यसंवादरूपम्)

Beginning :

अस्य श्रीकेतुस्तोत्रमहामन्त्रस्य प्रियवद ऋषिः ·|· ·|· ध्यानम्–
प्रियंवद उवाच–

मुनीन्द्रा श्रुततत्वज्ञा सर्वशास्त्रविशारदाः ।
केतुग्रहैः पीडितानां ब्रह्मणा कीर्तितं पुरा ॥

End:

नित्यमष्टोत्तरशतं ये जपन्ति नरोत्तमाः ।
केतुप्रसादेन न कदाचित् भयं भवेत् ॥

Colophon :

इति ब्रह्माण्डपुराणे प्रियंवदसूर्यसंवादे केतुस्तोत्रं समाप्तम् ॥

88

Sl. No. 20774 गङ्गाष्टकम् (वाल्मीकिप्रोक्तम्) Ms. No. P. 4526/4

Beginning:

मातश्शैलसुतासपत्नि वसुधाशृङ्गारहारावलि
स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ।

त्वत्तीरे वसतस्त्वदम्बुपिबतस्त्वद्वीचिषु प्रेंखतः
त्वन्नाम स्मरतस्तदर्पितदृशः स्यान्मे शरीरव्ययः ॥

End :

गङ्गाष्टकं पठति यः प्रयतः प्रभाते
वाल्मीकिना विरचितं शुभदं मनुष्यः।
प्रक्षाल्यगात्रकविकल्मशपङ्कमाशु
मोक्षं लभेत् पतति नैव नरो भवाब्धौ ॥९॥

Colophon :

इति श्रीवाल्मीकिप्रोक्त गङ्गाष्टकं समाप्तम् ॥

६७

Sl. No. 20786 गङ्गास्तोत्रम् Ms. No. C 4345

(दशहरगङ्गास्तोत्रम्- - स्कान्दीयम्)

Beginning :

अस्य श्रीदशहरस्तोत्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः ; दशविधपापहरागंगादेवता ; संर्वपापक्षयार्थे जपे विनियोगः ॥

चातुर्भुजां त्रिनेत्रां च सर्वावयवशोभिताम् ।
रत्नकुंभसितांभोजवरदाभयसत्कराम् ॥

End:

विष्णुपादाब्जसम्भूते गंगे त्रिपथगामिनि ।
धर्मद्रवेति विख्याता पापं मोह × × × ॥

जान्हवी सर्वतः पुण्या × पापहारिणी ।
वाराणस्यां विशेषेण गंगा वाहिनी ॥

Colophon :

इति स्कन्दपुराणे काशीखण्डे दशहरगंगास्तोत्रं समाप्तम् ॥

90

Sl. No. 20789 | गजेन्द्रमोक्षस्तोत्रम् | Ms. No. P. 9236/10

(प्रातःस्मरणस्तोत्रम्)

Beginning :

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यं मारुह्य धावन्
व्याघूर्णन् माल्यभूषावसनपरिकरो मेघगाम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमाखमभयंशङ्खचापौ सखेटौहस्तै
कौमोदकीमायवतु हरिरसावंहसां संहतेनः ॥

End :

प्रातर्भजामि भजतामभयंकरं तं
प्राक् सर्वजन्मकृतपापभयापनुत्त्यै ।
यो ग्राहवक्त्रपतितांघ्रिगजेन्द्रघोर
शोकप्रणाशनकरो धृतशङ्खचक्रः ॥

श्लोकत्रयमिदं पुण्यं प्राथरुत्थाय यः पठेत् ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदंहरिः ॥

Colophon :

-- -- --

91

Sl. No. 20793 | गणपतिकवचम् | Ms. No. P. 2210/5

(पौराणिकम्)

Beginning :

अस्य श्रीगणेशकवचस्य— श्रीभगवान् महादेव ऋषिः । गणनाथो देवता । अनुष्टुप् छन्दः । ·/· + ध्यानम्—

ध्यायेद्बालदिवाकरद्युतिनिभंत्र्यक्षं गणाधीश्वरं
सिन्दूरारुणचर्चितं गजमुखं व × × न्तदन्ताङ्कुरम् ।
देवेन्द्रादिसमस्तदिक्पतिवरं गौर्यात्मजं पारगं
विद्यानां च सुरेश्वरं गणपतिं विद्याधिरामं परम् ।
पूर्वस्यां दिशि विघ्नेशः पातु विश्वेश्वरप्रियः ।
दक्षिणस्यां शिवात्माच पातु स्वर्गाधिदेवता ॥

End :

सिन्दूरकुन्दं कनकासने स्थं
इन्द्रादिदेवर्मुनिभिश्च सेव्यम् ।
तमेव देवं गणनाथनाथं
उमात्मजं स्कन्दगुरुं नमामि ॥

Colophon :

इति पुराणोक्तगणेशकवचं समाप्तम् ॥

92

No. 20794 **गणपतिकवचम्** Ms. No. P. 4447/19

Beginning:

नारद उवाच–

देवदेवं महादेव भक्तानामार्तिभञ्जन ।
लघुना येन मर्त्यानामभीष्टं सकलं भवेत् ॥
नादृग्विधं महापुण्यं कवचं वद मे प्रभो ।

ईश्वर उवाच–

श्रुणु नारद वक्ष्यामि जगतामुपकारकम् ।
अतिसम्मतकारं नाम कवचं च × × म् ॥

End:

× × न्तु कवचं दृष्ट्वा पलायन्ते दिशोदश ।
अस्मामिमन्त्रवाद × ज × मतादिशान्तये ॥

सर्वमङ्गलदं श्रीमदायुरारोग्यवर्धनम् ।
तस्मात्सर्वप्रयत्नेन गोपयेत्सर्वदा जपेत् ॥

Colophon :

इति गणपतिकवचं समाप्तम् ॥

93

Sl. No. 20795 गणपतिकवचम् Ms. No. P. 4525/52

(स्कान्दीयम्)

Beginning:

विघ्नराज नमस्तुभ्यं विघ्नध्वान्तदिनेश्वर ।
पाहि मां सर्वतो भूयो शरणागतवत्सल ॥

अस्य श्रीविघ्नराजकवचमहामन्त्रस्य ब्रह्मा ऋषिः ; गायत्री छन्दः ; गणपतिर्देवता ; गं बीजम् ह्रीं शक्तिः ; श्रीं कीलकम् । विघ्नेश्वरप्र ·· गः ॥

End :

यो ब्रह्मचारिणमचिन्त्यमनेकरूपं
ध्यायेज्जगत्रयाहिते रतमापदघ्नम् ।
सर्वार्थसिद्धिदमिदं लभते मनुष्यो
विघ्नेश्वरस्य पदमेव स याति नूनम् ॥

Colophon :

इति श्रीस्कान्दे पुराणे प्रपञ्चसारे ब्रह्मनन्दिकेश्वरसंवादे विघ्नेश्वरकवचं समाप्तम् ॥

94

Sl. No. 20796 गणपतिकवचत्रम् Ms. No. P. 4526/20

(गणपतिकवचम् -- रुद्रयामलीयः)

Beginning :

ओं ध्यानम् । वीज ·|· दः ॥

नमस्ते सिद्धलक्ष्मीश गणाधिप महाप्रभो ।
विघ्नेश्वर जगन्नाथ गौरीपुत्र जगत्प्रभो ॥१॥

End :

स्वर्गाभीष्टमवाप्नोति शीघ्रमेव सुदुर्लभम् ।
महागणेशसान्निध्यं प्राप्नोत्येव न संशयः ॥

Colophon :

इति श्रीरुद्रयामले गणेशकवचं सम्पूर्णम् ॥

95

Sl. No. 20806 गणपतिकवचम् Ms. No. C. 694/30

(गणेशकवचम् गणेशपुराणान्तर्गतम्)

Beginning :

अथ पूर्वपीठिकाश्लोकाः-

एकदा मुनयस्सर्वे नैमिशारण्यवासिनः ।
प्रप्रच्छुः कृतकृत्यास्ते सूतं पौराणिकोत्तमम् ॥

ऋषयः ऊचुः-

वदसूत महाप्राज्ञ कवचं सर्वसिद्धिदम् ।
सर्वसम्पत्करं नृणां सर्वरक्षाकरं परम् ॥

End :

मुद्गलेन पुराप्रोक्तं माण्डव्याय महर्षये ।
मह्यां स प्राह कृपया कवचं कामितार्थदम् ॥

वितनोति स्वाङ्गरक्षामनेन कवचेन यः ।
स सर्वभयनिर्मुक्तः प्राप्नुयात्सकलं शुभाम ॥

Colophon:

इति गणेशपुराणे उत्तरे पुरश्चरणखण्डे गणेशकवचं नाम षडशीतितमोध्यायः ॥

96

Sl. No. 20811 गणपतिद्वादशनामस्तोत्रम् Ms. No. P. 4862/5

Beginning :

अस्य श्रीगणपतिद्वादशनामस्तोत्रमहामन्त्रस्य– ईश्वर ऋषिः ; पंक्तिः छन्दः ; श्री महागणपतिर्देवता । गणानां त्वा गणपतिँ यजामहे ; इति बीजम् । कविं कवीनामुप-मश्रवस्तवं इति शक्तिः ॥ + ÷ ÷ विनियोगः ॥

End :

गजाननं भूतगणाधिसेवितं
कपित्थजम्बूफलसारभक्षिनम् ।
उमासुत शोकविनाशकारणं
नमामि विघ्नेश्वरपादपङ्कजम् ॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्त भक्तानामेकदन्तमुपास्महे ॥

Colophon :

इवि गणपनिस्तोत्रमहामन्त्रं सम्पूर्णम् ॥

97

Sl. No. 20814 गणपतिद्वादशनामस्तोत्रम् Ms. No. P. 8094/8/

Beginning :

अस्य श्रीविघ्नेश्वरद्वादशनामस्तोत्रमहामन्त्रस्य– नन्दिकेश्वर ऋषिः ; गोक्षीरधवलाकार इति बीजम् ; प्रमाणप्रीत्य इति शक्तिः । सप्तकोटिमहामन्त्रेति कीलकम् ॥

End:

एवं गणपतिस्तोत्रं षड्भिर्मासैः फलं भवेत् ।
संवत्सरेण सिद्यन्ति लभते नात्र संशयः ॥

Colophon :

श्रीविघ्नेश्वरद्वादशनामस्तोत्रं सम्पूर्णम् ॥

98

Sl. No. 20817 गणपतिद्वादशनामस्तोत्रम् Ms. No. C. 587/3
(रुद्रयामलान्तर्गतम्)

Beginning:

सिध्यर्थे श्रीगणपतिस्तोत्रमन्त्रपटे विनियोगः ।
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं गणनाथं च चतुर्थं गजकर्णकम् ॥

लम्बोधरं पञ्चमं च षष्टं विकटमेव च ।
सप्तमं विघ्नराजेन्द्रं धूमवर्णं तथाष्टमम् ॥

End :

वाहनं मोदकै - - - श्वरे तु - - -
सन्देहो नात्र कर्तव्यः नान्यथा शिवभाषितम् ।
इदं गणपतिस्तोत्रं सर्वकामफलप्रदम् ।

Colophon :

इति रुद्रयामले शिवप्रोक्तं गणपतिस्तोत्रं समाप्तम् ॥

99

Sl. No. 20818 गणपतिवज्रपञ्जरम् (रुद्रयामलीयम्) Ms. No. B. 2210/2

Beginning :

श्रीभैरव उवाच—

महादेवि गणेशस्य वरदस्य महात्मनः ।

कवचं ते प्रवक्ष्यामि वज्रपञ्जरनामकम् ॥

ओम् अस्य श्रीमहागणपतिवज्रपञ्जरकवचस्य भैरवः ऋषिः ॥

End:

अर्धरात्रौ (?) पठेन्नित्यं सर्वाभीष्टफलं भवेत् ।
इति गुह्यस्तु × × × गणपतिप्रियम् ॥
सर्वसिद्धिमयीं पूजां गोपयेत्परमेश्वरि ॥

Colophon :

इति श्रीरुद्रयामले गणपतिकवचं समाप्तम् ॥

100

Sl. No. 208 4 गणपतिवजपञ्जरस्तोत्रम् Ms. No. C. 3555
(विघ्नहृत्पञ्जरम्- स्कान्दीयम्)

Beginning :

योगिनः ऊचुः—

स्वामिंस्त्वयोक्तो विघ्नेशः सर्वविघ्ननिवारणः ।
पूजितः स कलौ देवैस्त्वयाप्यर्चितमादरात् ॥
त्रिपुरीभस्मतावापि विघ्नघ्नार्चनतः किल ।
त्वत्प्रसादोऽस्मासु यथा भवेत्तद्वद साम्प्रतम् ॥

End:

भवन्तोऽपीदमेवाङ्गे नस्स्वासुसमवाप्नुयात् (?) ।
यो धन्यो विन्यसेदङ्गे विघ्नपञ्जरं .... जनः ।
× × × × स्तस्सः स्वमनोरथान् ॥

Colophon :

इति श्रीस्कन्दपुराणोक्तपार्वतीश्वरसंवादे विघ्नहृत्पञ्जरं समाप्तम् ॥

101

Sl. No. 20825 गणपतिस्तवराजः Ms. No. P. 2210/4

(गणेशस्तवराजः--रुद्रयामलीयः)

Beginning :

देव्युवाच—

भगवन् परमेशान महागणपतेर्विभो ।
स्तोत्रराजाभिधं ब्रूहि मूलमन्त्रस्य तत्त्वतः ॥

\+ \+ \+ \+ \+

द्विचतुर्दशवर्णभूषिताङ्गं
शशिसूर्याग्निविलोचनं सुरेशम् ।
अहिभूषितकण्ठमक्षसूत्रं
अभयन्ते × × × गणेशम् ॥

End :

इति स्तवोत्तमं देवि महागणपतेः परम् ।
गोपनीयं × × × स्यं पञ्चाङ्गं सुरसुन्दरि ॥

\+ \+ \+ \+ \+

स्तोत्रं पञ्चाङ्गममलं गोपनीयं स्वयोनिवत् ॥

Colophon :

इति श्रीरुद्रयामळे तन्त्रे महागणपतिस्तोत्रम् ॥

102

Sl. No. 20827 गणपतिस्तवराजः Ms. No. P. 7982/22

(गणेशस्तराजः -- भविष्योत्तरान्तर्गतः)

Beginning :

मेरुपृष्ठे समासीनं ऋषिसङ्घैः समावृतम् ।
सर्वानुग्राहकं शान्तं सर्वेशं नन्दिकेश्वरम् ॥

पप्रच्छ भगवान् ब्रह्मा लोकानुग्रहकाम्यया ॥

+ + + + +

स्तवराजस्य माहात्म्यं प्रवक्ष्यामि समासतः ॥

End·

स्तवराजस्य महात्म्यं श्रुतं सर्वमशेषतः ।
कर्मणा मनसा वाचा ये प्रपन्ना विनायकम् ॥
ते तरन्ति महाघोरं संसारमघनाशनम् (?) ॥

Colophon :

इति भविष्योत्तरपुराणे षष्ठांशे श्रीनन्दिकेश्वरब्रह्मसंवादे विनायकस्तवराजस्तोत्रं नाम अष्टादशोऽध्यायः ॥

103

Sl No. 20831 गणपतिस्तवराजः Ms. No. C. 1980/2
(गणेशस्तवराजस्तोत्रम्)

Beginning :

अथगणपतिस्तवराजस्तोत्रप्रारम्भः । श्रीभगवानुवाच—

गणेशस्य स्तवं वक्ष्ये कलौ झटिति सिद्धिदम् ।
न न्यासो न च संस्कारः न होमो न च तर्पणम् ॥
न मार्जनं च पञ्चाशत् सहस्रजपमात्रतः ॥

End :

अस्य श्री गणपतिस्तोत्रमहामन्त्रस्य- भगवान् सदाशिव ऋषिः ; महागणपतिर्देवता ; अष्टिः छन्दः ; महागणपतिप्रसादसिध्यर्थे जपे विनियोगः । × × × × × × ॥

Colophon :

— — —

104

Sl. No. 20832 गणपतिस्तवराजः Ms. No P. 3553/2

(गणेशस्तवराजः -- आश्वलायनब्रह्मसंवादरूपः)

Beginning :

आश्वलायन उवाच–

देव देव त्रिलोकेश सर्वदेवनमस्कृत ।
येनाहं सिद्धिमाप्नोति (?) तन्मे ब्रूहि पितामह ॥

ब्रह्मोवाच–

साधु वत्स महाप्राज्ञ बुद्धिमानसि सुव्रत ।
येन साधीयसी बुद्धिरुत्पन्ना हितकाम्यया ॥

End :

दासास्तत्र नृपास्सर्वे वश्यास्तत्र नृपस्त्रियः ।
बहुनात्र किमुक्तेन लोकस्तस्य वशे भवेत् ॥

गङ्गातुङ्गपपवित्रचुंबितमौलिभागे
विद्योतमाना शशिखण्डविभूषणा च ।
आतङ्कहारकर पङ्कजदृश्यमाना
शुभ्रान्तदन्तसला च (?) नमः परस्मै ॥

Colophon :

इत्याश्वलायनब्रह्मसंवादे गणेशस्तवराजः समाप्तः ॥

105

Sl. No. 20833 गणपतिस्तोत्रम् Ms. No. P. 2190/6

(विनायकस्तोत्रम्-- भविष्योत्तरीयम्)

Beginning :

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्त्या तु संस्मरन्नित्यं आयुःकामार्थसिद्धये ॥ १॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णवर्णं च गजवक्त्रं चतुर्थकम् ॥२॥

End:

इदं गणपतिस्तोत्रं षण्मासेनैव सिध्यति ।
शुचिर्भूत्वा पठेन्नित्यं लभते नात्र संशयः ॥७॥
अष्टौ ब्राह्मणान् ग्राहयित्वा विद्यासिद्धिर्भविष्यति ॥

Colophon :

इति भविष्योत्तरपुराणे विनायकस्तोत्रं समाप्तम् ॥

106

Sl No. 20834 गणपतिस्तोत्रम् **Ms. No. P. 2210/9**

(गजराजस्तुतिः वा गणेशस्तुतिः शारदातिलकीयम्)

Beginning;

ओङ्कारमाद्यं प्रवदन्ति सन्तः
वाचस्पतीनामपि यं गृणन्ति ।
गजाननं देवगणानताङ्घ्रिं
भजेऽहम् × × × कृतावतंसम् ॥

End:

यस्तैरनेकैः बहुभिस्तपोभिः
आराध्यमाद्यं गजराजवक्त्रम् ।
स्तुत्वानया ये विधिवत् स्तुवन्ति
ते सर्वलक्ष्मीनिधयो भवन्ति ॥

Colophon :

इति शारदातिलके त्रयोविंशः पटलः ॥

107

Sl. No. 20835 **गणपतिस्तोत्रम्** Ms. No. P. 5668/36

(विनायकस्तोत्रम्-- ब्रह्माण्डपुराणीयम्)

Beginning :

देवदेवसुतं देवं यजे विघ्नविनायकम् ।
हस्तिरूपं महाकायं सूर्यकोटिसमप्रभम् ॥

वामनं जटिलं पिङ्गं ह्रस्वग्रीवं महोदरम् ।
ध्रुवं दुरत्ययं दण्डं विकटं प्रकटोत्कटम् ॥

End :

इदं स्तोत्रं शुचिर्भूत्वा यः पठेन्नियतः सदा ।
कार्यसिद्धिर्भवेत्तस्या परत्र च परां गतिम् ॥

गणागणं सर्वगणं गणेश्वरं
विनायकं सर्वजगद्गुरुं धिभुम् ।
विनायकं त्वां शिरसा नमाम्यहं
विनायक त्वां मनसा स्मराम्यहम् ॥

Clophon:

इति ब्रह्माण्डपुराणे स्कन्दप्रोक्ते विनायकस्तोत्रं समाप्तम् ॥

108

Sl. No. 20836 **गणपतिस्तोत्रम्** Ms. No. P. 7758/1

(जयगौरीस्तोत्रम्--पार्वतीरचितम्)

Beginning :

जयगौरीकरनिर्मितगजमुखगलितगण्डमेको × × ।
दुर्जयदुरितसुभीषणपशुधारी वरवह्नेः ॥

जयन्तु घण्टे खरदण्डनायकाः

यमस्य कण्ठस्थ जयस्य मायकाः ।

तमोमुखे शूलधरस्य नायकाः

दिशन्तु श्रेयो विपुलं विनायकाः ॥

End :

अन्तरायतिमिरोपशान्तये

शान्तिपावनतनुं च वैभवम् ।

तं नरं वपुषि कुञ्जरं मुखे

मन्महे किमपि तुन्दिलं महः ॥

Colophon :

इति पार्वतीरचिते जयगौरीस्तोत्रं समाप्तम् ॥

109

No. 20839 **गणपतिस्तोत्रम्** Ms. No. C. 588

(गणेश्वरस्तोत्रम्--सनत्कुमारोक्तम्)

Beginning:

सिन्दूरकुङ्कुमहुताशनविद्रुमार्क-

रक्ताब्जदाडिमनिभाय चतुर्भुजाय ।

हेरम्बभैरवगणेश्वरनायकाय

सर्वार्थसिद्धिफलदाय नमः शिवाय ॥१॥

End :

एतत्स्तोत्रं पवित्रं च माङ्गल्यं पापनाशनम् ।

कृत्यादिमायाशमनं सर्वशत्रुविमर्दनम् ॥

त्रिसध्यं यः पठेद्भक्त्या स मुक्तः सर्वसिद्धिमान् ।

गणेश्वरप्रसादेन लभते शङ्करं पदम् ॥

Colophon :

इति श्रीसनत्कुमारप्रोक्तं गणेश्वरस्तोत्रं समाप्तम् ॥

110

Sl. No. 20841 | गणपतिहृदयम् | Ms. No. P. 8105/2

(गणेशहृदयम्-- रुद्रयामलीयम्)

Beginning :

श्रीदेव्युवाच—

भगवन् देवदेवेश लोकानुग्रहकारक ।
त्वत्प्रसादाद्गणेशस्य श्रुतः पूजाविधिर्मया ॥
इदानीं श्रोतुमिच्छामि हृदयं त्वत्प्रकाशितम् ।
एकाक्षरस्य मन्त्रस्य महत्प्रीतेन तेजसा ॥

End :

गणेशहृदयं नाम कवचं सर्वसिद्धिदम् ।
पठित्वा धारयेद्वापि तस्य सिद्धिः करे स्थिता ॥
न प्रकाश्यं महेशानि कवचं यत्र कुत्रचित् ।
दातव्यं भक्तियुक्ताय कवचं तु सुरेश्वरि ॥

Colophon :

इति श्रीरुद्रयामले गौरीशङ्करसंवादे गणेशहृदयं समाप्तम् ॥

111

Sl. No. 20844 | गणपत्यष्टकम् | Ms. No. B. 279/5

(गणेशाष्टकम् गणेशपुराणीयम्)

Beginning:

सर्वे ऊचुः—

यतोऽनन्तशक्तेरनन्ताश्च जीवा
यतोतिगन्तादप्रमेया (?) गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥

End :

यो जपेत् परया भक्त्या गजाननपरो नरः ।
भवमुक्तो ततो देवेश्चा . . . तं गतः प्रभुः ॥

Colophon:

इति श्रीगणेशपुराणे उपासनाखण्डे श्रीगणेशाष्टकं समाप्तम् ॥

Extra information :

अस्फुटानि मलिनान्यक्षराणि ॥

112

Sl. No. 20845 **गणपत्यष्टकम्** **Ms. No. C. 694/55**

(गणेशपुराणान्तर्गतम्)

Beginning :

यतोनन्तशक्तिरसन्ताश्च जीवा
यतो निर्गुणादप्रमेयागुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥

End :

विद्याकामा लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वाञ्छितान् लभते सर्वानेकविंशति×रकः ॥

यो जपेत्परया भक्त्या गजाननपरो नरः ।
मुक्त्वा ततो देवश्चान्तर्धानं गतः प्रभुः ॥

Colophon :

इति गणेशपुराणे उपासनाकाण्डे श्रीगणेशाष्टकं समाप्तम् ॥

113

Sl. No. 20850 गरुडकवचम् Ms. No. C. 10251/2

(उमामहेश्वरसंवादात्मकम्)

Beginning :

अस्य श्रीगरुडकवचस्तोत्रमन्त्रस्य– परब्रह्म ऋषिः ; अनुष्टुप् छन्दः ; परमात्म खगेशो देवता ; ॐ बीजम् । + + + सृष्टिस्थितिलयार्थे स्वरूपार्थं सर्वाभीष्टसिध्यर्थे। जपे विनियोगः ॥

End:

जपान्तं कवचं दिव्यं इदं त्रैपिष्टभाजनम् ।
अनेन लब्धकामास्ते मोदन्तेऽद्यापि पार्वति ॥
मङ्गलं भगवान्विष्णो मंगलं मधुसूदन ॥
... मंगलं गरुडध्वज
यन्मङ्गलं सुपर्नं च विनताकल्पयत्पुरा ।
अमृतं प्रार्थयानं च तत्ते भवतु मङ्गलम् ।

Colophon :

इति श्री उमामहेश्वरसंवादे गरुडकवचं समाप्तम् ॥

114

Sl. No 20854 गरुडकवचम् (ब्रह्माण्डान्तर्गतम्) Ms. No. P. 6879/3

Beginning :

गारुडं कवचं गुह्यं सर्वाभीष्टप्रदायकम् ।
अग्निस्तम्भजलस्तम्भसेनास्तम्भविधायकम् ॥

आध्यात्मिकं चाधिदैवं आधिभौतिकमेव च ।
महापापोपशमनं × पातकनाशनम् ॥

End :

अन्नं च षड्रसोपेतं लभ्यते जपतां सदा ।
यः पठेत् शृणुयाद्वापि प्रातः काले समुत्थितः ।
तस्याभीष्टं ददात्यद्धा कवचं मनुमुत्तमम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उमामहेश्वरसंवादे गरुडकवचं समाप्तम् ॥

115

Sl. No. 20858 गरुडकवचम् Ms. No. P. 102641

Beginning :

अस्य श्रीगरुडकवचस्य– काश्यप ऋषिः श्रीलक्ष्मीनारायणधरगरुडो देवता ; + + +

आकुञ्चय सव्यमपरं प्रविसार्य पाद
न्तिर्यङ्मुखस्खलदुलचक्रविवर्तशङ्खम् ।
अन्योन्यघट्टितकरं लरुशब्दयुक्त
मुग्ध (?) वीयमानमनिशं (?) स्मर दुःखशान्तयै ॥

मूर्धानं गरुडः पातु ललाट विनतासुतः ।
नयने काश्यपः पातु भ्रुवौ भुजगनाशनः ॥

End :

पार्श्वमुत्तरमत्युग्रः पातूर्ध्वं पापनाशनः ।
अधस्ता × प्रताहर्ता पातु सर्वत्र सर्वभित् ॥

Colophon :

कवचमिदं पूर्णम् ॥

116

Sl. No. 20860 गरुडद्वादशनामस्तोत्रम् Ms No. P 3816/18

Beginning :

सुवर्णं वैनतेयं च नागादि (?) नागभूषणम् ।
विषान्प्रकचिंतारं च (?) अजितं विश्वरूपिणम् ।

End :

स्नानकाले पठेन्नित्यं प्रातः काले विशेषतः ।
कोटिजन्मकृतं पातं स्मरणेन विनश्यति ॥

Colophon:

-- -- -- --

117

Sl. No. 20861 गरुडद्वादशनामस्तोत्रम् Ms. No. P. 5586/9

(गरुडपुराणीयम्— गरुडमन्त्रस्तोत्रम्)

Beginning:

ओम् अस्य श्रीगरुडद्वादशनाम स्तोत्रमहामन्त्रस्य— ब्रह्मा ऋषिः ; अनुष्टुप् छन्दः ; गरुडो देवता ॥

End:

संग्रामाभिमुखो भूत्वा जयमाप्नोति मानवः ।
बन्धनान्मुक्तिमाप्नोति यात्रायां सिद्धिमाप्नुयात् ॥

Colophon :

इति श्रीगरुडपुराणे गरुडद्वादशनामस्तोत्रं समाप्तम् ॥

118

Sl.No. 20866 गरुडद्वादशनामस्तोत्रम् Ms. No. B. 10047/2

(नारदोक्तम्)

Beginning :

अस्य श्रीगरुडद्वादशनामस्तोत्रमहामन्त्रस्य– नारदो भगवान् ऋषिः ; + + श्री-गरुडात्मान् महावीरो देवता। + + +

ओं सुवर्णो वैनतेयश्च नागारिर्नागभूषणः ।
विषान्तको जितारिश्च × × × तामुखः ॥

End:

यः पठेत्प्रातरुत्थाय सर्वकार्यार्थसिद्धये ।
त्रिसन्ध्यं यः पठेद्यस्तु गरुत्म××प्रसादतः ॥
यक्षराक्ष .... पिशाचारिभयस्तथा ।
सर्वरोगादि × × × सर्वत्र विजयी भवेत् ॥

Colophon :

इति श्रीनारदोक्ते गरुडद्वादशनामस्तोत्रं समाप्तम् ॥

119

Sl.No. 20870 गायत्रीकवचम् Ms. No. P. 3591/24

Beginning :

अस्य श्रीगायत्रीकवचस्तोत्रमहामन्त्रस्य– ब्रह्मविष्णुमहेश्वरा ऋषयः ; ऋग्यजुस्सामाथर्वाणि छन्दांसि ; परब्रह्मस्वरूपिणी + + + ध्यानं–

मुक्ताविद्रुम + । + + वहन्तीं भजे ॥
गायत्री पुरतः पातु सावित्री पातु दक्षिणे ॥

End :

जपारम्भे च हृदयं जपान्ते कवचं पठेत् ।
गोस्त्रीब्रह्मवधान्मित्रद्रोहाद्यखिलपातकैः ॥
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥

Colophon :

इति गायत्रीकवचस्समाप्तः-

120

Sl. No. 20872 गायत्रीकवचम् **Ms. No. P. 5056/29**

Beginning :

अस्य श्रीगायत्रीकवचस्तोत्रमन्त्रस्य- अञ्जलौ ब्रह्मविष्णुमहेश्वरा ऋषयः इति शिरसि ·|· + ·|· ध्यानम्-

स्वर्णस्रक्कुण्डिकाहस्तां शुद्धनिर्मलज्योतिषीम् ।
सर्वतत्वमयीं वन्दे गायत्रीं वेदमातरम् ॥

सप्तव्याहृतयः पान्तु सशिरा बिन्दुसंयुताः ।
चतुर्विंशन्मुद्रायुक्ता सा बाला मां सदेवता ॥

End :

गोस्त्रीब्रह्ममित्रबधरागाद्याखिलपातकैः ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति गायत्रीकवच सम्पूर्णम् ॥

121

Sl. No. 20873 गायत्रीकवचम् (वसिष्ठोक्तम्) **Ms. No. P. 7825/3**

Beginning :

अस्य श्रीगायत्रीकवचस्तोत्रमन्त्रस्य- ब्रह्मविष्णुमहेश्वरा ऋषयः ; ऋग्यजुःसामथर्वाणि छन्दांसि ; प्राणशक्तिस्वरूपिणी गायत्री देवता ; ओं तत्सवितुरिति बीजम् ; भर्गो देवस्येति शक्तिः ; धीमहीति कीलकम् ; ·|· [illegible] जपे विनियोगः ॥

End:

नकारो गुल्फदेशे तु यकारः पायुकद्वयम् ।
इत्येतत्कवचं गुह्यं बाधाशतविनाशनम् ॥१३॥
चतुष्षष्टिकलाविद्याविलासैश्वर्यसिद्धिदम् ।
जपारम्भे तु हृदयं जपान्ते कवचं पठेत् ॥१४॥

Colophon :

इति श्रीवसिष्ठप्रोक्तं गायत्रीकवचस्तोत्रं सम्पूर्णम् ॥

122

Sl. No. 20879 गायत्रीकवचम् **Ms. No. SB. 1113/5**

(विश्वामित्रीयम्)

Beginning:

अस्य श्रीगायत्रीकवचस्तोत्रमहामन्त्रस्य– ब्रह्मविष्णुमहेश्वरा ऋषयः; ऋग्यजुःसामाथर्वणः छन्दांसिः; गायत्री सावित्री सरस्वती देवताः; गायत्रीप्रसादसिध्यर्थे निरतसानन्दब्रह्मलोकावाप्त्यर्थे जपे विनियोगः ॥

\+ + + + +

गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ॥

End :

चतुष्षष्टिकला विद्या परमैश्वर्यसिद्धिदा ।
जपारम्भे तु हृदयं जपान्ते कवचं पठेत् ॥
गोस्त्रीब्रह्मवधामित्रद्रोहाद्यखिलपातकैः ॥१५॥
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥

Colophon :

इति श्रीविश्वामित्रकृतगायत्रीकवचं समाप्तम् ॥

123

Sl. No. 20885 गायत्रीचक्रस्तवः Ms. No. B. 1117/8

(विष्णुयामलीयः– उमामहेश्वरसंवादरूपः)

Beginning:

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धपुष्पार्चितम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि हंसगं × मिमानपूर्वं गुरुम् ॥

कैलासशिखरासीनं शिवं पप्रच्छ पार्वती ।
गायत्र्याश्चक्रमाहात्म्यं मम ब्रूहि महेश्वर ॥

End :

शतं संवत्सरं नित्यं गयायां पिण्डदानतः ।
चक्रस्मरणमात्रेण मम सायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीविष्णुयामळे उमामहेश्वरसंवादे गायत्रीमहाचक्रस्तवं समाप्तम् ॥

124

Sl. No. 20886 गायत्रीपञ्जरम् (वसिष्ठसंहितान्तर्गतम्) Ms. No. P. 56/1

Beginning:

भगवन्तं देवदेवं ब्रह्माणं परमेष्ठिनम् ।
विधातारं विश्वसृजं प × × × × ॥
× × × × शिरोधमः ।
बद्धपिङ्गजटाजूटस्तटित्कनककुण्ड°ः ॥

End :

किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
यं यं काममभिध्यायेत तमाप्नोत्यसंशयः ॥

Colophon:

इति श्रीमद्वसिष्ठसंहितायां चतुर्विंशतिसहस्रिकायां वसिष्ठपराशरसंवादे सावित्रीपञ्जर-विभागयोगो नाम षष्ठोऽध्यायः ॥

125

Sl. No. 20890 गायत्रीपञ्जरम् (ब्रह्मतान्त्रिकान्तर्गतम्) Ms No. B. 352/3

Beginning :

अस्य श्रीगायत्रीपञ्जरस्य ब्रह्मविकृतिपरमहंस ऋषिः ; बीजादिविनियोगः ॥

अनामयं तत्सवितुर्वरेण्यं
भर्गो हि देवस्य शुभा हि धीमहि ।
स तं सतां क्लेशहरं हिताय
धियो हि यो नः सततं प्रचोदयात् । १॥

End :

कन्यार्थी चण्डिकागेहे कन्यकां प्राप्यते ध्रुवम् ।
श्रीकामो विष्णुगेहे च मुमुक्षुर्यत्र कुत्र चित् ॥
जपारम्भे च हृदयं जपान्ते पञ्जरं पठेत् ।
यं यं चिन्तयते कामं तन्तमाप्नोति निश्चितम् ॥

Colophon :

इति श्रीब्रह्मतान्त्रिके गायत्रीपञ्जरस्तोत्रं समाप्तम् ॥

126

Sl. No. 20895 गायत्रीभुजङ्गम् Ms. No. P. 5999/2

(विष्णुब्रह्मतान्त्रिकान्तर्गतम्-- नारदकृतम्)

Beginning :

उषः कालगम्यामुदात्तस्वरूपा-
मकारप्रतिष्ठासमुद्राङ्गभूषाम् ।

भजेशादिवन्द्यामजध्वाङ्गभाजां
मनोगम्यरूपां भजाम्यादिसन्ध्याम् ।।

End:

इतीदं भुजङ्गं पठेद्यस्तु भक्त्या
समाधाय चित्ते सदा श्रीभवानी ।
त्रिसन्ध्यास्वरूपां त्रिलोकैकवन्द्यां
स मुक्तो भवेत्सर्वपापैरजस्रम् ॥

Colophon :

इति श्रीब्रह्मतान्त्रिकीये नारदकृतगायत्रीभुजङ्गं समाप्तम् ॥

127

Sl. No. 20899 गायत्रीस्तवराजः **Ms. No. P. 8781/4**

(विश्वामित्रीयः)

Beginning :

अस्य श्रीगायत्रीस्तवराजस्तोत्रमहामन्त्रस्य– नूतनसृष्टिकर्ता विश्वामित्र ऋषिः ; गायत्री देवता ; नानाछंदांसि ; सकलजननीचतुष्पदा गायत्री परमात्मा देवता ; प्रथमपादो बीजम् ; सर्वोत्कृष्टं परं धाम द्वितीया ॥

End :

विश्वामित्रसमुध्दृतं हितकरं सर्वार्थसिद्धिप्रदं,
स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।
वेदानां विधिवादमन्त्रसकलं सिद्धिप्रदं शं सदा
संप्राप्नोत्यपरत्र सर्वसुखदं चायुष्यमारोग्यदम् ॥

Colophon :

इति श्रीविश्वामित्रकृतगायत्रीस्तवराजः समाप्तः ॥

128

Sl. No. 20901 गायत्रीस्तवराजः Ms. No. C. 797/4

(वसिष्ठसंहितान्तर्गतः)

Beginning:

अस्य श्रीगायत्रीस्तवराजस्तोत्रमहामन्त्रस्य- वेदव्यासः भगववान् ऋषिः ; गायत्री त्रिष्टुप् जगती छन्दांसि ; ब्रह्मविष्णुरुद्रसमेताः गायत्री-सावित्री-सरस्वत्यः देवताः ॥

End :

आदिक्षान्तसविन्दुयुक्तसहितं मेरुक्षकारात्मकं
व्यस्ताव्यस्तसमस्तवर्गसहितं पूर्णं शतष्टोत्तरम्
गायत्रीं त्रिपदा त्रिकालनियमां नित्यं सनेमित्तिकाम्
एतज्जाप्यफलं शिवेव कथितं सद्भोगमोक्षप्रदम् ॥

Colophon:

ओं तत्सदिति श्रीवसिष्ठसंहितायां गायत्रीस्तवराजस्तोत्रं समाप्तम् ॥

129

Sl. No. 20902 गायत्रीस्तोत्रम् Ms. No. P. 7512/3

Beginning :

× × चतुराननाक्षवलया कुम्भां (?) कलिशुकस्रुवौ
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका ।
हंसारोहणकेलिरम्भरमणीबिम्बां चिता भूषिता
सावित्री समुपस्थिता भवतु नासम्भरसमृद्धिः सदा ॥ १॥

End :

मध्याह्ना × × स × × सती भगवती पीताम्बराडम्बिका
व्या × × मः साम × × सा च विलसद्गात्रांचिता वैष्णवी

लाक्षा × मणिनूपुरांगरमणी ग्रैवेयहारोज्वला
सायाह्नीकसरस्वतीह रमणी नासम्पत्समृद्धिः सदा ॥३॥

Colophon :

\- .. -

130

Sl. No 20905 — गायत्रीहृदयम् — Ms. No. P. 863/11

अस्य श्रीगायत्रीहृदयस्तोत्रमहामन्त्रस्य प्रह्लादभगवान् ऋषिः ∴ ∴ ∴
ओं नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयम्भुवं परिपृच्छति— त्वं ब्रूहि ब्रह्मन् गायत्र्या उत्पत्तिं श्रोतुमिच्छामि— ब्रह्मज्ञानोत्पत्ति प्रकृतिं यरिपृच्छामि ॥

End:

अनेन गायत्रीहृदयेनाधीतेन क्रतुशतेनेष्टं भवति ; षष्टिर्या गायत्र्या दशसहस्राणि जप्तानि फलानि भवन्ति । अष्टौ ब्राह्मणान् सम्यक् ग्राहयेत् ।
य इदं नित्यमधीयानो ब्राह्मणः प्रयतश्शुचिः । सर्वपापैः प्रमुच्यते— इति ।

Colophon :

गायत्रीहृदयस्तोत्रं समाप्तम् ॥

131

Sl. No. 20923 — गायत्रीहृदयम् — Ms. No. P. 352/4

(ब्रह्मतान्त्रिकान्तर्गतम्)

Beginning:

अस्य श्रीगायत्रीहृदयस्तोत्रमहामन्त्रस्य— प्रह्लादो भगवान् ऋषिः ; अनुष्टुप् छन्दः ; परमात्मा देवता ; देवीगायत्रीप्रसादसिध्यर्थे जपे विनियोगः ॥

End:

रक्तश्वेतसुवर्णनीलवदनैः युक्तां त्रिनेत्रोज्वलां
रक्तां रक्तपटस्रजां मणिमयीयुक्तां कुमारीमिमाम् ।

गायत्रीं कमलासनां करतले छत्राब्जयुक्ताङ्गदां
शङ्खम् चक्रवराभयाब्जयुगलं हस्तैर्वहन्तीं भजे ।।

Colophon :

इति ब्रह्मतान्त्रिके गायत्रीहृदयस्तोत्रं समाप्तम् ।।

132

Sl. No. 20924 गायत्रीहृदयम् **Ms. No. SB 1113/3**

Beginning :

मातृभ्यो नमः ; पितृभ्यो नमः ; आचार्येभ्यो नमः ;

इत्येतन्मनसाभ्यर्च्यात्मानं विचिन्तयेत् ।
अथेदं सम्प्रवक्ष्यामि प्रणवन्यासमुत्तमम् ॥
व्याहृतीनां तथान्यासं गायत्र्याः शिरसा सह ।
अक्षराणां च गायत्र्याः पादानां न्यासमेव च ।।

End:

अष्टौ ब्राह्मणान् ग्राहयेदथ सिद्धिर्भवति ; इत्याह भगवान् ब्रह्मा । गायत्रीजपानन्तरं प्राणायामत्रयं कृत्वा अष्टमुद्राः प्रदर्श्योपस्थाय,

सुरभिर्ज्ञानचक्रं च योनिः कूर्मोऽथ पङ्कजम् ।
लिङ्गनिर्याणमुद्रा च जपान्तेष्वष्ट दर्शयेत् ।।

Colophon :

इति गायत्रीहृदयं समाप्तम् ॥

133

Sl. No. 20929 गुरुकवचम् (विश्वागमान्तर्गतम्) **Ms. No. P. 2670/4**

Beginning :

शिव उवाच—

कवचं गुरुनाथस्य वदामि शृणु पार्वति ।
कवचन्यासमात्रेण तुष्यन्ति गुरुपङ्क्तयः ।।१।।

गुरुनाथः शिवः पातु गुरुरूपो ललाटकम् ।
गुरुस्वामी भ्रुवोर्मध्यं भ्रूयुगं गुरुयोगिराट् ॥२॥

End :

पादौ मनो भवानन्दः सर्वांगं पातु वै गुरुः ।
एवं कवचमन्त्रेण कवचं विन्यसेत्प्रिये ॥
तस्यापदो विनश्यन्ति गुरुसान्निध्यमाप्नुयात् ॥९॥

Colophon:

इति विश्वागमे सर्वागमोत्तमे उमामहेश्वरसंवादे गुरुकवचं समाप्तम् ॥

134

N. 2093 गुरुकवचम् Ms. No. P 8765/12

(ब्रह्मकैवर्तान्तर्गतम्-- ब्रह्मप्रोक्तम्)

Beginning:

अस्य श्रीगुरुकवचस्तोत्रमन्त्रस्य– व्यासः ऋषिः ; अनुष्टुप् छन्दः ; श्रीगुरुर्देवता श्रीं बीजम् ; ह्रीं शक्तिः ; सौः कीलकम् ; गुप्रीत्यर्थे जपे विनियोगः ; ह्रामिति षडङ्गन्यासः । ध्यानम् + + +

बृहस्पतिः शिरो रक्षेन्मुखं रक्षेच्च वागधिः ।
कर्णौ पीताम्बरः पायान्नेत्रं मे पद्मलोचनः ॥

End :

पादौ मे पातु विश्वात्मा सर्वाङ्गं सर्वदा गुरुः ।
इत्येतत्कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः ॥
सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत् ।
सर्वत्र ूज्यो भवति वाक्पतेर्हि प्रसादतः ॥

Colophon :

इति श्रीब्रह्मप्रोक्तं गुरुकवचं समाप्तम् ॥

135

Sl· No· 20933 **गुरुकवचम्** Ms· No· C· 3780/23

(रुद्रयामलीया– परमहंसोपाख्यानान्तर्गतम्)

Beginning :

श्रीदेव्युवाच–

भगवन् सर्वधर्मज्ञ सर्वतन्त्रविशारद ।
कवचं श्रोतुमिच्छामि हंसस्य परमस्य च ॥
त्वत्प्रसादान्महादेव श्रुतानि विविधानि च ।
तन्मे कथय देवेश यदि स्नेहोस्ति मां प्रति ॥

End :

आत्मजेभ्योथ भक्तेभ्यो दत्वा मृत्युमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं सदा विजयवर्धनम् ॥
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
गोपनीयं प्रयत्नेन किमन्यत् श्रोतुमिच्छति ॥

Colophon :

इति श्रीरुद्रयामले उत्तरतन्त्रे परमहंसोपाख्याने उमामहेश्वरसंवादे श्रीगुरुकवचं समाप्तम् ॥

136

Sl. No. 20934 **गुरुकवचम्** Ms. No. G· 3780/24

(रुद्रयामलीयम्– उत्तरतन्त्रीयसारवान्तर्गतम्)

Beginning :

श्रीदेव्युवाच—

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥
देवेश परमेशान भक्तानुग्रहकारक ।
कुलधर्मरतानीशः सर्वेषां सिद्धिदायकम् ॥

End :

इत्येवं कवचं परात्परतरं दिवौघसिद्धौघवान्
मानौघाः क्रमशः तथा सरगता × × गुरौ संज्ञितान् ।
भक्त्यादेशिकमत्र रूपपठितं चिन्तांबुजे श्रीगुरुं
ध्यात्वा श्रीरचला कवित्वमपरं स्वान्ते च मुक्तिप्रदम् ॥

Colophon:

इति श्रीरुद्रयामले उत्तरतन्त्र आगमसारे विश्वसारोद्धारे उमामहेश्वरसंवादे श्रीसद्गुरु-परमहंसापरपरगुरुकवचं समाप्तम् ॥

137

Sl. No. 20936 गुरुकुसुमाञ्जलिस्तोत्रम् Ms. No. C. 3780/32

(रुद्रयामलीयम् -- उमामहेश्वसंवादरूपम्)

Beginning :

करुणाकल्लोलकलिना × × × कलितात्मने ।
सर्वानुग्रहरूपाय गुरवे कुसुमाञ्जलिः ॥

निजस्मृतिनमस्कारं निरस्तदुरहंकृतिः ।
कुलागमरहस्यानां गुरवे कुसुमाञ्जलिः ॥

End :

सच्चिदानन्दपादारविन्दभृङ्गाय योगिने ।
सच्चिदानन्दनाथाय गुरवे कुसुमाञ्जलिः ॥

तेजोमयं शुभं भाति × × × × ।
× × × × × ॥

सहस्रदलमध्यस्थं चन्द्रमण्डलकर्णिके ।
एतद्यन्त्रस्य संस्थाप्य जीवानां देहधारणम् ॥

Colophon :

इति श्रीरुद्रयामले तन्त्र उमामहेश्वरसंवादे श्रीगुरुकुसुमाञ्जलिस्तोत्रं समाप्तम् ॥

138

Sl. No. 20938 **गुरुध्यानस्तुतिः** Ms. No. B. 2670/8

Beginning :

श्रीदेव्युवाच–

सर्वज्ञ सर्वभूतेश चन्द्रशेखर धूर्जटे ।
स्वत्प्रसादात् गुरुध्यानं हृदयं कवचं शिवः ॥
वदामि (?) संग्रहेणाथ गुरुज्ञानार्थसिद्धये ॥

End:

शंखरूपसमच्छायं द्विरेखांचितकन्धरम् ॥१०॥
विशालवक्षसं निम्ननाभिं तिवलिसंयुतम् ।
इन्द्रचापध्वजसमं चतुर्भुजविराजितम् ॥११॥

Colophon :

– – – –

139

Sl. No. 20939 **गुरुन्यासस्तोत्रम्** Ms. No. C. 3780/33

(रुद्रयामलीयम्-- गौरीकल्पान्तर्गतम्)

Beginning :

पार्वती–

देवदेवं महादेवं सर्वज्ञं सकलेश्वरम् ।
तव प्रासादात् भो स्वामिन् मम हर्षविवर्धनम् ॥

देवदानवगन्दर्वासुराः सुरपन्नगाः ।
चराचरमनुष्याणां किं सिध्यन्ति महेश्वर ॥

End :

ईश्वर उवाच–

शृणु देवि पुरं तत्त्वं गुह्यानां गुह्यमुत्तमम् ।
दुर्लभं देवदेव्यानां सर्वशक्तिप्रदायकम् ॥

एवं न्यासं पठेन्नित्यं मुच्यते सर्वपातकैः ।
लभते सर्वसिद्धिस्स्यात्त्रैलोक्यं भुङ्क्ते श्रियम् ॥

Colophon :

इति श्रीरुद्रयामले वड्डामरतन्त्रे परमहंसरहस्ये गौरीकल्पे उमामहेश्वरसंवादे गुरुन्यासस्तोत्र समाप्तम् ॥

140

Sl. No. 20940 **गुरुपञ्चदशस्तोत्रम्** **Ms. No C. 3780/31**

(रुद्रयामलीयम् - उमामहेश्वरसंवादरूपम्)

Beginning :

पार्वती–

कृतार्थोस्मि महादेव मेरुमाश्रित्य सर्वशः ।
सुभगोस्मि कृतार्थोस्मि गुरुनाथं तमाश्रये ॥

हरणं भवरोगाणां शरणं सर्वसम्पदाम् ।
शरणं श्रीगुरोर्विश्वं भरणं शरणं व्रजे ॥

End :

गुरवे तं विजानीयान्नमस्कुर्यादभीष्टदम् ।
नमस्कारमिति प्रोक्तं नान्यथा परमार्थतः ॥

तिसन्ध्यं यः पठेद्भक्त्या स्तुती पञ्चदशी गुरोः ।
वर्धते सम्पदः तस्य कीर्तिरामहार्थदः (?) ॥

Colophon :

इति श्रीरुद्रयामलतन्त्रे उमामहेश्वरसंवादे गुरुपञ्चदशस्तोत्रं समाप्तम् ॥

141

Sl. No. 20941 गुरुपादुकास्तवः Ms. No. P. 8714/23

(वामकेश्वरतन्त्रान्तर्गतः)

Beginning :

ब्रह्मोवाच–

हेरम्बं क्षेत्रपालं च वागीशं बटुकं तथा ।
श्रीगुरुं नाथमानन्दभैरवं भैरवीप्रियम् ॥१॥

प्रणम्य सम्यङ्मार्गस्थानागमज्ञान् महागुरून् ।
प्रायश्चित्त प्रवक्ष्यामि सर्वकर्मावरोधतः ॥२॥

End :

इति श्रीपादुकास्तोत्रं प्रातरुत्थाय यः पठेत् ।
तस्य नश्यन्ति पापानि वह्निना तूलराशिवत् ॥२०॥

पठितव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः ।
भोगमोक्षार्थिभिर्यस्मात्सद्भिरागमपारगैः ॥२१॥

Colophon :

इति श्रीवामकेश्वरतन्त्रे गुरुपादुकास्तवं समाप्तम् ॥

142

Sl. No. 20942 गुरुपादुकास्तवः Ms. No. C. 3780/28

(कुलार्णवतन्त्रीयः)

Beginning :

ओं अस्य श्रीगुरुपादुकास्तोत्रमहामन्त्रस्य– दक्षिणामूर्ति ऋषिः ; पङ्क्तिः छन्दः ; श्रीगुरुपादुका देवता ; हं बीजम् ; सहस्रकमलवरई शक्तिः ; साहस्राक्षमालापरायां कीलकं जपे विनियोगः ॥

End :

पठितव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः ।
भोगमोक्षार्थिभिर्यस्मात् सन्धिरागमपारगैः ॥

इतीदं पादुकास्तोत्रं प्रातरुत्थाय यः पठेत् ।
मन्तव्य च प्रयत्नेन × × × ॥

Colophon :

इति श्रीकुलार्णवे शतसहस्रकोटिविस्तारे गुरुपादुकास्तोत्रं समाप्तम् ॥

143

Sl. No. 20944 गुरुस्तोत्रम् Ms. No. C. 461/74

(रुद्रयामळान्तर्गताम्)

Beginning :

यत्कटाक्षमहामेरुमहदाश्रित्य नित्यशः ।
सुभगोऽस्मि कृतार्थोऽस्मि गुरुनाथं समाश्रये ॥१॥

हरणं भवरोगाणां करणं सर्वसम्पदाम् ।
चरणं श्रीगुरोर्विश्वम्भरणं शरणं व्रजे ॥२॥

End :

शास्त्रदृष्टं गुरोर्वाक्यं तृतीयं आत्मनिश्चयम् ।
त्रिविधं यो विजानीयात् स मुक्तो जन्मबन्धनात् ॥२।

जानुभ्यामवनिं गत्वा पञ्चाङ्गं प्रणमेद्गुरुम् ।
स्वस्थाने सच्चिदानन्दस्वरूपं चिन्तयेद्बुधः ॥

Colophon :

इति श्रीरुद्रयामळे शिवपार्वतीसंवादे गुरुस्तोत्रं समाप्तम् ॥

144

Sl No. 20946 **गुरुहृदयम्** **Ms. No. P 2670/10**

(विश्वागमीयम्-- शिवपार्वतीसंवादरूपम्)

Beginning :

श्री शिव उवाच–

अतः परं प्रवक्ष्यामि हृदयं च विशेषतः ।
यस्य स्मरणमात्रेण पूर्णज्ञानी भवेन्नरः ॥

हृदयं गुरुनाथस्य वेदान्तोदितमम्बिके ।।

End :

गुरोः कटाक्षपूर्णस्य लक्ष्मीसान्निध्यमाप्नुयात् ।
अचञ्चला गुरोर्भक्तिर्भविष्यति न संशयः ॥

Colophon :

इति श्रीमद्विश्वागमे सर्वागमोत्तमे उमामहेश्वरसंवादे श्रीगुरुहृदयं समाप्तम् ॥

145

Sl. No. 20947 **गोदाष्टकम्** (ब्रह्माण्डीयम्ब्रह्मनारदसंवादात्मकम्) **Ms. No. C. 4687/2**

Beginning :

ब्रह्माद्रेर्मौलिजाता भवभय
शमनी गौतमस्याघहन्त्री ।
शक्राद्यैर्देवसंघैर्निशिशिनि
ममला (?) मस्तके न्यस्तमाना ॥

End:

स्नात्वाप्रत्यूषकाले पठति यदि नरश्चारु गोदाष्टकं यो
विद्वान् धीरो विलासी भवति स लभते सो गजाश्वादिरूपान् ।

पुत्रान् पौत्रांस्तु सुरूपान् पुरनपि च तथा कन्यकादीन् यथेष्टान्
कीर्तिं लब्ध्वा जगत्यां सपदि च लभते मोक्षमत्यन्तदिव्यम् ॥

Colophon :

इति ब्रह्माण्डपुराणान्तर्गतब्रह्मनारदसंवादे गोदाष्टकम् ॥

146

Sl. No. 20949 गोपालकृष्णस्तवराजः Ms. No. P 7526/19
(गौतमप्रोक्तः)

Beginning :

नवीननीरदश्यामं नीलेन्दीवलोचनम् ।
वल्लवीनन्दनं वन्दे कृष्णगोपालरूपिणम् ॥

स्फुरद्बर्हिदलोद्बद्धनीलकुञ्चितमूर्धजम् ।
कदम्बकुसुमोद्भासिवनमालाविराजितम् ॥

End :

प्रीतिसुस्निग्धया वाचा स्तूयमानं परात्परम् ।
य एवं चिन्तयन् देवं भक्त्या संस्तौति मानवः ॥

त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ॥

राजवल्लभतामेति भवेत्सर्वजनप्रियः ।
अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥

Colophon :

इति गौतमप्रोक्तः गोपालकृष्णस्तवराजः ॥

147

Sl. No. 20951 गोपिकागीतम् Ms. No. P. 10593/3

Beginning :

जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि ।
दयित दशयतां दिक्षु तावकाः
त्वयि धृतासवः त्वां विचिन्वते ॥

End:

यत्ते सुजातचरणांबुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥

Colophon:

इति श्रीमद्भागवते दशमस्कन्धे एकत्रिंशोध्यायः ॥

148

Sl. No. 20953 गोसावित्रीस्तोत्रम् Ms. No. P. 6866/31
(महाभारतानुशासनपर्वीयम्)

Beginning:

नारायणं नमस्कृत्य देवं त्रिभुवनेश्वरम् ।
गोसावित्रीं प्रवक्ष्यामि व्यासेन कथितं पुरा ॥

गवां स्तोत्रं प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
गोभिः स्वरः सर्ववेदाः सपदक्रमपदक्रमाः ॥

End :

सायं प्रातस्तु पठतः शान्तिः स्वस्ति यशो महत् ।
अहोरात्रकृतं पापं सद्य एव विनश्यति ॥

संवत्सरकृतैः पापैः पठ्यमानो न लिप्यते ।
फलं च गोसहस्रस्य इत्युक्तं ब्रह्मणा पुरा ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां अनुशासनपर्वणि गोसावित्रीस्तोत्रं समाप्तम् ॥

149

Sl. No. 20959 चण्डिकाकवचम् (मार्कण्डेयीयम्) Ms. No. P. 10330/2

Beginning:

अधरे चामृतकला जिह्वायां तु सरस्वती ।
दन्तान् रक्षतु कौमारी कण्ठं मे पातु चण्डिका ॥

घण्टिका च त्रिघण्टां च महामायाथ तालुके ।
कामाक्षी चुबुकं रक्षेद्वाचं वै सर्वमङ्गला ॥

End :

कवचं मातृवद्देव्याः कवचं पितवत्सदा ।
रक्षते सर्वदा सर्वान् सर्वस्मिन् दुर्घटेऽपि च ।

बन्धुवद्भाग्य नित्यं च मित्रवत्सुखदं तथा ।
सर्वपापक्षयकरं कवचं कामदं मुने ॥

Colophon :

इति मार्कण्डेयपुराणे चण्डिकाकवचं समाप्तम् ॥

150

Sl.No. 20960 चण्डिकाकीलकस्तोत्रम् Ms. No. C. 4679/15

Beginning :

ओं अस्य श्रीकीलकस्तोत्रमन्त्रस्य- विशुद्धज्ञानरुद्रेश्वर ऋषिः ; अनुष्टुप् छन्दः ; श्रीमहालक्ष्मीः देवता ; ऐं बीजम् ; ह्रीं शक्तिः ; क्लीं कीलकम् ; ममेष्टार्थसिध्यर्थे जपे विनियोगः ॥

End:

ऐश्वर्यं तत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सोऽपि किं जनैः ॥

सर्वेषां चैव देवानां विद्यानां च यशस्विनाम् ।
इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा । १४॥

Colophon :

-- -- -- --

151

Sl. No. 20961 चण्डिकावज्रपञ्जरस्तोत्रम् Ms. No. C. 4679/16

(मार्कण्डेयीयम्-कवचात्मकम्)

Beginning :

अस्य श्री चण्डिकादेव्यभेद्यवज्रपञ्जरकवचस्य ब्रह्मा ऋषिः ; अनुष्टुप् ; छन्दः श्री-महालक्ष्मीः देवता ; ऐं बीजम् ; ह्रीं शक्तिः ; क्लीं कीलकं ; ममेष्टार्थसिध्यर्थे जपे विनियोगः ॥

End:

इदं तु कवचं देव्या लिखितं पुस्तकं गृहे ।
यस्य तिष्ठति वै पूज्याः स सर्वभयवर्जितः ॥७१॥

प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥

Colophon:

इति श्री मार्कण्डेयपुराणे सूर्यसावर्णिके मन्वन्तरे श्रीदेवीमहात्म्ये श्रीदेवीकवचं समाप्तम् ॥

152

Sl. No. 20962 चण्डीकाहृदयम् **Ms. No. P. 4335/11**

Beginning :

अस्य श्रीचण्डिकाहृदयस्तोत्रमन्त्रस्य– मार्कण्डेयभगवानृषिः ; गायत्र्युष्णिगनुष्टुप् छंदांसि. श्रीमहाकाली-महालक्ष्मी-महासरस्वती-देवता ; धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिध्यर्थे जपे विनियोगः ॥

End :

इन्द्राद्यष्टौ लोकपाला भैरवाः स्समुदीरिताः ।
त्रयी पुनस्तथा काले त्रिभेशभैरवाः स्मृताः ॥

त्रिकपूजां ततः कुर्यात्सर्वसिद्धिप्रदायिकाम् ।
पूर्वोक्तमण्डले विप्रा मिथुनत्रयपूजनम् ॥
नानामांसाश– - - - - - ॥

Colophon :

– – – – –

153

Sl. No. 20963 चण्डिकाहृदयम् **Ms. No. P. 8737/4**

Beginning:

अथातः संप्रवक्ष्यामि विस्तरेण यथायथम् ।
चण्डिकाहृदयम् गुह्यं शृणुष्वैकाग्रमानसः ॥

End :

पठित्वा राजद्वारे श्मशाने शत्रुसङ्कटे।
भूताग्निमध्यस्थिते च सर्वकार्याणि साधयेत् ॥

Colophon :

इति चण्डिकाहृदयं समाप्तम् ॥

154

Sl. No. 20964 चण्डीस्तोत्रव्याख्या Ms. No. C. 2517/3
(मार्कण्डेयान्तर्गतसप्तशतीव्याख्या)

Beginning :

श्रीर्जयतु सामविधिब्राह्मणेऽथ यः कामयते पुनर्न प्रत्यानायेयमित्यपुनर्भवमधिकृत्य; तदनुसन्धेयो स्यान्मन्त्र उक्तः। रात्रिं प्रपद्ये पुनर्भूमयो भूं कन्यां शिखंडिनीं पाशहस्त युवतीं कुमारिणीमादित्यः श्रीचक्षुषे वान्तः ॥

End :

उत्तरचरित्रस्य शिव ऋषिः ; महासरस्वती देवता; छन्दोनुष्टुप्जगत्यो छन्दांसि; भामा शक्तिः भ्रामरी भीजम् ; सूर्यस्तत्त्वम् ; उच्चाटनादौ विशेषतो विनियोग इति। तत्तु कात्यायनीतन्त्रोक्ते मन्त्रविभागेन विरोधात् निर्मूल इति ध्येयम् ॥

Colophon :

इति श्रीमदुपाध्यायोपनामक शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते मार्कण्डेयपुराणांतर्गतसप्तशत्याख्यचण्डीस्तोत्रस्य व्याख्याने चण्डीस्तोत्रप्रयोगविधिः समाप्तः ॥

155

Sl. No. 20967 चन्द्रकवचम् Ms. No. C. 6601
(ब्रह्मवैवर्तान्तर्गतम्)

Beginning :

चन्द्रकवचस्तोत्रमहामन्त्रस्य- गौतम ऋषिः ; अनुष्टुप् छन्दः ; सोमो देवता ।
+ + ध्यानम्-

सोमं चतुर्भुजं वन्दे केयूरमकुटोज्वलम् ।
वासुदेवस्य नयनं शङ्करस्य च भूषणम् ॥

एवं ध्यात्वा जपेन्नित्यं चन्द्रस्य कवचं बुधाः ।
शशी पातु शिरोदेशं कण्ठं पातु × × × ॥

End :

एतच्च कवचं दिव्यं भुक्तिमुक्तिप्रदायकम् ।
यः पठेत् श्रुणुयाद्वापि सर्वत्र विजयी भवेत् ॥

Colophon :

इति श्रीब्रह्मवैवर्ते दक्षिणखण्डे चन्द्रकवचं सम्पूर्णम् ॥

156

Sl. No. 20971 — **चन्द्रकवचम्** (ब्रह्माण्डीयम्) — Ms. No C. 3481

Beginning :

अस्य श्रीचन्द्रकवचस्तोत्रमहामन्त्रस्य— गौतमः सोमो गायत्री । मूलमन्त्रेण न्यासः । ध्यानम्—

सोमं चतुर्भुजं देवं केयूरमकुटोज्वलम् ।
वासुदेवस्य नयनं शङ्करस्य च भूषणम् ॥

End :

एतद्धि कवचं पुण्यं भुक्तिमुक्तिफलप्रदम् ।
यः पठेत् शृणुयान्नित्यं तस्य सोमः प्रसीदतु ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे कवर्ते दक्षिणखण्डे चन्द्रकवचं समाप्तम् ॥

157

Sl. No. 20974 चन्द्रलाम्बाष्टकम् Ms. No. C. 4592/20

Beginning:

श्रीशङ्करः—

श्रीचन्द्रलाम्बे जगदम्बवन्द्य
पादाम्बुजद्वन्द्वमिदं नमामि।
तितीर्षुरेनं भवसागरं ते
द्रष्टुं समागत्य सुरेन्द्रपूज्याः ॥१॥

त्वदीयपादाब्जयुगं भजन्ते
संसारदुःखापनुदं मुनीन्द्राः।
ध्यायन्ति सर्गस्थितिसिद्धये तु
ब्रह्मारमानाथउमाधिनाथाः ॥२॥

End:

वेदान्तवेद्यैकसुखस्वरूपां
सच्चिद्घनां सत्वगुणोपन्नाम्।
भक्तान्समुद्धर्तुमुपात्तदेहां
श्रीचन्द्रलाम्बां शरणागतोस्मि ।'७॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्कृष्णानन्दसरस्वतीशिष्यनिजानन्दविरचितं श्री चन्द्रलाम्बाष्टकस्तोत्रं समाप्तम् ॥

Extra information:

अनवधानतया स्तोत्रमिदं काव्यं आर्षं सङ्कलितमिति ऊह्यते ।

158

Sl. No. 20978 | चन्द्रशेखराष्टकम् | Ms No. P 6966

Beginning :

रत्नसानुशरासनं रचिताद्रिशृङ्गनिकेतनम् ।
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ॥
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितं ।
चन्द्रशेखरमाश्रये मम किंकरिष्यति वै यमः ॥१॥

End :

अष्टकं य इदं पठन् वरमन्वहं शिवसन्निधौ
यो मृकुण्डुनुतं दिनम् शिवतुष्टिदं च पठेन्नरः ।
तस्य मृत्युभयं यमयातनं यमदर्शनं
नास्ति नास्ति दिलीपसन्ततिवृद्धिमेति न संशयः ॥

Colophon :

शङ्कराष्टकं समाप्तम् ॥

146

Sl. No. 20982 | चन्द्रस्तोत्रम् (ब्रह्माण्डपुराणीयम्) | Ms. No. P. 6600

Beginning :

× × चन्द्रस्तोत्रमहामन्त्रस्य– गौतम ऋषिः ; अनुष्टुप् छन्दः ; सोमो देवता ; + ·/· +

ध्यानम्–

श्वेताम्बरस्रगनुलेपनमल्लिगोत्र-
जादन्तशाश्वरथ(?)वाहनमोषधीशम् ।
बोधामृताभयगदं वरदं सुधांशु
श्रीवत्समौक्तिकधरं प्रणमामि चन्द्रम् ॥

End :

इति सौम्यमिदं स्तोत्रं यः पठेत्सततं नरः ।
सर्वापदो विमुच्येत नात्र कार्या विचारणा ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे चन्द्रस्तोत्रं समाप्तम् ॥

160

Sl. No. 20983 चतुर्विंशतिमूर्तिध्यानस्तुतिः Ms. No. P. 10755/2

Beginning:

अथ पूर्वं प्रवक्ष्यामि चतुर्विंशतिमूर्तिकम् ।
केशवं दक्षणाद्येनं वामं चैव धरायुधम् ॥ (?)

अभयं पद्महस्तं च दक्षिणं शंखमेव च ।
वामे चक्रं गदां चैव केशवस्य यथायुधम् ॥

End :

ताण्डवकृष्णध्यानम्–

आकुञ्चितं जानुकरं च वामेनैकेन .... दक्षिणहस्तपद्माम् ।
आलोकमत्तं नवनीतचोरं बालं मुकुन्दं स्मरामि ॥

मदनगोपालध्यानम्–

कोदण्डमिक्षुं सशरं च पुष्पं × × × ।
× × × × ॥

Colophon :

– – – –

161

Sl. No. 20984 चतुर्मूर्तिदर्शनस्तुतिः (आगमिका) Ms No. P. 9159/2

Beginning :

नारायणाय × × × गुणार्णवाय
विश्वोदयस्थितिलयो (?) तियतिप्रदाय ।
ज्ञानप्रदाय विबुधासुरसौख्यदाय
सत्कारणाय वितताय नमो नमस्ते ॥

End :

कोटयो ब्रह्महत्यानां अगम्यागमको वयः ।
ददत्यालोकमात्रेण विष्णोश्चारातिकं मुखम् ॥

+ + + + +

लक्ष्मीनाथगुरुं वन्दे लक्ष्मीपतिगुरुं तथा ।
लक्ष्मीनारायणगुरुं वन्दे रघुनाथगुरुं तथा ॥

Colophon :

– – –

162

Sl. No. 20985 चिदम्बरनटस्तुतिः Ms. No. P. 4153/78

Beginning :

सदञ्चितमुदञ्चितबिकुञ्चितपदं झलझलज्झलितमञ्चुकटकं
पतञ्जलिदृगञ्जनमनञ्जनमचञ्चलपदं जननभंजनरम् ।
कदम्बरुचिगम्बरवसम्परमम्बुधिकदम्बकविडम्बकं (?)
चिदम्बुधिमणिं बुधहृदम्बुजरविं परचिदम्बरनटं भुवि भज ॥१॥

End :

अखण्डविधुमण्डलमुखण्डमरुमण्डितकरं कनकमण्डपग्रहं
स्वगण्डतलकुण्डलितकुण्डलिपमण्डशतमण्डलपिचण्डमतुलम् ।

× × × × ×

शिखण्डशशिखण्डमणिखण्डनपदं परचिदम्बरनटं भुवि भज ॥८॥

Colophon :

-- -- --

163

Sl. No. 20990 जानकीकवचम् (अगस्त्यसंहितीयम्) Ms. No. C. 3721

Beginning :

अगस्त्य उवाच–

जानकीकवचं वक्ष्ये सर्वसम्पत्समृद्धिदम् ।
पुत्रप्रदं श्रीप्रदं च महदैश्वर्यदं शुभम् ॥
ऋषिस्तु नारदोऽनुष्टुप् छन्दो सा देवता भवेत् ॥

End:

यः पठेत्परया भक्त्या सर्वान्कामानवाप्नुयात् ।
अमले कमलाक्षवल्लभे त्वं करुणापूरितरंगितैरपांगैः ।

अवलोकय ममकिञ्चनानां प्रथमं पात्रमकिञ्चने दयालुः॥

Colophon :

इत्यगस्त्यसंहितायां परमहस्ये जानकीकवचं नाम चतुर्दशोऽध्यायः। जानकी कवचं समाप्तम् ॥

164

Sl. No. 20991 जितन्तास्तोत्रम् Ms. No. P. 1440/7

(प्रथमम्)

Beginning:

जिते ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह ।
परानन्द परब्रह्म नमस्ते परमात्मने ॥१॥

नमस्ते पीतवसन नमः कटकधारिणे ।
नमो नीलालकाबद्धवेणीसुन्दरविग्रह ॥२॥

End:

योगावसानसमये देवदेवस्य चक्रिणः ।
नित्यकिङ्करभावेन स्वात्मानं विनिवेदयेत् ॥

इति स्तोत्रेण देवेशं स्तुत्वा मधुनिघातिनम् ।
तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु ॥

Colophon :

-- -- -- --

165

Sl. No. 20992 जितन्तास्तोत्रम् Ms. No. P. 1440/8

(द्वितीयम्)

Beginning :

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥

विज्ञापनमिदं देव शृणुष्व पुरुषोत्तम ।
नरनारायणाभ्यां च श्वेतद्वीपनिवासिभिः ॥

End :

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्यात् जन्मजन्मान्तरेष्वपि ॥

उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥

Colophon :

– – – –

166

Sl No. 20993 जितन्तेस्तोत्रम् (तृतीयम्) Ms. No. P. 1440/9

Beginning :

जितंते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ॥

अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ।
महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ॥

End :

समन्यूनातिरिक्तानि बुद्धिपूर्वं तु यत् कृतम् ।
तत्सर्वं देव देव त्वं क्षन्तुमर्हसि मे प्रभो ॥

त्वमेव वेत्थ श्रेयो मे नेदमेतदितीति च ।
बुद्धियोगं च मे देहि येन त्वामुपयाम्यहम् ॥

Colophon :

– – –

167

Sl. No. 20994 जितन्तास्तोत्रम् Ms. No. P. 1440/10

(चतुर्थम्)

Beginning:

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ॥

अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ।
अच्युताय विकाराय तेजसां निधये नमः ॥

End:

भोगापवर्गफलदान् भुङ्क्ष्व भोगान् जगद्गुरो ।
सतामप्यसतां तेषां अस्तु ते परिपूर्णता ॥

ऐश्वर्येणोपचारेण विधानेन विशेषतः ।
भोगयानेन भगवन् प्रीयतां मे वरप्रद ॥

Colophon :

– – – –

168

Sl. No. 20003 जितन्तास्तीत्रम् (पञ्चमम्) Ms. No. P. 5627/23

Beginning;

जितं ते + + + + पूर्वज ।
नमस्ते वासुदेवाय + + नमस्तुभ्यं एकमूर्तये ॥

अनेकमूर्तये × × × × ×य नमः।
व्यापिने × × × × ×य नमः ॥

End :

इति विज्ञाप्य देवेशं वैश्वदेवस्व × य × सी ।।
कृताव × × वमहायज्ञानपि गुह्याच्चवात्मना ।।
पोष्यवर्गान् भोजयित्वा भुञ्जीत नियतस्स्वयम् ।।

Colophon :

इति पञ्चरात्रसंहितायां ब्रह्मनारदसंवादे जितान्तास्तोत्रे पञ्चमोऽध्यायः ।।

Extra informatio n :

अस्य पञ्चमजितन्तास्तोत्रस्य अन्ते– स्तोत्रपञ्चकानां आद्यन्तश्लोकाः सङ्गृहीताः इति दृश्यते ।।

169

Sl. No. 21010 जितन्तास्तोत्रव्याख्या (वैजयन्ती) **Ms. No. C. 2703/2**

Beginning :

श्रीजानिं भूमसद्मानं सुखात्मानमभीष्टदम् ।
वाणीशमुखगीर्वाणनुतं श्रीनृहरिं भजे ॥

विवृणोमि यथाबुद्धि जितं ते स्तोत्रमुत्तमम् ।
धीशुध्द्यै न हि निन्द्योऽस्मि नाम्ना बालः स्खलन्नपि ॥

End:

चतुर्मुखनुतं पूर्णगुणनिर्दोषमिष्टदम् ।
गुरुं तत्पत्पद्मसद्मानं भजे श्रीनृहरिं श्रिये ॥१॥

विलङ्घ्याब्धिं सतीचूडामणिं रामाय योऽदिशत् ।
ऐश्वर्य × × पासीनं मारुतिं ते प्रणौम्यहम् ॥

गुणपूर्णं दोषदूरं ज्ञेयगम्यं बुधैः सदा ।
अनन्ताचार्यहृत्पद्मसद्मानं नृहरिं श्रये ॥

जितं ते स्तोत्रवृत्तिं वैजयन्तीं समालिखत् ।
स्वकृतां बालनामेमां लक्ष्मीनृसिंहतुष्टये ॥

Colophon:

इति श्रीदेर्यनन्ताचार्यपूज्यपादाराधकेन तत्तनूजेन बालनाम्नीविरचितायां जितंतेस्तोत्रविवृतौ वैजयन्त्यां पञ्चमोऽध्याय: ॥

170

Sl No. 21012 ज्वरहरस्तोत्रम् Ms. No. P. 2914/14

(वैष्णवम्- समन्त्रकम्)

Beginning:

अष्टदलकर्णिकायां निषण्णम् .... ।

कुबेरं ते मुखं रौद्रं नन्दिमानन्दमावह ।
ज्वरं मृत्युं भयं घोरं ज्वरं नाशय मे ज्वर ।।

त्रीणि त्रीणिण्यष्टदलेषु ज्वर इति वदेत् । देव तस्य ज्वरं नाशयेति ॥

End :

श्रीभगवान् उवाच-

त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्वराद्भयम् ।
यो स्मरति संवादं तस्य त्वन्न भवेद्भयम् ।
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरज्वर: ॥

Colophon :

इति भागवते ज्वरहरस्तोत्रं समाप्तम् ॥

171

Sl. No. 21014 ज्वरहरस्तोत्रम् Ms. No. P. 5972/7

(वैष्णवम्)

Beginning :

विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ।
आविर्बभूव समरे पुरतश्शार्ङ्गिधन्विनः ॥

अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् । ।·
माहेश्वरस्समाक्रन्दत् वैष्णवेन बलार्दितः । +

ज्वर उवाच–

नमामि त्वानन्तशक्तिं परेशं
सर्वात्मानं केवलं ज्ञानमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥

End :
वैष्णवज्वर उवाच–

आद्यन्तशून्याः कवयः पुराणाः
सूक्ष्मा बृहन्तो ह्यनुशासितारः ।
सर्वज्वरान् घ्नन्तु ममानिरुद्ध-
प्रद्युम्नसङ्कर्षणवासुदेवाः ॥

Colophon :

ज्वरहरस्तोत्रं समाप्तम् ॥

172

Sl. No. 21015 ज्वरहरस्तोत्रम् Ms. No. P. 6002/2

(मान्त्रिकमृगणकोक्तम्)

Beginning:

अस्य श्रीज्वरहरस्तोत्रमन्त्रस्य— गणकऋषिः ; अनुष्टुप् छन्दः ; कुबेररुद्रो देवता ; आं बीजम् ; ह्रीं कीलकम् ; ज्वरादिसमस्तरोगनिवृत्यर्थे ज्वरहरस्तोत्रमन्त्रपठने जपे विनियोगः ॥

End :

लिखेदष्टदलं पद्मं अष्टबीजसमन्वितम् ।
एकपञ्चाशद्वर्णैश्च वृत्ताकारेणवेष्टयेत् ॥

धारयेत्सर्वकार्येषु योगिनीतन्त्रचोदितम् ।
वर्णादिदेवताः प्रोक्ताः इन्द्राक्षीनामपूर्विकाः ॥

Colophon:

– – – –

173

Sl. No. 21018 ज्वरहरस्त्रोत्रम् Ms. No. P. 9753/4

(वैष्णवम्)

Beginning :

विद्राविते-भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ।
आविर्बभूव समरे पुरतश्शार्ङ्गधन्वनः ॥

अथ नारायणो देवस्त दृष्ट्वा व्यसृजज्ज्वरम् ! + +
+ + + + भीतो माहेश्वरज्वरः ।

नमामि त्वानन्तशक्तिं परेशं

विश्वात्मानं केवलं ज्ञप्तिमात्रम् ।

विश्वोत्पत्तिस्थानसंहारहेतुं
यत्तद्ब्रह्म विज्ञं प्रशान्तम् ॥

End :

त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्वराद्भयम् ।
एतत्स्मरति संवादं तस्य ते न ज्वराद्भयम् ॥

इत्युक्त्वाच्युतमानम्य गतो माहेश्वरज्वरः ॥

Colophon :

-- -- -- --

174

Sl. No. 2102I धुण्डिगणेशस्तोत्रम् (स्कान्दीयम) Ms. No P 8806

Beginning :

श्रीकण्ठ उवाच–

जय विघ्नकृतामाद्य भक्तनिर्विघ्नकारक ।
अविघ्न विघ्नशमन महाविघ्नैकविघ्नकृत् ॥

जय सर्वगणाधीश जय सर्वगणाग्रणिन् ।
जगत्प्रणतपादाब्ज गणनातीतसद्गुण ॥

End :

जप्त्वा स्तोत्रमिदं पुण्यं क्वापि कार्ये गमिष्यतः ।
पुंसः पुरः समेष्यन्ति नियताः सर्वसिद्धयः ॥

Colophon :

इति श्रीस्कान्दे काशीखण्डे शङ्करेण कृतं धुण्डिगणेशस्तोत्रं समाप्तम् ॥

175

Sl. No. 21023 ताराष्टकम् Ms No. C. 2966/11

(नीलतन्त्रान्तर्गतम्)

Beginning:

मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे
प्रत्यालीढपदास्थिते जय हृदि स्मेराननाम्भोरुहे ।
फुल्लेन्दीवरलोचनत्रययुते कर्त्री कपालोत्पले
खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥

End:

लभते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत् ।
लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥
कीर्तिं कान्तिं च नैरुज्यं सर्वेषां प्रियतां व्रजेत् ।
विख्यातिं चापि लोकेषु प्राप्यान्ते मोक्षमाप्नुयात् ॥ १ ॥

Colophon :

इति श्रीनीलतन्त्रे ताराष्टकं समाप्तम् ॥

176

Sl. No. 21025 तुरजास्तोत्रम् Ms. No. C. 4687/8

(स्कान्दीयम्)

Beginning :

वासिष्ठ उवाच–

कदा रामेण देव्यास्तु संगमो भूसुरेश्वर ।
तत्सर्वं देवदेवेश ब्रूहि मे सुरपूजित ॥

शंकर उवाच–

त्रेतायुगे दाशरथी रामोऽभूद्रावणान्तकः ।
किंचिन्नित्य स्वीकृत्य (?) सीतया लक्ष्मणेन च ॥

End :

भुजाष्टकयुतां बाणचापशूलगदाधराम् ।
खड्गं शंखं तथा चक्रं वराभयधारिणीम् ॥

एवं कृत्वा त्वागमविधिं ध्यात्वा चैव यथाक्रमम् ।
पूजयामास रामो वै कुसुमैर्वनसम्भवैः ॥

Colophon :

इति स्कान्दपुराणे सह्याद्रिकाण्डे तुरजामाहात्म्ये शंकरवसिष्ठसंवादे पञ्चमोध्यायः ॥

177

Sl. No. 21028 तुलसीस्तोत्रम् Ms. No. P. 5395/2

(तुलसीकवचम्- ब्रह्माण्डान्तर्गतम्)

Beginning :

ऋषयः–

श्रुतं नः सूत सकलं संस्तवं मङ्गलात्मकम ।
तुलस्याः कवचं दिव्य वक्तुमर्हस्यशेषतः ॥

श्रीसूतः–

पुरा कृतयुगे विप्राः कैलासशिखरेऽमले ।
तारकस्य वधार्थाय चण्डवीर्यस्य शङ्करः ॥

End :

श्रीसूतः–

श्रुत्वेदं वचनमनन्यमनसो यद्देनस्य त्रिपुरहरस्य शक्तिहेतिः ।
तज्ज × × त्प्राक्षणमवधीच्च तारकाख्यं शत्रुं स त्रिदशपतिर्ययौ दिवंसः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे तुलसीकवचवर्णनं नाम त्रयोदशोऽध्यायः ॥

178

Sl. No. 21029 | तुलसीस्तोत्रम् (ब्रह्माण्डीयम्) | Ms. No. P. 5395/3

Beginning :

ईश्वर उवाच–

मङ्गलात्मकमन्त्रस्य ऋषिर्ब्रह्मात्र गीयते ।
छन्दोऽनुष्टुप् तथा तिस्रस्त्रिष्टुभोऽन्त्या उदाहृताः ॥

देवता तुलसी देवी मङ्गले विनियुज्यते ।
नमस्तुलसि कल्याणि नमो नित्यं मनोहरे ॥

End :

किमत्र बहुनोक्तेन नातः किञ्चन विद्यते ।
जपन् पठन् पाठयन्यो लिखन्नालापयन्नपि ॥
प्राप्नुयात्परमां मुक्तिं वासुदेवे सनातने ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे श्रीतुलसीमाहात्म्ये तुलसींस्तोत्रं नाम द्वादशोऽध्यायः ॥

179

Sl. No. 21030 | तुलसीस्तोत्रम् (स्कान्दीयम्) | Ms. No. P. 6600

Beginning :

अमृतस्योद्भवं दृष्ट्वा कृपया मोदतो हरेः ।
आनन्दजाश्रु संस्पृष्टकलशे न्यपतत्तदा ॥

तत्रोत्पन्ना तु तुलसी श्यामला हरिवल्लभा ।
तां दृष्ट्वा पुण्डरीकाक्षस्सर्वे × × दिवौकसाम् ॥

End:

न च गीतासमं लोके न चैव तुलसीसमम् ।
नाष्टाक्षरात्परो मन्त्रः न च नारायणात्परः ॥

एतत्सर्वं मयाख्यातं स्तोत्राणां पुण्यवर्धमम् ।
यः पठेत् शृणुयाद्वाऽपि तस्य विष्णोः परं पदम् ॥

Colophon :

इति श्रीस्कन्दपुराणे स्कन्दमहेश्वरसंवादे तुलसीमाहात्म्यं नाम षटपञ्चाशोऽध्यायः ॥

180

Sl No 21034 त्रिपुरसुन्दरीकवचम् **Ms. No. P. 3902/10**

Beginning :

श्रीदेव्युवाच–

भगवन् सर्वलोकेश सर्वलोकैकवन्दित ।
गुह्यात् गुह्यतमं तत्त्वं श्रोतुमिच्छामि तत्त्वतः ॥

ईश्वर उवाच–

शृणु देवि प्रवक्ष्यामि कवचं सुन्दरीप्रियम ।
रहस्यातिरहस्यं च गुह्यात् गुह्यतमं प्रिये ॥

End:

इदं तु कवचं देवि कथितं मन्त्रसूचकम् ।
सर्वार्थसाधकं देवि सर्वसम्पत्प्रदायकम् ॥

अष्टाम्यां च चतुर्दश्यां यः पठेत् प्रयतः सदा ।
प्रसन्ना सुन्दरी तस्य सर्वसौभाग्यदायिनी ॥

Colophon:

इति श्रीरुद्रयामले त्रिपुराकवचं समासम् ॥

181

Sl. No. 21035 त्रिपुरसुन्दरीकवचम् Ms. No. P. 4447/11

(रुद्रयामलीयम्– सौभाग्यकवचम् वा त्रैलोक्यमोहनकवचम् वा महात्रिपुरसुन्दरीकवचम् वा त्रिपुराकवचम्)

Beginning :

भगवन् देवदेवेश लोकानुग्रहकारक ।
यदुक्तं मे महादेव कवचं सुन्दरीप्रिय ॥
तन्मे कथय देवेश यदुक्तं प्रीतिपूर्वकम् ॥

ईश्वरः–

श्रुणु देवि प्रवक्ष्यामि कवचं मन्त्रविग्रहम् ।
सर्वार्थसाधकं देवि सर्वसम्पत्तिपूर्वकम् ॥

End :

अशुभन्तु भवेत्तस्य तस्य × × नेन गोपयेत् ।
×स्मै तत्पठते देवि लक्ष्मीः तस्य प्रजायते ॥
सप्तम्यां च चतुर्दश्यां यः पठेत् × × × सदा ।
प्रसन्ना सुन्दरी तस्य सर्वसम्पत्प्रदायिनी ॥

Colophon :

इति श्रीरुद्रयामले उमामहेश्वरसंवादे मन्त्रयन्त्रप्रकाशिकायां श्रीमत्त्रिपुरसुन्दरीकवचं समाप्तम् ॥

182

Sl. No. 21037 त्रिपुरसुन्रीकवचम् Ms. No. P. 4449/22

ब्रह्मरुद्रोभययामलीयम्- त्रैलोक्यमोहनकवचम् वा सौभाग्यकवचम्, महात्रिपुरसुन्दरीकवचम् वा त्रिपुराकवचम्)

Beginning :

अस्य श्रीत्रिपुरसुन्दरीकवचस्तोत्रमहामन्त्रस्य– दक्षिणामूर्तिऋषिः ; अनुष्टुप् छन्दः ; श्रीमहात्रिपुरसुन्दरी देवता ; ऐं बीजम् ; क्लीं शक्तिः ; सौः कीलकम् ; मम श्री-
. . . . . विनियोगः ॥

End:

यस्मै कस्मै न दातव्यं अप्रकाश्यं कदाचन ।
यः त्रिसन्ध्यं पठेद्धीमान् लक्ष्मीस्तस्य प्रसीदति ॥

अष्टम्यां च चतुर्दश्यां यः पठेत्प्रयतः सदा ।
प्रसन्ना सुन्दरी तस्य सर्वसम्पत्प्रदायिनी ॥

Colophon :

इति श्रीरुद्रयामले महात्रिपुरसुन्दरीकवचं समाप्तम् ॥

183

Sl No. 21039 त्रिपुरसुन्दरीकवचम् Ms. No. P.8106/20

(रुद्रयामलीयम्- त्रैलोक्यमोहनकवचम् वा सौभाग्यकवचम् वा महातिपुरसुन्दरीकपचम् व तिपुराकवचम्)

Beginning;

श्रीदेव्युवाच–

श्रीमत्त्रिपुरसुन्दरी या या विधिषु दुर्लभा ।
कृपया कथिता सर्वा श्रुता चाधिगता मया ॥

प्राणनाथाधुना ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथिना परा ॥

End :

इदं कवचमज्ञात्वा यो जपेत् सुन्दरीं पराम् ।
नवलक्षं प्रजप्यापि तस्य विद्या न सिध्यति ॥

स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ।
कवचं पठते यस्तु × × मनो भवेत् ॥

Colophon :

इति त्रिपुरसुन्दरीकवचं समाप्तम् ॥

184

Sl. No. 21040 त्रिपुरसुन्दरीकवचम् Ms. No. P.8278/6

(रुद्रयामलीयम्- त्रैलोक्यमोहनकवचम् वा सौभाग्यकमचम् सर्वार्थकवचं वा महात्रिपुरसुन्दरीकवचं वा त्रिपुराकवचम्)

Beginning:

देवदेव महादेव भक्तानां प्रीतिवर्धनम् ।
यत्सूचितं पुरा नाथ किमर्थं न प्रकाशितम् ॥

श्रीमत्त्रिपुरसुन्दर्या या विद्यास्तु त्वयोदिताः ।
कृपया कथितास्सर्वाः श्रुताश्चाधिगता मया ॥

प्राणनाथाधुना ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ॥

इदानीं श्रोतुमिच्छामि सर्वार्थकवचं स्फुटम् ॥

End:

भूवेश्मगत्रिमृतनागशक्र - - - -
दिगुगन(?)स्वनलकोणगविन्दुमध्ये ।
सिंहासनोपरि गतापरपीठमध्ये
प्रोत्तुङ्गपद्मनिलयां त्रिपुरां भजेऽहम् ॥

Colophon:

इति श्रीरुद्रयामळे उमामहेश्वरसंवादे त्रैलोक्यमोहनकवचं समाप्तम् ॥

185

Sl. No. 21046 त्रिपुरसुन्दरीकवचम् Ms. No. P. 4447/4

Beginning:

शुद्धस्फटिकसङ्काशं द्विनेत्रं करुणानिधिम् ।
वराभयकरं वन्दे श्रीगुरुं शिवरूपिणम् ॥

भक्ताज्ञानतमोभानुं मूर्ध्नि पङ्कजसं × तम् ।
सदाशिवमयं नित्यं श्रीगुरुं प्रणमाम्यहम् ।।

End :

दिव्यचन्दनलिप्ताङ्गः सदा विंशतिवार्षिकः ।
स भुङ्क्ते सकलान् भोगान् देवलोके नरः सदा ।।

तस्मादेतत्परं स्तोत्रं त्रिपुराहृदयं शुभम् ।।२२२०।।
जपेद्यः सततं भक्त्या भवेत्साक्षात् सदाशिवः ।।

Colophon :

इति श्रीत्रिपुरसुन्दरीहृदयस्तोत्रं समाप्तम् ।।

186

Sl. No. 21047 त्रिपुरसुन्दरीहृदयम् Ms. No. C. 1621/2

(रुद्रयामलीयशिवपार्वतीसंवादरूपम्)

Beginning :

पञ्चदशीहृदयम् —

शुद्धस्फटिकसङ्काशं द्विनेत्रं करुणानिधिम् ।
वराभयकरं वन्दे श्रीगुरुं शिवरूपिणम् ।।१।।

भक्ताज्ञानतमोभानुं मूर्ध्नि पङ्कजसंस्थितम् ।
सदाशिवमय नित्यं श्रीगुरुं प्रणमाम्यहम् ।।२।।

End:

दिव्यचन्दनलिप्ताङ्गस्सदा षोडशवार्षिकः ।
स भुङ्क्ते सकलान् भोगान् देवलोके नरस्सदा ।।

तस्मादेतत्परं स्तोत्रं त्रिपुराहृदयं शुभम् ।
जपेद्यः सततं भक्त्या जीवेत्साक्षात्सदाशिवः ॥

Colophon :

इति श्रीरुद्रयामले शिवपार्वतीसंवादे त्रिपुरसुन्दरीहृदयं निरूपितम् ॥

187

Sl. No. 21050 त्रिपुरापद्धतिस्तोत्रम् **Ms. No C.2326**

Beginning :

देशकालौ ·|· +श्रीदेवीतर्पणपूजामहं करिष्ये । शिवशक्त्यै नमः । आदौ शौचाचम्य (?) सन्ध्यास्नानम् यथाविधिसङ्कल्प्य, आसनं शरीरस्य । अन्तर्यामी ऋषिः । सत्वा (?) देवता प्रकृतिपुरुष छन्दः ; आसने विनियोगः ।

End :

वारुणी वैष्णवी देवी वैकुण्ठप्राप्तिकारिणी ।
त्रिविधूतापहरणी परमा मोक्षदायिनी ॥

पीत्वा नीत्वा पुनः पीत्वा पपातु घरणीतले ।
उपपन्नु (?) पुनः पीत्वा पुनर्जन्म न विद्यते ॥३०॥

Colophon :

इति श्रीत्रिपुरापद्धतिस्तोत्रं समाप्तम् ॥

188

Sl. No. 21051 त्रिपुरामहिम्नस्तोत्रम् (दूर्वासविरचितम्) **Ms. No. P. 2705**

Beginning :

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकेमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्वलम् ।

उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥

End :

सदसदनुग्रहमानी ग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां दूर्वासो जयति देशिकप्रथमः ॥

Colophon :

इति श्रीदूर्वासभगवच्चरणविरचितं त्रिपुरामहिम्नस्तोत्रं सम्पूर्णम् ॥

189

Sl. No. 21052 त्रिपुरारजस्वलास्तोत्रम् Ms. No. P. 4538/22

(रुद्रयामलीयम्)

Beginning :

रजस्वलामुखं दृष्ट्वा सर्वपापैः प्रमुच्यते ।
सम्भाषणं च कुरुते राजसूयादिकं फलम् ॥
तस्याश्च स्पर्शमात्रेण लभेन्मुक्तिं चतुर्विधम् ।
तस्य सङ्गममात्रेण त्रैलोक्य × स्पालनक्षणात् ॥

End :

महतामपि पापानां दृष्ट्वा वै निष्कृतिः पुरा ।
न दृष्ट्वा कुर्वतां पुंसां समायुक्तां शिवान्निति (?) ॥
एवं स्तोत्रं परं नित्यं सर्वसिद्धिकरं वरम् ।
सर्वान्कामानवाप्नोति मन्त्रसिद्धिस्तु जायते ॥

Colophon :

इति रुद्रयामले त्रिपुरारजस्वलास्तोत्रं समाप्तम् ॥

Extra information :

महावात्सल्य + + + वगला-
+ + + + हृदयात्मिकाम् ।

इति ग्रन्थान्ते दृश्यते ॥

190

Sl. No. 21053 त्रैलोक्यमङ्गलकवचम् (गौतमीतन्त्रीयम्) Ms. No. P. 3136/16

Beginning :

पुलस्त्यः–

भगवन् सर्वधर्मज्ञ कवचं यत्प्रकाशितम् ।
त्रैलोक्यमङ्गलं नाम कृपया कथय प्रभो ॥

श्रीसनत्कुमार उवाच–

शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतम् ॥

End :

त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत् ।
इदं कवचमज्ञात्वा भजेत्तु पुरुषोत्तमम् ॥
स लक्षं प्रजप्ताऽपि न मन्त्रः सिद्धिदायकः ॥

Colophon:

इति गौतमीयतन्त्र त्रैलोक्यमङ्गलकवचं नामाष्टादशोऽध्यायः ॥

191

Sl. No. 21054 त्रैलोक्यमङ्गलकवचम् (सनत्कुमारतन्त्रीयम्) Ms. No. P. 4245/7

Beginning:

अस्य श्रीत्रैलोक्यमङ्गलकवचस्तोत्रमन्त्रस्य– ब्रह्मा ऋषिः ; गायत्री छन्दः ; श्रीमन्नारायणो देवता धर्मार्थकाममोक्षार्थे जपे विनियोगः । + + + +

पुलस्त्य उवाच–

भगवन् सर्वधर्मज्ञ कवचं यत्प्रकाशितम् ।
त्रैलोक्यमङ्गलं नाम्न कृपया कथय प्रभो ॥

End:

कवचस्य प्रभावेन जीवन्मुक्तो भवेन्नरः ।
त्रैलोक्यं क्षोभयेदेव त्रैलोक्यविजयी भवेत् ॥

इदं कवचमज्ञात्वा भवेद्यः पुरुषोत्तमम् ।
शतलक्षप्रजप्तेऽपि न मन्त्रः सिद्धिदायकः ॥

Colophon :

इति सनत्कुमारतन्त्रे त्रैलोक्यमङ्गलकवचं समाप्तम् ॥

192

Sl.No. 21055 त्रैलोक्यमङ्गलकृष्णकवचम् Ms. No. P. 9644/16
(गौतमतन्त्रीयम्)

Beginning :

अस्य श्रीत्रैलोक्यमङ्गलकृष्णकवचस्तोत्रमहामन्त्रस्य– ब्रह्मा ऋषिः ; अनुष्टुप् छन्दः ; श्री-गोपालकृष्णो देवता ; क्लीं बीजम् ; ह्रीं शक्तिः ; स्वाहा कीलकम् ; श्रीगोपालकृष्ण-प्रसादसिध्यर्थे जपे विनियोगः ॥

End :

पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव पठेत्सह ।
दशवर्षसहस्राणां पूजायाः फलमश्नुते ॥

भूर्जे विलिख्यां×लिकां स्वर्णस्थां धारयेत्सुधीः ।
कण्ठे वा दक्षिणे बाहौ सोपि विष्णुर्न संशयः ॥

त्रैलोक्यं गोपयत्येव त्रैलोक्यविजयी भवेत् ॥

Colophon:

इति श्रीगौतमतन्त्रे त्रैलोक्यमङ्गलकृष्णकवचस्तोत्रं नाम अष्टादशोऽध्यायः ॥

193

Sl. No. 21058 त्रैलोक्यसंमोहनकवचम् Ms. No. P. 3136/15

(सम्मोहनतन्त्रोक्तम्)

Beginning:

अग्निबिन्दुरुवाच–

अथातस्संप्रवक्ष्यामि दिव्यमन्त्रौघपञ्जरम् ।
सर्वाभीष्टकरं सद्यः सर्वोपद्रवनाशनम् ।।
महर्षयस्सिद्धिमन्तः कृष्णद्वैपायनादयः ।।

End:

वश्याकर्षणसंस्तम्भमोहनोच्चाटनादिषु ।
सकृत्प्रयोगमात्रेण सिद्धिदो नात्र संशयः ।।
बहुना किमिहोक्तेन कवचं भुक्तिमुक्तिदम् ।।

Colophon:

इति संमोहनतन्त्रे परमरहस्ये त्रैलोक्यसंमोहनकवचं नाम नवमः पटलः ।।

194

Sl. No. 21059 दक्षिणामूर्तिकवचम् Ms. No. P. 114/5

(दिगम्बरनटनतन्त्रीयम्)

Beginning :

श्रीदेव्युवाच–

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
यन्न कस्यापि सम्प्रोक्तं गोपितं वर्णरूपकम् ।।

\+ + + + +

कवचं शुभदं भद्रे दक्षिणामूर्तिशर्मणः ।

End :

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
गोपनीयं प्रयत्नेन किमन्यच्छ्रोतुमिच्छसे ।।

Colophon :

इति दिगम्बरनटनतन्त्रे उमामहेश्वरसंवादे त्रैलोक्यजयदं नाम दक्षिणामूर्तिकवचं सम्पूर्णम् ।।

195

Sl. No. 21060 दक्षिणामूर्तिकवचम् Ms. No. P. 5946/19

(मेरुपद्धतीयम्)

Beginning :

वेदव्यास उवाच-

देवदेव जगन्नाथ विश्वमूर्ते विराकृत(?) रा ।।१।।
नमस्ते स्त्रतन्त्रत्रयीनाथ परमानन्ददायक (?) ।।
कवचं दक्षिणामूर्तेः कृपया वद मे प्रभो ।।

End :

अद्वन्द्वनेत्रममलेन्दुकलावतंसं
अंसावलम्बिरसमानजटाकलापम् ।
आनीलकण्ठमुपकण्ठमुनिप्रवीरान्
अद्यावियन्तमवलोकय लोकनाथम् ।।

Colophon :

इति मेरुपद्धत्यामीश्वरप्रोक्तं दक्षिणामूर्तिकवचं सम्पूर्णम् ।।

196

Sl. No. 21061 दक्षिणामूर्तिकवचम् Ms. No. P 10700/50

(ब्रह्मवैवर्तान्तर्गतम्)

Beginning:

ब्रह्मवैवर्तमहाखण्डे-

वटमूले महासत्रे ये महाऋषयः शौनकादयस्तं समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरंजीविनमुपसमेत्य पप्रच्छः--

केन तत्वं चिरं जीवसि केन वानन्दमनुभवसि ; इति परमरहस्यशिवतत्त्वज्ञानेनेति होवाच ।

End :

गद्यपद्यं तथा चाटु नाटकानि स्वय भुवि ।
निर्गच्छन्ति मुखाम्भोजात्स्वयमेव न संशयः ॥

त्रिसन्ध्यं जपतां पुंसां विशेषात्कवितामहम् ।।

Colophon :

इति श्रीचिदम्बरकल्पे दक्षिणमूर्तिकवच समाप्तम् ॥

197

Sl. No. 21063 दक्षणामूर्तिकवचम् Ms. No. C. 3424/11

(ब्रह्माण्डीयम्)

Beginning :

अस्य श्रीदक्षिणामूर्तिकवचमन्त्रस्य - × × ऋषिः ; अनुष्टुप् छन्दः ; श्रीदक्षिणामूर्ति सदाशिवपरमात्मा देवता ; ओं बीजम् स्वाहा शक्तिः ; - - - - जपे विनियोगः ॥

End :

जपेत्रिसन्ध्यया युक्ते सर्वशास्त्रार्थपारगः । + + +
प्रातःकाले शुचिर्भूत्वा × × नियतः पठेत् ॥
× × × सद्य एव न संशयः × × ।।

Colophon :

इति श्रीब्रह्माण्डपुराणे दक्षिणामूर्तिकवचं समाप्तम् ॥

198

Sl. No. 21064 दक्षिणामूर्तिकवचम् Ms. No. C. 4195/1

(रुद्रयामलीयम् अङ्गकवचम् - शिवपार्वतीसंवादरूपम्)

Bigenning :

पार्वत्युवाच—

देवदेव जगन्नाथ विश्वमूर्ते परात्पर ।
नमस्ते स्तोत्रकृन्नाथ परमानन्ददायक ।।

कवचं दक्षिणामूर्तेः कृपया वद मे प्रभो ॥

End :

ब्रह्मरन्ध्रभ्रुवो मेऽव्यात् ललाटे व्याप्तपञ्चमः ।
लक्ष्मीयुग्मेस्यकर्तृं त्वं तेन लभ्यते ॥

दक्षिणामूर्तिसायुज्यं तस्मिन्नेव न संशयः ॥

Colophon :

इति श्रीरुद्रयामळे उमामहेश्वरसंवादे श्रीदक्षिणामूर्त्यङ्गकवचं समाप्तम् ॥

199

Sl. No. 21066 दक्षिणामूर्तिकैवल्यध्यानस्तुतिः Ms. No. P. 10700/51

(चिदम्बरकल्पीयम्— शिवपार्वतीसंवादरूपम्)

Beginning :

वन्दे जटिनमीशानं वरदं ब्रह्मचारिणम् ।
दक्षिणामूर्तिमीशं च वेदशास्त्रार्थदं परम् ॥

ईश्वरो गुरुरत्नेति मूर्तिभेदाद्विभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

End :

सर्वरोगप्रशमनं सर्वदुःखनिवारणम् ।
शुद्धं शान्तं सदा नित्यं परब्रह्मपरं भवेत ॥

गो-भू-हिरण्य-धान्यादि पुत्रमित्रादिभिः शुभैः ।
इह लोके सुखं प्राप्य संसारादैः प्रमुच्यते ॥

Colophon :

इति श्रीचिदम्बरकल्पे उमामहेश्वरसंवादे दक्षिणमूर्तिकैवल्यध्यानं समाप्तम् ॥

200

Sl. No. 21067 दक्षिणामूर्तिपञ्जरम् Ms. No. P 114/2

Beginning:

प्रणम्य साम्बमीशानं शिरसा मणिको मुनिश ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

स्कान्दोवाच–

सम्यक्पृष्टं महाभाग + + + + +
पिता मे पञ्जरं तस्य सर्वविज्ञानदायकम् ।
उपादिशमहं तेन विज्ञानमगमं ध्रुवम ॥

End :

तस्मात्सर्वप्रयत्नेन मोक्षार्थी सर्वदा जपेत् ।
इमानावर्तयेन्नित्यं दक्षिणामूर्तिपञ्जरम् ॥
भसन्यापाण्डुराङ्गश्शशिशकलधरो ज्ञानमुद्राक्षमाला
× × × × ।
× × × × ×
× × अवतु नो दक्षिणामूर्तिरीशः ॥

Colophon :

Extra informatio n :

ग्रन्थेस्मिन् दक्षिणामूर्तिध्यानात्मिका नवरत्नमाला च अन्तर्गता ॥

201

Sl. No. 21068 दक्षिणामूर्तिपञ्जरम् (ब्रह्माण्डपुराणान्तर्गतम्) Ms. No. P.114/4

Beginning :

प्रणम्य साम्बमीशानं शिरसा वैणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

नारद उवाच–

भगवन् परमेशान + + + +

स्कन्द उवाच–

साधु पृष्टं महाभाग + +
पिता मे पञ्जरं सर्वं सर्वविज्ञानदायकम् ।
उपादिशमहं तेन विज्ञानमगमं ध्रुवम् ॥

End :

विलयं याति तत्वादौ नात्र कार्या विचारणा ।
तस्मात्सर्वप्रयत्नेन मोक्षार्थी सर्वदा जपेत् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे गुहनारदसंवादे दक्षिणामूर्तिपञ्जरं नामाष्टादशोध्यायः ॥

202

Sl. No. 21070 दक्षिणामूर्तिपञ्जरम् (स्कान्दीयम्) Ms. No. P. 4245/1

Beginning :

प्रणम्य साम्बमीशानं शिरसा वणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरा. ॥

भगवन् परमेशान सम्प्राप्ताखिलशास्त्रक ।
स्कन्दसेनापते स्वामिन् पार्वतीप्रियनन्दन ॥

यज्जापात्कविता विद्या शिवशक्तिश्च शाश्वती ॥

End:

जलमध्ये स्थिरो भूत्वा जपित्वा पञ्जरोत्तमम् ।
दक्षिणामूर्तिदेवस्य प्रसादात्पण्डितो भवेत् ॥

भक्तिश्रद्ध पुरस्कृत्य दक्षिणामूर्तिमव्ययम्
इममावर्तयोन्नित्यं दक्षिणामूर्तिमव्ययम् ॥

Colophon :

इति श्रीस्कन्दपुराणे स्कन्दनारदसंवादे दक्षिणामूर्तिपञ्जरं समाप्तम् ॥

203

Sl No. 21075 | दक्षिणामूर्तिपञ्जरम् | Ms. No. C.4195/3

(ब्रह्माण्डीयम् वज्रपञ्जरम् गुरुनारदसंवादरूपम्)

Beginning;

वटतरुतलवासबद्धतृष्णं मुनिनिकराय विवेकमादिशन् यः ।
पशुपतिनगराजकन्यकायै स्मर हृदयाशु वितीर्णवामभागम् ॥ + + +

प्रणम्य साम्बमीशानं शिरसा वैनिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

भगवन् सर्वलोकेश-

End :

तस्मात्सर्वप्रयत्नेन क्षेमार्थी सर्वथा पठेत् ।
इदमावर्तयेत् नित्यं दक्षिणामूर्तिपञ्जरम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे गुहनारदसंवादे श्रीदक्षिणामूर्तिवज्रपञ्जरं नाम अष्टादशोऽध्यायः ॥

204

Sl. No. 21076 दक्षिणामूर्तिब्रह्मास्त्रपीताम्बरीकवचम् Ms. No. P. 4538/9

Beginning :

अस्य श्रीबगलामुखीब्रह्मास्त्रकवचराजमहामन्त्रस्य— श्रीमान् दक्षिणामूर्तिः ऋषिः ; अनुष्टुप् छन्दः ; ब्रह्मास्त्रश्रीमहाविद्याबगलामुखी देवता ॥

End :

इदं कवचमज्ञात्वा यो जपेद्बगलामुखीम् ।
न च सिद्धिमवाप्नोति शीघ्रनो लोकपूजितः ॥

तस्मात्सर्वप्रयत्नेन कवचं ब्रह्मतेजसा ।
नित्यं हृदम्बुजे ध्यायन् महेशानीसमो भवेत् ॥

Colophon :

इति श्रीदक्षिणामूर्तिसहितब्रह्मास्त्रपीताम्बरीकवचं समाप्तम् ॥

205

Sl No. 21077 दक्षिणामूर्तिस्तवराजः Ms No. C. 564/2

(प्रपञ्चसारीयमन्त्रराजकल्पान्तर्गतः)

Beginning:

अथातस्सम्प्रवक्ष्यामि स्तवराजं भयापहम् ।
योगसाहस्रकोटीनां विपदां चापनुत्तये ॥

यो देवस्सर्वभूतेषु प्रच्छन्नत्वेन गूहितः ।
तस्मै नमस्यादिदेवाय दक्षिणामूर्तये नमः ॥

End:

तत्वज्ञानस्वरूपाय तत्वटीकायथो जयम् (?) ।
तत्वमस्यादिवेद्याय दक्षिणामूर्तये नमः ॥६०॥
मौनव्याख्याप्रकटितपरब्रह्मतत्वं ·। दक्षिणामूर्तिमीडे ।

Colophon :

इति श्रीदक्षिणामूर्तिमन्त्रराजकल्पे प्रपञ्चसारे दक्षिणामूर्तिस्तवराजः समाप्तः ॥

206

Sl. No. 21079 दक्षिणामूर्तिस्तोत्रम् Ms. No. C. 564/2

(दीपदक्षिणमूर्तिप्रशंसात्मकम्–काण्डशतकान्तर्गतम्)

Beginning :

जैमिनिरुवाच–

मार्कण्डेय महायोगिन् सकलागमवित्तम ।
किं तत्स्तोत्रं परं ब्रह्मन् केन प्रोक्तं पुरातनम् ॥

येन तुष्टो भवेद्देवो दक्षिणामूर्तिरीश्वरः ।
तत्स्तोत्रं वद मे शीघ्रं भक्तानामुपकारकम् ॥

End :

धर्मार्थकाममोक्षार्थाः साक्षात्तस्य करे स्थिताः ।
सोऽयं जनोऽष्टसिद्धीनां नायकः सर्वदा भवेत् ॥

इह भोगान्यथाकामान् भुक्त्वा देवैश्च दुर्लभान् ।
शिवसायुज्यमाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्रीमार्कण्डेयविरचिते काण्डशतके षड्विंशतिकाण्डे दीपदक्षिणामूर्तिप्रशंसाय दक्षिणामूर्तिस्तोत्रं नाम सप्तमः परिस्पन्दः ॥

207

Sl. No. 21081 दक्षिणामूर्तिस्तोत्रम् Ms. No. C. 564/1

(उपनिषद्रूपं)

Beginning :

नमस्कृत्य भगवान् नारदमुनिः ब्रह्माणं परिपृच्छति । भगवान् लोकेश नमस्करोमि धातारं त्वां शिरसा मनसा चेति । दक्षिणामूर्तिहृदयं श्रोतुमिच्छामि त्वन्मुखाम्बुजात् ॥

End :

य एतध्दृदयं ब्राह्मणो नित्यं धारयेद्वसिष्ठ समानो भवति ; अथ गुरोरन्तेवासी समो भवति ; गुरोस्सायुज्यमुपैति ; बन्धुभिस्सह वाक्यैकवाक्यार्थप्रयतो धारणाद्गुरोस्समीपे महीयते ; गुरोस्समीपे महीयते ॥

Colophon:

इति श्रीदक्षिणामूर्तिहृदयं समाप्तम् ॥

Extra insormation:

इदं च स्तोत्रं दक्षिणामूर्तेः उपनिषदिव आभाति ।

208

Sl. No. 21083 दत्तात्रेयकवचम् **Ms. No. P. 4584/24**

Beginning:

अस्य श्रीदत्तात्रयकवचस्तोत्रमन्त्रस्य— आङ्गिरस ऋषिः ; अनुष्टुप् छन्दः ; श्रीदत्ता त्रेयः परमात्मा देवता ; ॐ बीजम् स्वाहा शक्तिः ; आं कीलकम् ; मम दत्तात्रेयप्रसाद-- सिध्यर्थे जपे विनियोगः ॥

End :

लिखित्वा धारयेत्करे पठित्वा नियतः पुमान् ।
सर्वान् कामान् अवाप्नोति सर्वत्र विजयी भवेत् ॥

आदिमध्यान्तशून्याय दत्तात्रेयाय ते नमः ।
नादबिन्दुकलातीत दत्तात्रेयाय ते नमः ॥

Colophon :

इति दत्तात्रेयकवचं समाप्तम् ॥

209

Sl. No. 21085 दत्तात्रेयकवचम् Ms. No. P.843/12

Beginning:

ततः प्रसन्नो भगवान् दत्तात्रेयो महामुनिः ।
धृताक्षमालः प्रोवाच ब्रह्माणं कमलासनम् ॥

दत्तात्रेय उवाच–

दत्तात्रेयश्शिरः पातु ललाटं चात्रिनन्दनः ।
त्रिगुणात्मा दृशौ पातु श्रोत्रं पातु मुनीश्वरः ॥

End :

इति मे कवचं ब्रह्मन् सायंप्रातस्समाहितः ।
यः पठेत्परया भक्त्या परं काममवाप्नुयात् ॥

गृहाण नियतः शीघ्रं प्राञ्जलिस्त्वं जितेन्द्रियः ॥

Colophon :

– – – – –

210

Sl. No. 21086 दत्तात्रेयकवचम् Ms. No. P. 3474/31

(ब्रह्माण्डीयम्-- गुरुनारदसंवादरूपम्- -सपञ्जरम्)

Beginning:

ततः प्रसन्नो भगवान् दत्तात्रेयो महामुनिः ।
धृताक्षमालः प्रोवाच ब्रह्माणं कमलासनम् ॥

\+ + + + +

विरराम ततो ब्रह्मा दत्तात्रेयमुवाच ह । + +
स्वनामकवचं देहि मदात्मपरिरक्षकम् ॥

दत्तात्रेय उवाच- ÷ ÷

अस्य श्रीदत्तात्रेयमहामन्त्रस्य ब्रह्मा ऋषिः + दत्तात्रेयो देवता + ÷ ÷

दत्तात्रेयः शिरः पातु ललाटं चात्रिनन्दनः ।
त्रिगुणात्मा दृशौ पातु श्रोत्रे पातु मुनीश्वरः ॥

End:

सेवे त्वदीयचरणौ शरदम्बुजाभौ
मञ्जीवनामृतरसान्मधुरायमाणौ ।
वज्रध्वजाङ्कुशसुधाकलशालपत्र-
रेखाकृतावखिलभक्तजनोपभोग्यौ ॥२८॥

Colophon:

इति श्रीतत्वप्रदीपिकायां ब्रह्माण्डपुराणे उत्तरखण्डे भृगुनारदसंवादे दत्तात्रेयकवच-पञ्जरानुवर्णनं नाम द्वितीयोऽध्यायः ॥

211

Sl. No. 21087 दत्तात्रेयपञ्जरम् Ms. No. C. 843/13

(ब्रह्माण्डीयदत्ततत्त्वप्रदीपान्तर्गतम्)

Beginning:

ब्रह्मोवाच –

भगवन् कृतकृत्योस्मि कवचोद्देशवैभवात् ।
नानाकवचसङ्घेभ्यः परमात्रेयकावचम् ॥

÷ पञ्जरं चापि ते दद्यां तत् गृह्णीष्वेह सुव्रत ।
पादावत्रिसुतः पातु गुल्फौ पातु मनुप्रदः ॥

End :

सेवे त्वदीयचरणौ शरदम्बुजाभौ
मज्जीवनामृतरसात् मधुरायमाणौ ।
वज्रध्वजांकुशसुधाकलशातपत्र
रेखाकृतावखिलभक्तजयोपभोग्यौ ॥

Colophon :

इति श्रीतत्त्वप्रदीपिकायां ब्रह्माण्डपुराणे उत्तरखण्डे भृगुनारदसंवादे दत्तात्रेयपञ्जरानु-वर्णनं नाम द्वितीयोऽध्यायः ॥

212

Sl. No. 21089 दत्तात्रेयलघुकवचम् Ms. No. C. 3474/37
(ब्रह्माण्डीयम्-नारायणप्रोक्तम्)

Beginning :

ओम् अस्य श्रीदत्तात्रेयलघुकवचस्तोत्रमहामन्त्रस्य– नारायण ऋषिः ; + परमात्मा देवता

+ + + + +

दत्तात्रेयः शिरः पातु फालं मे मौनिशेखरः ।
योगीश्वरो दृशौ पातु × × लं कर्णप्रियः श्रुती ॥

End :

दत्तात्रेयमहामौनिकवचं यः पठेन्नरः । + +
खेचरत्वं तथा नृणां सर्वकामार्थसाधनम् ।
धारयेद्विलिखेन्नित्यं फलमेतन्न संशयः ॥२४॥

Colophon :

इति श्रीनारायणप्रोक्ते ब्रह्माण्डपुराणे उत्तरखण्डे दत्तात्रेयलघुकवचं समाप्तम् ॥

213

Sl. No. 21091 दत्तात्रेयवज्रकवचम् Ms No. P. 4580/30

(ब्रह्ममहेश्वरतन्त्रीयम्– उमाशिवसंवादरूपम् - दलादोक्तम्

Beginning :

अस्य श्रीदत्तात्रेयवज्रकवचस्तोत्रमन्त्रस्य– शबररूपी शङ्कर ऋषिः ; ।

दत्तत्रेयः समाख्यातः छन्दोऽनुष्टुप् प्रकीर्तितः ।
देवताप्यहमेवास्य ह्रां प्रां वीजमिति कीर्तितम् ॥

अथ कवचम्–

दत्तात्रेयः शिरः पातु सहस्राराब्जसंश्रितः ।
फालं पात्वनसूयायाः चन्द्रमण्डलमध्यगः ॥

End :

हिमवत्सुनहितं प्रोक्तं दलादेनात्रिसुतं पुरा ।
यः कोटिवज्रकवचं पठन्निह च भक्तिनः ॥
दत्तात्रेयो योगयुतश्चिरायुः पुण्यवान्नरः ॥

Colophon :

इति षड्डामरेश्वरतन्त्रे उमामहेश्वरसंवादे दत्तत्रेयवज्रकवचं नाम षष्ठमः पटलः ॥

214

Sl. No 21093 दत्तात्रेयवज्रकवचम् Ms. No. C. 3474/30

(दत्तात्रेयोक्तम्)

Beginning :

ओं ऋषय ऊचुः–

कथं सङ्कल्पसिद्धिस्स्यात् वेदव्यास कलौ युगे ।
धर्मार्थकाममोक्षाणां साधनं वदतामिति ॥१॥

श्रीव्यासः–

शृण्वन्तु ऋषयः + गौरीशृङ्गे + परमेश्वरं + प्राह पार्वती ॥४॥ देवदेव + +

इदानीं प्रष्टुमिच्छामि विशेषानि च भूतये ।
इत्युदीरितमाकर्ण्य + परमेश्वरः + प्रत्यभाषत ॥७॥

+ + + + +

ओं अस्य श्रीवज्रकवचस्तोत्रमन्त्रस्य वै ऋषिः ।
दत्तात्रेयः समाख्यातः छन्दोनुष्टुप् च कीर्तितम् ॥

+ + + + +

दत्तात्रेयः शिरः पातु सहस्राराजसंस्थितः ।
फालं पात्वानसूयेयः चन्द्रमण्डलमध्यगः ॥

End :

एवे शिवेन कथितं हिमवत्सुतायै
प्रोक्तं दलादमुनयोऽत्रिसुतेन पूर्वम् ।
यः कोऽपि वज्रकवचं पठतीह दत्ता-
त्रयः समश्चरति योगिवरस्थिरायुः ॥८१॥

Colophon :

इति दत्तात्रेयप्रोक्तं वज्रकवचं समाप्तम् ॥

215

Sl. No. 21094 दत्तात्रेयस्तवराजः वा गुरुस्तवराजः Ms. No. C 3474/35
(दत्तरहस्यीयम्-महादेवशुकसंवादरूपम्)

Beginning :

महादेवं महात्मानं देवदेवं महेश्वरम् ।
दत्तात्रेयस्तवं दिव्यं स्तोतुमिच्छाम्यहं प्रभो ॥

End:

अङ्गिरः कण्वपौलस्त्यभृगुकाश्यपजैमिनिः ।
गुरुस्तवमधीयानाः विजयी सर्वदा भवेत् ॥

\+ + ·।· ·।· ·।·

गुरुस्तवं न जानाति गुरु × × मन्मुखेन हि ।
पशुतुल्यो विजानीयात् सत्यं सत्यं महात्मने ॥

Colophon :

इति श्रीदत्तरहस्ये श्रीमहादेवशुकसंवादे दत्तात्रेयस्तवराजः समाप्तः ॥

216

Sl.No. 21095 दत्तात्रेयस्तुतिः Ms. No. C. 3474/2

(स्कान्दीयम्–नारदोक्तम्)

Beginning :

अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य ·।· श्रीदत्तात्रेयो देवता । ·।· ·।·

नारद उवाच–

अत्रिपुत्रोमहातेजा दत्तात्रेयो महामुनिः ।
तस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥१॥

End :

सप्तमं पञ्चमं जाप्यं श्रद्धाभक्तिसमन्वितम् ।
सर्वव्याधिविनिर्मुक्तो विष्णुलोके महीयते । ११॥

Colophon:

इति श्रीस्कान्दे पुराणे नारदप्रोक्तं दत्तात्रेयस्तोत्रं समाप्तम् ॥

217

Sl. No. 21096 दत्तात्रेयस्तोत्रम् Ms. No. P. 3474/27

(ब्रह्माण्डपुराणान्तर्गतम्)

Beginning :

स्कन्द उवाच–

नमस्तेऽत्रिकुमाराय दत्तात्रेयाय ते नमः ।
करुणापूर्णनेत्राय कमलाक्षाय ते नमः ॥१॥

End :

ओं नमो भगवते तुभ्यं ब्रह्मणे सुमहात्मने ।
नमस्तेऽनन्तरूपाय दत्तात्रेयाय ते नमः ॥१७॥

Colophon :

इति ब्रह्माण्डपुराणे दत्तात्रेयस्तोत्रं समाप्तम् ॥

218

Sl. No. 21097 दत्तात्रेयस्तुतिः Ms. No. P 423/64

(ब्रह्माण्डीया– अलर्ककृता)

Beginning :

श्रीदत्तात्रेय उवाच–

गच्छ गजेन्द्र भद्रं ते यथा ते कथितं मया ।
निर्ममो निरहङ्कारः तथाचर त्रिमुक्तये ॥१॥

सुमतिरुवाच–

इत्युक्तो मुनिपुत्रेण राजासौ प्रेमविह्वलः ॥
प्रणम्य बहुशो देवं कृताञ्जलिपुटस्स्थितः ॥१७॥

End:

एवमुक्तः प्रणम्यैनं आजगाम त्वरान्वितः ।
यत्र काशीपतिर्भ्राता सुबाहुस्तस्य चाग्रजः ॥१८॥

Colophon :

इति श्रीब्रह्माण्डपुराणे श्रीदत्तात्रेयमहात्म्ये अलर्ककृतं श्रीदत्तात्रेयस्तोत्रं समाप्तम् ।

219

Sl. No. 21098 दत्तात्रेयस्तुतिः Ms. No. C. 4592/10

(भविष्योत्तरपुराणीयम् –नारदोक्ता)

Beginning:

अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य– ब्रह्मविष्णुमहेश्वरा ऋषयः ; श्रीभगवान् दत्तात्रयो देवता ; अनुष्टुप् छन्दः ; + + + + सकलकामनासिध्यर्थं स्तोत्रजपे विनियोगः ॥

End :

दिनसप्तजपे नित्यं अत्रिपुत्रां महाभुजम ।
क्षिप्रबाधा प्रणश्यन्ति ग्रहरोगभयं हरेत् ॥११॥
नित्यं वै जपते यस्तु त्रिसन्ध्यं श्रद्धयान्वितः ।
भुक्तिमुक्तिफलं प्रोक्तं विष्णुलोकं स गच्छति ॥१२॥

Colophon:

इति श्रीभविष्योत्तरपुराणे नारदप्रोक्तं दत्तात्रयस्तोत्रं समाप्तम् ॥

220

Sl. No. 21099 दधिवासनस्तोत्रम् Ms. No. P. 5865/64

(पद्मपुराणीयम्)

Beginning :

हेम द्रिशिखराकारं शुद्धस्फटिकसन्निभम ।
पूर्ण चन्द्रविभुं देवं द्विभुजं वामनं स्मरेत् ॥
पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम् ।
ज्वलत्कालानलप्रख्यं तटित्कोटिसमप्रभम् ॥

End:

पीतं वस्त्रं दधानं मणिमयमकुटं हारकेयूरवन्तं नाना-
लङ्कारयुक्तं सपदटिकनि × तनुं वामनं नौमि दन्तम् ।
श्रीमन्दिरे मण्डलमध्यवमायावटुं वामनमर्चयन्तां -
दध्योदनं वा दधिशर्कराद्यैनिवेदयत्तस्यास्सदा विमुक्तय

Colophon :

इति श्रीपद्मपुराणे दधिवामनस्तोत्रं समाप्तम् ॥

221

Sl. No. 21102 दधिवामनस्तोत्रम्(वामनपुराणीयम्) Ms. No. P. 694/81

Beginning :

हेमाद्रिशिखराकारं शुद्धस्फटिकसन्निभम् ।
पूर्णचन्द्रनिभं देवं द्विभुजं वामनं स्मरेत् ॥

पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम् ।
ज्वलत्काला निलप्रख्यं तटित्कोटिसमप्रभम् ॥

End:

अजिनदण्डकमण्डुलुमेखला-
रुचिरपावनवाममूर्तये ।
मितजगत्रितयाय जितारपे
निगमवाकुपटत्रे वटवे नमः ॥

वामनो वुद्धिदाता च द्रव्यदो वामनस्सदा ।
वामनस्तारकोभाभ्यां वामनाय नमो नमः ॥

श्रीभूमिसहितं देवं सर्वाभरणभूषितम् ।
नमामि वामनं देवं भक्तिमुक्तिफलप्रदम् ॥

Colophon:

इति श्रीवामनपुराणे पातालखण्डे दधिवामनस्तोत्रं समाप्तम् ॥

222

Sl. No. 21104 **दशावतारलीलास्तोत्रम्** Ms. No. A. 754

(भविष्योत्तरीयम् - विष्णुलीलावतारस्तोत्रम्)

Beginning :

अस्मिन्नेकार्णवे लोके नष्टे स्थावरजङ्गमे ।
चन्द्रार्कपवने लुप्ते ज्योतिषि प्रलयं गते ॥२॥

नारदः परिपप्रच्छ भगवन्तं जनार्दनम् ।
केषु केषु च रूपेषु द्रष्टव्योऽसि महाप्रभो ॥२॥

End :

इदं जन्मरहस्यं मे यो नरः कीर्तयिष्यति ।
तस्याहं सुलभो नित्यं भविष्यामीप्सितप्रदः ॥७७॥

+ + + + +

यः पठेत्प्रातरुत्थाय मम जन्मानुकीर्तनम् ।
देवलोकमतिक्रम्य मोक्षसाम्राज्यमाप्नुयात् ॥७९॥

Colophon :

इति श्रीभविष्योत्तरपुराणे विष्णुनारदसंवादे श्रीविष्णुदशावतारादिलीलास्तोत्रं समाप्तम् ॥

Extra information :

ग्रन्थान्ते च पद्यद्वयं दृश्यते यथा:—

पूर्णश्रीशैलात्मशके रूपकन्यासुवत्सरे ।
रोज्याङ्गमासे भूपक्षे दिग्दिने पक्षवासरे ॥७०॥

श्रीचामुण्डाकृपापात्रश्रीकृष्णेन्द्रमहीभुजा ।
विष्णुलीलावताराढ्यस्तोत्रं जीयात्प्रकाशितम् ॥७१॥

223

Sl. No. 21106 दुर्गाकवचम् Ms. No. P. 8736/4

Beginning:

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

+ + + + +

जयावहमिदं पुण्यं पवित्रमभयप्रदम् ।
येभ्यश्च सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

End:

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोऽद्य मे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनी ।
निश्शेषीकृतचक्रवीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेम्बिके

Colophon:

इति दुर्गा कवचं समाप्तम् ।

224

No. 21110 दुर्गाकवचम् Ms. No. C. 3503/2

Beginning:

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥

End:

जया च विजया चैव जयन्ती चापरोजिता ।

अकालिका कर्मदेवी पृथिवी चैकनन्दिनी ॥

माहेशी चेति विज्ञेया नवदुर्गाः प्रकीर्तिताः ।
अस्यां सुवासिन्यां जयाख्यां दुर्गमावाहयामि ॥

Colophon :

— -- -- -- —

225

Sl. No 21111 **दुर्गाविजयः** **Ms. No. B. 576/34**

(स्कान्दीयः -काशीखण्डान्तर्गतः)

Beginning:

अथ स्कान्दे महापुराणे काशीखण्डे एकसप्ततितमाध्यायस्थदुर्गाविजयः आरभ्यते–
अगस्त्य उवाच–

कथं दुर्गेत्ति वै नाम देव्या जातमुमासुत ।
कथं च काश्यां सा × व्यासमाचक्ष्वेति मामिह १॥

End:

तत्क्षणादेव दैत्येन्द्रः पतित्वा पुनरुत्थितः ।
बभूव सहसा दृश्यो दीपो वातहतो यथा ॥९८॥

तावज्जगन्या ताः प्रेरिता निजशक्तयः ।
विचेरुर्दैत्यसैन्येषु संवर्ते मृत्युसैन्यवत् ॥१९॥

Colophon:

इति श्रीस्कान्दे महापुराणे काशीखण्डे दुर्गापराक्रमो नाम एकसप्ततितमोध्यायः॥

226

Sl. No. 21113 **दुर्गास्तोत्रम्** **Ms. No. P. 8759/4**

(हरिवंशीयम्-अनिरुद्धकृतम्)

Beginning:

वैशम्पायनः–

यदा बाणपुरे वीरः अनिरुद्धः सहोषया ।
सन्निरुद्धोऽसुरेन्द्रेण बाणेन बलिसूनुना ॥

तदा स कोटवीं देवीं रक्षार्थं शरणं गतः ।
यद्गीतमनिरुद्धेन देव्याः स्तोत्रमिदं नृप ॥

\+ \+ \+ \+ \+

चण्डी कात्यायनीं देवीं भार्गां लोकनमस्कृताम् ।
वशां तां कारयिष्यामि नामभिः सुरसंस्तुतैः ॥

End :

रुद्रप्रिये महाभागे भक्तानामार्तिनाशिनी ।
नमामि शिरसा देवीं बन्धनस्तो विमोहितः ॥

आर्यास्तवमिदं पुण्यं यः पठेत्सुसमाहितः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥
बन्धनस्थो विमुच्येत सत्यमेव भवेदिति ॥

Colophon :

इति हरिवंशे अनिरुद्धकृतदुर्गास्तवः ॥

227

Sl. No. 21120 **दुर्गास्तोत्रम्** **Ms. No. C.4663/17**

(काशीखण्डान्तर्गतम्)

Beginning:

देवा ऊचुः ॥

नमो देवि जगद्धात्रि जगत्त्रयमहारणे ।
महेश्वर महाशक्ते दैत्यद्रुमकुठारिके ॥१॥

त्रैलोक्यव्यापिनि शिवे शङ्खचक्रगदाधरि ॥

End :

रक्षां परिकरिष्यन्ति मद्भक्तानां ममाज्ञया ।
इति दत्वा वरान् देवी देवस्थान्तर्हिता तदा ॥
तेऽपि स्वर्गौकसः सर्वे हृष्टं स्वं स्वर्गं प्रमुदिता ॥२४॥

Colophon :

इति काशीखण्डे उत्तरार्धे दुर्गास्तोत्रं समाप्तम् ॥

228

Sl No. 21121 दुर्गास्तोत्रम् **Ms. No. C-4687/18**

(महाभारतीम् भीष्मकृतम्)

Beginning;

श्रीभगवान् उवाच-

शुचिर्भूत्वा महाबाहो संग्रामाभिमुखो स्थितः ।
पराजयाय शत्रूणां दुर्गास्तोत्रमुदीरय ॥

संजय उवाच-

एवमुक्तोऽर्जुनः संख्ये वासुदेवेन धीमता ।
अवतीर्य रथात्पार्थः स्तोत्रमाह कृतांजलिः ॥

End :

विदुरेणानुशिष्टश्च गान्धार्या च मया त्वया ।
दैवं हि बलवान् राजन् मा च शोके मनः कृथाः ॥
यत्र धर्मो धृतिः कान्तिः यत्र ह्रीः श्रीस्तथा मतिः ।
यतो धर्मस्तथा कृष्णे यतो कृष्णस्ततो जयः ॥

Colophon :

इति श्रीभीष्मविरचितं दुर्गास्तोत्रं समाप्तम् ॥

229

Sl. No. 21124 देवीकवचम् **Ms No. P. 312/15**

Beginning :

मार्कण्डेय उवाच–

यत् गुह्यं परमं लोके सर्वरक्षाकरं नृणां ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥

ब्रह्मोवाच--

अस्मि गुह्यतमं विप्र सर्वलोकोपकारकम् ।
देव्यास्तु कवचं पुण्य तत् श्रुणुष्व महामुने ॥

End:

जपेत् सप्तशत × × कृत्वा कवचपूर्वकम् ।
निर्विघ्नेन भवेत् सिद्धिः चण्डीजपसमुद्भव ॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।
तावत्तिष्ठति मेदिन्यां सततं पुत्रपौत्रकम् ॥
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
तत्पदं समवाप्नोति यावदा.... । (?)

Colophon :

— -- -

230

Sl. No. 21127 **देवीकवचस्तोत्रम्** **Ms. No. P. 2189/7**

(मान्त्रिकम्)

Beginning :

अस्य श्रीदेवीकवचस्तोत्रमन्त्रस्य-- मार्कण्डेय ऋषिः ; अनुष्टुप् छन्दः ; आर्ष महालक्ष्मीर्देवता ; श्रीमहालक्ष्मीप्रीतये जपे विनियोगः । मार्कण्डेय उवाच-

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥

ब्रह्मोवाच--

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तत् श्रुणुष्व महामुने ॥

End :

कौमारी हृदयं चैव वैष्णवीहृदयं तथा ।
कटिं गुह्य च वाराही ह्यैन्द्री स्यूरू तथैव च ॥
चामुण्डा जानुदेशं च पादौ रक्षतु चण्डिका ।
अङ्ग प्रत्यङ्गकं चैव सर्वं रक्षन्तु मातरः ॥

सदा रक्षन्तु मातरः ओं नमः ॥

Colophon:

इति देवीकवचं समाप्तम् ॥

231

Sl. No. 21128 **देवीकवचम्** **Ms. No. P.2350/16**

(हरिहरसंवादीयम्–विरञ्चिरचितम्)

Beginning :

ध्यायेत् पूर्णेन्दुवदनां आद्यां महिषमर्दिनीम् ।
चण्डिकाळीं जगद्धात्रीं ब्रह्माद्यमरवन्दिताम् ॥

प्रथमां शैलपुत्रीं च द्वितीयां ब्रह्मचारिणीम् ।
तृतीयां चण्डखण्डेति कूर्मण्डेति चतुर्थकम् ॥

End :

यावत् भूमण्डलं तिष्ठे सशैलवनकाननम् ।
यावत्तिष्ठति मेदिन्यां × पकत्वश्चसन्ततिः ॥

देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम् ।
तत्पदं समवाप्नोति यावदाभूतसंप्लवम् ॥

Colophon :

इति हरिहरसंवादे विरिञ्चिविरचिते देवीकवचं समाप्तम् ॥

232

Sl. No. 21129 देवीकवचम् (हरिहरकृतम्) Ms. No. P. 4524/8

Beginning :

अस्य श्रीसप्तशतिकादेवीकवचस्तोत्रमहामन्त्रस्य– मार्कण्डेय महाऋषिः ; अनुष्टुप् छन्दः ; श्रीमहालक्ष्मीमहाकालीमहासरस्वतीदेवता ; धर्मार्थकाम × × चतुर्विधफलपुरुषार्थ सिध्यर्थे जपे विनियोगः ॥

End:

प्राप्नोति पुरुषं नित्यं महामायानुभावतः ।
लळाटे परमं रूपं शिवेन समतां व्रजेत् ॥६०॥

देवीकला भवेत्तस्य त्रैलोक्येऽप्यपराजितः ।
जीवेद्वर्षशतं स्वग्रमपमृत्युविवर्जितः ॥
नश्यन्ति व्याधयः सर्वे भूतादिशरखेटकादयः ॥

Colophon :

इति हरिहरविरचितायां देव्याः कवचं समाप्तम् ॥

233

Sl. No. 21130 देवीकवचम् (वराहपुराणीयम्) Ms. No. P. 7052/5

Beginning :

अस्य श्रीदेवीकवचस्य ब्रह्मा ऋषिः ; अनुष्टुप् छन्दः ; दुर्गा देवता + + +

अर्गळं कीलकं चादौ पठित्वा कवचं पठेत् ।
पठेत्सप्तशतीं पश्चात् क्रम एवं शिवोदितः ॥

मार्कण्डेय उवाच–

जगद्वन्द्यो देवि चामुण्डे जय भूतापहारिणि ।
जय सर्वमहादेवि काळरात्रि नमोऽस्तु ते ।१॥

End:

तस्य तिष्ठति वै पूज्यः सर्वापदविवर्जितः ।
लभते परमं रूपं शिवेन सतत व्रजेत् ॥

Colophon :

इति श्रीवराहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचं समाप्तम् ॥

234

Sl. No. 21140 देवीकीलकम् Ms. No. P. 912/14

Beginning :

विशुद्ध ज्ञानदेवाय त्रिवेदी दिव्यचक्षुषे ।
श्रियः प्राप्तिनिमित्ताय नमः सोमार्धमौलिने (?) ॥

सर्वदेवाः पठेन्नित्यं मन्त्राणां वापि कीलकम् ।
× × पिक्षे × × मवाप्नोति सततं जप्यते नरः ॥

End :

ऐश्वर्यं तत्प्रसादेन सौभाग्यारोग्य सम्पादाः ।
रायुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥

Colophon :

इति देवीमहात्म्ये देवीकीलकस्तोत्रं समाप्तम् ॥

235

Sl. No. 21147 देवीकीलकम् Ms. No. C. 9944/58

Beginning :

श्रीकीलकस्तोत्रमन्त्रस्य- विष्णुदग्दात्रऋषिः ; अनुष्टुप् छन्दः ; क्लां बीजम् ; क्लीं शक्तिः ; क्लूं कीलकम् ; समस्तपापक्षयार्थे कीलकजपे विनियोगः ॥

End :

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदम् ।
शत्रुहानिपरो मोक्षं स्तूयते सा न किञ्जनैः ॥२६॥

Colophon :

इति श्रीकीलकस्तोत्रं समाप्तम् ॥

236

Sl. No. 21150 देवीकीलकम् Ms. No. C. 4315/3

(महादेवकृतम्–भगवतीकीलकम्)

Beginning :

ऋषिरुवाच—

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयः प्राप्तिनिमित्ताय नमस्सोमार्धधारिणे ॥१॥

सर्वविघ्नविनाशाय मन्त्राणामधिकीलकम् ॥
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परम् ॥२॥

End :

शनैस्तु जाप्यमानेऽस्मिन् स्तोस्त्रसंपत्तिरुच्चकः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः ।
शत्रुहानिः परो मोक्षः स्तूयतेसा न किं जनैः ॥

Colophon :

इति महादेवविरचितं भगवतीकीलकं समाप्तम् ॥

237

Sl. No. 21152 **देवीमहिम्नस्तोत्रम्** Ms. No. C. 4999/4

(त्रिपुरसुन्दरीमहिम्नस्तोत्रम्)

Beginning :

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमह-
त्सौन्दर्यार्णवमन्थनोद्भवसुधप्राचुर्यवर्योज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते स्फुरन्तु त्रिलोकनिलय ज्योतिर्मयं वाङ्मयम् ॥१॥

End :

दूर्वाससा महितदिव्यमुनीश्वरेण
विद्याः कला युवतिमन्मथमूर्तिनैतत् ।
स्तोत्रं विधाय रुचिरं त्रिपुराम्बिकायै
वेदागमोक्तपटलीविदितैकमूर्तिः ॥५३॥

सदसदनुग्रहनिग्रहगृहीवे
मुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां ....
दुर्वासा जयति देशिकप्रवरः ॥५४॥

Colophon :

इति त्रिपुरसुन्दरीमहिम्नस्तोत्रं समाप्तम् ॥

238

Sl. No. 21153 **देवीमहिम्नस्तोत्रम्** Ms. No. P. 7671/1

(त्रिपुरसुन्दरीमहिम्नस्तोत्रम्–वा दूर्वासमहिम्नम्)

Beginning:

× स्ताखिलकामपूरणचण [।] मप्रभावं महाजा-
ड्ये ध्वान्तनिवारणैकतरणिज्योतिर्विबोधप्रदम् ।

यद्वेदेषु च गीयते श्रुतिसुखं मात्रा त्रयीणामिति-
श्रीविद्ये तव सर्वराजवशकृत्तत्का....राजं भजे ॥

End :

सदस × × निग्रहा-
नुगृहीतमुनिविग्रहाभगवान् ।
सर्वासामुपनिषदां
दूर्वासो जयति देशिकः प्रथमः ॥

Colophon :

इति दूर्वासमहिम्नं समाप्तम् ॥

239

Sl. No. 21155 **देवीरहस्यत्रयस्तोत्रम्** **Ms. No. P. 8322/5**

(मार्कण्डेयान्तर्गतम्—मूर्तिरहस्यात्मकम्)

Beginning :

अस्य श्रीरहस्यत्रयस्य आद्यः पुमान् नारायण ऋषिः ; माद्भार्णोक्ता मुख्य देव्यः ; महालक्ष्म्यंशा ब्रह्मादिमिथुनानि बीजम् ; इन्द्राद्या देवताः शक्तयः ; पुमांस्तत्त्वम् ; श्री-चाणिकपरमेश्वरीप्रीत्यर्थं सर्वसिध्यर्थं रहस्यत्रयजपे विनियोगः । ओंनमश्चण्डिकायैनमः ॥ ब्रह्मोवाच—

भगवलतारा मे चण्डिकायास्त्वयोदिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥

End:

इति तेमूर्तयो देव्या व्याख्यात वसुधाधिप ।
जगन्मातुश्चणिकायाः कीर्तिताः कामधेननः ॥२१॥

इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ।
व्याख्यानं दिव्यमूर्तीनामधीष्वावहितः स्वयम् ॥२२॥

Colophon :

इति श्रीमार्कण्डेयपुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्य मूर्तिरहस्यं नाम षोडशोऽध्यायः ॥

240

Sl. No. 21157 देवीसप्तशतीस्तोत्रम् Ms. No. P. 2189/8

(देवीमहात्म्यम् - मार्कण्डेयपुराणीयम्)

Beginning :

अस्य श्रीसप्तशतीस्तोत्रमन्त्रस्य– मार्कण्डेयब्रह्मविष्णुरुद्रा ऋषयः ; नानाविधानि छन्दांसि मधुकैटभमर्दनि-महिषासुर-धूम्रलोचन-चण्डमुण्डरक्तबीज-शुम्भ-निशुम्भ-मर्दन्यो देवताः ; महाकालि महालक्ष्मी महासरस्व्यः- प्रधानदेवताः + +

तपस्यन्तं महात्मानं मार्कण्डेयं महामुनिम् ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥१॥

मार्कण्डेय उवाच–

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥२॥

End :

मार्कण्डेय उवाच–

इति दत्त्वा तयोर्देवी यथाभिलषितौ वरौ ।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

+ + + + +

चरितमिदमशेषं शृण्वतश्चण्डिकाया
भवति कलिविनाशः संश्रुते नित्यमुक्तम् ।
वरमपि वविले नित्ययुद्ध तदन्तात्
परिणतनितपीतौ विष्टितं वीतमाहः ॥

Colophon:

इति मार्कण्डेयपुराणे सूर्यसावर्णिकमन्वन्तरे देवीमहात्म्ये सुरथवैश्ययोः वरप्रदानं नाम त्रयोदशोऽध्यायः ॥

241

Sl No. 21163 **देवीसप्तशती** **Ms. No. P. 8812/2**

(चण्डिकाहृदयम् .वाग्देवी महात्म्यम्- रुद्रयामलीयम्)

Beginning:

अस्य श्रीचण्डिकाहृदयस्तोत्रमहामन्त्रस्य– मार्कण्डेयो भगवान् ऋषिः । गायत्र्यनुष्टुप् छन्दः ; श्रीमहाकालीमहालक्ष्मीमहासरस्वती देवता ; श्रीमहाकालीप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

इति वाक्यं समाकर्ण्य ब्रह्मविष्णुशिवोदितम् ।
फलस्तुतिमथोवाच स्तोत्रस्यास्य महामते ॥

Colophon :

इति श्रीरुद्रयामले देवीमहात्म्ये सप्तशतिकायां देवीसूक्तं नाम त्रयोदशोल्लासः ॥

242

Sl. No. 21168 **देवीसप्तशतीव्याख्या** **Ms. No. B. 657**

(देवीमाहात्म्यव्याख्या)

Beginning:

मार्कण्डेयेन क्रोष्टुकिं (?) भागुरिं प्रत्युक्त स्तोत्रं जमिनिं प्रति पक्षिरूपमुनिपुत्रै उक्तं मार्कण्डेयपुराणे तद्यथामति व्याचक्ष्महे– तत्रादौ व्याख्यास्यमानस्तोत्रे ·I· उक्तं विविच्य प्रदर्श्यते ॥

End :

अत्र निष्कदक्षिणायां दरिद्राणां चतुस्सुवर्णमितं रजतं रूप्यनिष्करूपदक्षिणाः समर्थानां चतुस्सुवर्णमिति हेमं सुवर्णमशीतिगुञ्जामितम् ॥

Colophon :

इति श्रीमार्कण्डेयपुराणान्तर्गतसप्तशात्याख्यचण्डीस्तोत्रव्याख्याने चण्डीस्तोत्रप्रयोगविधिः सम्पूर्णमस्तु ॥

243

Sl. No 21170 देवीसप्तशतीव्याख्या (गुप्तवती) Ms. No. C. 2270

Beginning :

श्रीरामं प्रति पुष्कराभिधमहायक्षेण वेदत्रय-
व्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे।
एतां धेनुमुपह्वयेस्मि (?) सुदुघामित्यूगतं (?) शङ्करा-
चार्यं शिष्यचतुष्टयेन सहितं वन्दे गुरूणांगुरुम् ॥

इति मार्कण्डेयपुराणाध्यायेषु निर्विंशतौ (?) गुप्तान् ।
अर्थान् प्रकटीकुरुते भास्कररायोऽग्निचित्कतिचित् ॥
मम तु मतिरचितवती गुप्तवती नाम बिभ्रति विवृतिम् ।

तत्रादौ वक्ष्यमाणार्थोनुक्रमणीश्लोकं चतुर्दशकं लिख्यते ॥

End:

सप्तमीमूर्तिमहातेज इति रहस्यत्रयस्याप्यध्ययनं विद्यते । व्याख्यानमिति । अवहितः अर्थावधानसहित इति सर्वं शिवम् । + + + +

गुरुरेव शिष्यो गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे ।
न गुरोरधिकं शिशोरस्मि गुरोर्मतिरस्तु
गुरौ जयनाथ गुरो ॥४॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्रस्वतन्त्रश्रीमद्गम्भीररायभारती-दीक्षितात्मजभास्कररायभारतीदीक्षितमहाग्निचिता रचिता गुप्तवतीसमाख्या सप्तशतीव्याख्या समाप्ता ॥

244

Sl. No. 21173 देवीसूक्तम् **Ms. No P. 6248**

(रुद्रयामलीयम्_पातन्त्र्यदेवीमहात्म्यान्तर्गतम्)

Bigenning :

अस्य श्रीदेवीसूक्तस्य वाद्याम्बर(?)ऋषिः ; आत्मा देवता त्रिष्टुप् छन्दः ; सप्तशतीशान्तिसिध्यर्थे जपे विनियोगः ॥

राजोवाच–

मुनेशप्फय(?) सर्वज्ञ भो यत्किंचिदनुत्तमम् ।
तत्त्वमेतस्य सर्वस्य येन सिद्धिरवाप्यते ॥

End:

मातस्सप्तशती स्तोत्र फलस्तुतिरिहोच्यते ।
यां समाकर्ण्यजानानां विश्वासो जायते भृशम् ॥

ऋषिरुवाच–

इति वाक्यं समाकर्ण्य ब्रह्मविष्णुशिवोदितम् ।
फलस्तुतिमथोवाच तत्रस्यास्य महामते ॥

Colophon :

इति श्रीरुद्रयामलेत्वरधं पातन्त्रदेवीमाहात्म्ये सप्तशति × × देवीसूक्तं नाम चतुर्दशोऽध्यायः ॥

245

Sl. No. 21174 देवीस्तोत्रम् **Ms. No. P. 326/2**

(ब्रह्माण्डीयम् ललितोपाख्यानातर्गतम्–)

Beginning :

जय देवि जगन्मातः जय देवि परात्परे ।
जय कल्याणनिलये जय कामकलात्मिके ॥

जय शङ्करवामाक्षि जय कामाक्षि नन्दिनि ।
जयाखिलसुराराध्ये जय कामेशकामदे ॥

End :

पुत्रमित्रकलत्राद्या भवन्ति मदनुग्रहात् ।
एवं लब्ध्वावरं देवा: देवेन्द्रोऽपिमहाबल: ॥

आमोदं परमं जग्मुस्तां विलोक्य मुहुर्मुहु: ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे ललितोपाख्याने इन्द्रादिकृतदेवीस्तुति: देवीवर-प्रदानं नाम त्रयोदशोऽध्याय: ॥

246

Sl. No. 21176 देवीहृदयम् Ms. No. P. 2350/15

Beginning :

अथात: सम्प्रवक्ष्यामि विस्तरेण यथातथम् ।
चण्डिकाहृदयं गुह्यं शृणुष्वेकाग्रमानस: ॥

अस्यश्रीचण्डिकाहृदयमन्त्रस्य-- ब्रह्मा ऋषि: ; गायत्री छन्द: ; चण्डिका-भद्रकाली-देवता ह्रां ह्रीं ह्रीं बीजानि । चण्डिका भद्रकाली + + देवता ॥

End:

स्मरेन्नित्यं प्रयत्नेन षण्मासापूज्यते पुमान्
महाभयापहरणं शत्रुक्षयकरं तथा ।
अचलां श्रियमाप्नोति सर्वव्याधिविनाशनम्
अन्ते स्वर्गं च मोक्षं च सत्यंसत्यं नसंशय: ॥

Colophon :

247

Sl. No. 21177 देव्यर्गलस्तोत्रम् (अर्गलस्तोत्रम्) Ms No P. 2350/15

Beginning :

अस्य श्रीअर्गलस्तोत्रमन्त्रस्य– स्वर्णाकर्षणभैरव ऋषि ; अनुष्टुप् छन्दः ; दुर्गाकणिका देवता । श्रां बीजम् ह्रीं शक्तिः । ह्रं कीलकम् । ममाभीष्टसिध्यर्थे जपे विनियोगः ॥

\+ + + + +

अर्गल कीलकं चादौ जपित्वा कवचं जपेत् ।
जपेत्सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥

\+ + + + +

जय त्वं देवि चामुण्डे जय भूतापहारिणी ।
जय सर्वगते देवि कालरात्रि नमोऽस्तुते ॥

End:

पुत्रं देहि धनं देहि सर्वकामांश्च देहि मे ।
अर्गलं पापजातस्य दारिद्र्यस्य तथार्गलम् ॥

इदमादौ पठित्वा तु पश्चच्छ्रीचण्डिकां पठेत् ॥

Colophon :

इत्यर्गलस्तोत्रं समाप्तम् ॥

248

Sl. No. 21181 देव्यर्गलस्तोत्रम् Ms. No. C. 7508/4

(मार्कण्डेयपुराणान्तर्गतम्–अर्गलस्तोत्रम्)

Beginning :

मार्कण्डेय उवाच–

अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।
जपेत्सप्तशतीं पश्चात्क्रम एष शिवोदितः ॥१॥

अर्गलं दुरितं हन्ति कीलकं फलदं तथा ।
रक्षा हि कवचं नित्यं चण्डिका त्रितयं दधत् ॥२॥

End :

इदं स्तोत्रं पठित्वा यो महास्तोत्रं पठेन्नरः ।
स तु सप्तशतं सङ्ख्या फलमाप्नोत्यसंशयः ॥३१॥

अर्गलं पापनाशस्स्यात् दरिद्र्यं हन्तिचार्गलम् ।
इदमादौ पठित्वा तु पश्चाच्छ्रीचण्डिका भवेत् ॥३२

Colophon:

इत्यर्गलस्तोत्रं समाप्तम् ॥

249

Sl. No. 2183 **देव्यर्गलस्तोत्रम्** **Ms. No. P.9944 57**

(अर्गलस्तोत्रम्)

Beginning :

अथान्यत्सम्प्रवक्ष्यामि अर्गळस्तोत्रमुत्तमम् ।
गुह्याद्गुह्यतरं भक्त्या चण्डिकायाः प्रभाकरम् ॥

आगलं कीलकं चादौ पठित्वा कवचं पठेत् ॥

End :

इदं स्तोत्रं पठित्वातो महास्तोत्रं पठेन्नरः ।
शतो(?) सप्तशतीसंख्या फलमाप्नोति नित्यशः ॥

Colophon :

इत्यर्गलस्तोत्रं समाप्तम् ॥

250

Sl. No. 21189 देव्यात्मकवचम् Ms. No. P. 8032/42

Beginning :

समस्तदुरितमुक्त्यर्थं सर्वसम्पदवाप्तये ।
भूतप्रेतपिशाचादिपीडाशान्तिसुखाप्तये ॥१॥

\+ \+ \+ \+ \+

शृणु तत्कवचं देवि वक्ष्येऽहं भवदात्मकम् ।
येनाहमाणि युद्धेषु देवासुरजया सदा ॥५॥

End :

पृष्ठस्थानस्थितो देव्या मां पुनातु गणेश्वरः ।
यश्चेदं पठति स्तोत्रं कदाचन शृणोति यः ॥३९॥
अचिरादेव नश्यन्ति तस्य सर्वेऽप्युपद्रवाः ।
तत्सुखं कवितारम्यं तत् गृहं कमलालयम् ॥४०॥
तद्देशः सर्वदा शुद्धो येनायं पठ्यते स्तवः ॥

Colophon :

\- -- -

251

Sl. No. 21190 द्वादशपञ्जरस्तोत्रम् Ms. No. P 1433/21

(केशवादिद्वादशपञ्जरस्तोत्रम्)

Beginning :

ब्राह्मे मुहूर्ते सम्प्राप्ते निद्रां हित्वा प्रसन्नधीः ।
हरिर्हरिर्हरिरिति व्याहरेद्वैष्णवः पुमान् ॥

End :

इन्द्रागोपकसङ्काशः पाशहस्तोऽपराजितः ।
सबाह्यभ्यन्तरं देहं व्याप्य दामोदः रस्थितः ॥
एवं सर्वत्र निश्छिद्रं नामद्वादशपञ्जरम् ।
प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदाचन ॥

Colophon :

इति द्वादशपञ्जरस्तोत्रं समाप्तम् ॥

252

Sl. No. 21192 द्वादशपञ्जरस्तोत्रम् Ms. No. P 9644/13

(केशादिद्वादशपञ्जरस्तोत्रम्)

Beginning :

पुरस्तत्केशवः पातु चक्री जा × बुनप्रभः ।
पश्चान्नारायण शंखो नीलजीमूतसन्निभः ॥
इन्दीवरदलश्यामो माधवोर्ध्वं गदाधरः ।
गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥

End:

इन्द्रकोपलसंकाशः पाशहस्तोऽपराजितः ।
सबाह्याभ्यन्तरं देवं व्याप्य दामोदरः स्थितः ॥
एवं सर्वत्रनि × × नामद्वादशपञ्जरम् ।
प्रहृष्टोऽहं न मे किंचित् भयमस्ति कदाचन ॥

भयं नास्ति कदाचनोत्नम इति ॥

Colophon :

253

Sl. No. 21196 **नटेशविद्य हृदयस्तोत्रम्** **Ms No. P. 8032/36**

(भरद्वाजसंहितीयम्चिन्तयामिमन्त्रस्तोत्रम्–तन्त्रमन्त्रस्तोत्रम्)

Beginning:

अथातः सम्प्रवक्ष्यामि मन्त्रवर्णान् समातृकात् ।
नटेशविद्याहृदयं नमस्स्तोत्रं जपेन्नरः ॥ १॥
सर्वपापविनिर्मुक्तः श्लोकैरेकपरायणः ।
\+ + + + +
चिन्तामणिमन्त्रमिदं सर्वसिद्धिकरं शिवम् ।
शिवपूजासमाप्तौ तु जपेत्स्तोत्रं परं मुने ॥
ओङ्कारमन्त्रसंवेद्य मोतप्रोतजगत्रयम् ।
चिन्तयामि महादेवं चिदम्बरसभानटम् ॥

End:

नटेशविद्याहृदयं य इमं पठति स्तवम् ।
चित्ते नृत्यति तस्येश चिदम्बरसभानटम् ॥५८॥

श्रीमदभ्रसभाविद्यास्तुतिमिष्टार्थदायिनीम् ।
महतीं दृष्टवान् स्वप्ने मातृकासिद्धदेशिकः ॥५९॥

श्वेतरक्तप्रभाभिन्नं शिवशक्त्यात्मकं परम् ।
वन्दे नाथपदद्वन्द्ववाङ्मनोतीतगोचरम ॥६०॥

Colophon:

इति श्रीभरद्वाजसंहितायामुत्तरखण्डे चिन्तामणिस्तोत्रकथनं नाम एकोनचत्वारिंशच्छतम पटलः

254

Sl. No. 21199 नदीस्तोत्रम् (नदीतारतम्यस्तोत्रम्) Ms. No. P. 9159/13

Beginning :

वन्दे देवेशमानन्दज्ञानदेहं रमापतिम् ।
ऋषीणां मनसा ध्येयं सर्वतीर्थनिवासिनम् ॥

श्रीसूतः–

गोदावर्यास्तटे शुभ्रे निमिराजो महामनाः ।
पप्रच्छ मुनिशार्दूलं वसिष्ठं ब्रह्मनन्दनम् ॥

End :

गोदावर्याश्च माहात्म्यं कृष्णवेण्यास्तथैव च ।
पिनाकिन्याश्च माहात्म्यं पप्रच्छ मुनिपुङ्गवम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे पिनाकिनीमाहात्म्ये नदीतारतम्यं समाप्तम् ॥

255

Sl. No. 21202 नदीस्तोत्रम् (ब्रह्माण्डीयम्) Ms. No. C. 2568/2c

Beginning :

नदीस्तोत्रं प्रवक्ष्यामि सर्वपापप्रणाशिनी ।
भागीरथी वारणासी यमुना च सरस्वती ॥

फल्गुनी शोणभद्रा च नर्मदा गण्डकी तथा ।
गयाप्रयागसरयू त्रिवेणीमणिकर्णिकाः ॥

End :

नारदीयमिदं स्तोत्रं नदीस्तोत्रमुदीरितम् ।
कोटिजन्मकृतं पापं पठनेन विनश्यति ॥

प्रातःकाले पठेन्नित्यं स्नानकाले विशेषतः ।
सायंकाले पठेन्नित्यं सर्वपापं प्रणश्यति ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे नदीस्तोत्रं समाप्तम् ॥

256

Sl No. 21205 **नवग्रहचक्रोद्धारः** **Ms. No. P. 10038/11**

(नवग्रहोद्धारः)

Beginning;

नवग्रहाभिध नस्युः नवरेखायथाक्रमम् ।
गुरुं चांगारकं चैव शुक्रचन्द्रं च गच्छति ॥

मन्दं च मण्डलं चव सूर्यं राहुं च गच्छति ।
बुधं केतुं च संगम्य शक्तिचक्रयथाक्रमम् ॥

End :

मन्दं गच्छति भानुश्च केतुर्गच्छति चन्द्रमाः ।
कुजं च मण्डलं चैव बुधो राहुं च गच्छति ॥
महासुन्दरचक्रस्य शिराचक्रो यथा × × ॥

Colophon :

– – – –

257

Sl. No. 21208 **नवग्रहस्तोत्रम्** **Ms. No. P. 5572/23**

(नवग्रहजपस्तोत्रम्)

Beginning :

नमः सूर्याय सोमाय मङ्गलाय बुधाय च ।
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ॥

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
तमोघ्नं सर्वपापघ्नं प्रणमामि दिवाकरम् ॥

End :

इदं व्यासमूलोद्भूतं ये पठन्ति समाहिताः ।
दिवा वा यदि रात्रौ वा तोषान्नार्तिर्भविष्यति ॥

+ + + + +

सर्ववश्यं जगत्पूज्यं सङ्ग्रामे जयवर्धनम् ।
सर्वकार्यं च सिद्धिञ्च गुरोर्वचनमब्रवीत् ॥

Colophon :

नवग्रहजपस्तोत्रं समाप्तम् ॥

258

Sl. No. 21211 **नवग्रहस्तोत्रम्** Ms. No. P. 5763 3
(हरिवंशीयम्-अनिरुद्धकृतम्)

Beginning:

अस्य श्रीनवग्रहस्तोत्रमन्त्रस्य । अश्वलायन ऋषिः + + + + ध्यानम्–

आदित्यं चन्द्रभौमौ बुधगुरुभृगुजं भानुजं राहुकेतू
नत्वा नित्यं त्रिसन्ध्यं जगदुदयस्थैर्यसम्पत्तिहेतून् ।
ज्योतिश्चक्रेऽश्रितारावुडुगणसहितान् मेषराशीन्
नतानासमूर्तेः खचरसुरवरान् भक्तिः प्रार्थयामः ॥

End:

आयुष्यविद्यां च यथासुखं च
धर्मार्थलाभं बहुपुत्रताञ्च ।
शत्रुक्षयं राजसुपूजितं च
स्थितानुग्रहास्सार्वकालं भजन्ति ॥

Colophon:

इति व्यासप्रोक्ते नवग्रहस्तोत्रं समाप्तम् ॥

259

Sl. No. 21212 नवग्रहस्तोत्रम् Ms. No. B. 5764/43

(व्यासोक्तमध्या नवग्रहात्मकम्)

Beginning:

व्यास उवाच–

पद्मोद्भवं वेदनिधिं पुराणं ब्रह्माणमीशं जगतः प्रणम्य ।
स्तोत्रं प्रवक्ष्ये प्रयतो ग्रहाणां एवं कृता तुष्टिकरा भवन्ति ॥
दिवाकरं दीप्तसहस्ररश्मिं तेजोमयं जगतः कर्मसाक्षिणं ।
अजं भानुं सूर्यमादिं ग्रहाणां रविं सदा शरणमहं प्रपद्ये ॥

End:

या ब्रह्मपुत्रा ग्रहभावेन युक्ता
ब्रह्मोद्भवा ब्रह्मविदां कुमारः ।
ब्रह्मोच्चैः हूयते जामदाग्निः
केतुं सदा शरणमहं प्रपद्ये ॥

Colophon:

इति नवग्रहध्यानं समाप्तम् ॥

260

Sl. No. 21213 नवग्रहस्तोत्रम् Ms. No. P 5865/70

(व्यासोक्तम् मन्त्रात्मकम्)

Beginning:

अस्य श्रीनवग्रहस्तोत्रमन्त्रस्य वेदव्यास ऋषिः ; अनुष्टुप् छन्दः ; नवग्रहो देवता ।
नवग्रहप्रीत्यर्थे जपे विनियोगः–

कैलास देवेशवर प्रसीद
हरस्य पुत्रं गणनायकम् तम् ।
सेव्यं सुराणां परमं पवित्रं
विनायकं शरणमहं प्रपद्ये ॥

End:

आयुष्यविद्यां च तथा सुखं च
धर्मार्थकामान् बहुपुत्रवांश्च ।
शत्रोर्भयं राजसुपूजितां च
स्तुत्वानुग्रहास्सार्वकालं भजन्ति ॥

Colophon :

इति व्यासप्रोक्ते नवग्रहस्तोत्रे समाप्तम् ॥

261

Sl. No 21225 नवग्रहस्तोत्रऋषिछन्दोदेवतानिरूपणम् **Ms. No. C. 4686/62**

Beginning :

ओं अस्य श्रीसूर्यकवचस्तोत्रमन्त्रस्य– गौतम ऋषिः ; अनुष्टुप् छन्दः ; सूर्यनारायणो देवता ; सूर्यप्रीत्यर्थे जपे विनियोगः ॥

ओं अस्य श्रीचन्द्रकवचस्तोत्रमन्त्रस्य– गौतम ऋषिः ; सोमो देवता ; अनुष्टुप् छन्दः ; सोमप्रीत्यर्थे जपे विनियोगः ॥

End :

ओं अस्य श्रीराहुकवचस्तोत्रमन्त्रस्य चन्द्र ऋषिः ; राहुर्देवता ; राहुप्रसादसिध्यर्थं जपे विनियोगः ॥

ओं अस्य श्रीकेतुकवचस्तोत्रमन्त्रस्य– प्रियंवद ऋषिः ; अनुष्टुप् छन्दः ; केतुर्देवता केतुजपे विनियोगः ॥

Colophon:

– – –

226

Sl. No. 21226 नागार्जुनकल्पस्तोत्रम् Ms. No. P. 8078/1

Beginning:

देवीं कुन्देन्दुगौराममृतकरकविस्तरकोटिरबन्धा-(?)
मुद्राबाधाक्षमालां वरकलशलसत्पुस्तुकाकान्तहस्ताम् ।
शुभ्रां कल्पां त्रिणेत्रां त्रिभुवननमितामक्षराधीनमूर्तिं
वन्दे वाग्देवतानां जगदुदयकरीं मातृकां विश्वयोगिन् ॥

End:

श्रीविद्याष्टकनागराजसहितं नागार्जुनं निर्मितं
साध्यासाध्यतरं सदा सुखकरं लावण्यलक्ष्मीकरम् ।
भेद्याभेद्यकरं सुवर्णनिखरं सौभाग्यसम्पत्करं
सा(?)दारिद्र्यहरं वरैरनुदिनं सन्मङ्गलं मङ्गलम् ॥

Colophon:

नागार्जुनकल्पस्तोत्रं समाप्तं मंगलमहा ॥

263

SlNo. 21228 नामसारस्तवः (सौभाग्यलक्ष्मीकल्पीयः) Ms. No. P. 1658/1

Beginning:

श्रीमद्वैकुण्ठनिलयं श्रीपतिं × सेवितम् ।
सनकादिमुनियोगिसेविताङ्घ्रिसरोरुहम् ॥
ब्रह्माद्यैर्देवतावृन्दैः पूजितं भक्तकामदम् ।
नारदादिसुरर्षीणां स्तवाकर्णनतत्परम् ॥

End:

बहुनोक्तेन किं लक्ष्मीनामसारस्यकीर्तनात् ।
प्रीयते श्यामळा नित्यं प्रीतामीष्टप्रदायिनी ॥

इति कथितं देवि नामसारस्तवं परम् ।
अनेन स्तव × × श्यामळाम्बां महेश्वरीम् ॥

Colophon :

इति सौभाग्यलक्ष्मीकल्पे चतुर्लक्षे कल्पे चतुर्लक्षग्रन्थविस्तारे नामसारस्तवो नाम दशमः पटलः ॥

264

Sl. No. 21230 — नारायणकवचम् — Ms. No. P. 5570/1

(भागवतीयम्)

Beginning :

श्रीनारायणकवचप्रारम्भः । राजा—

यथा गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥

भगवंस्तत्समाख्याहि वर्म नारायणात्मकम् ।
यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥

End:

य इदं शृणुयात्काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥

एतां विद्यामधिगतः विश्वरूपच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥

Colophon :

इति श्रीमद्भागवते महापुराणे षष्टस्कन्धे नारायणकवचं नाम अष्टमोऽध्यायः ॥

265

Sl. No. 21237 तारायणवज्रकवचम् (मन्त्रस्तोत्रम्) Ms. No. P. 863/17

Beginning :

अस्य श्रीनारायणवज्रकवचस्तोत्रमहामन्त्रस्य नारायणभगवान् ऋषिः +

नाराय यो नाम नरो नराणां × ×
× × × × तो×रकथितः × ×
अनेकजन्मा × × × पदव्यां
अनेक × × × पाप × हरस्य × मात्रयैव ॥

End :

चोरभयं नाशय नाशय ; जाग्रत्स्वप्नसुषुप्तिकाले इमं रक्ष रक्ष आपदुद्धरणाय सर्वत्र मां रक्ष रक्ष हुं फट् स्वाहा ॥

Colophon :

वज्रकवचं समाप्तम् ॥

266

Sl. No. 21262 नारायणहृदयम् Ms. No. B. 1263/2a
(सकर्णाटकटीकम्)

आचम्य प्राणानायम्य देशकालौ स्मृत्वा, मम अभीष्टसिध्यर्थं + + लक्ष्मीनारायणहृदयपारायणं करिष्ये । अस्य नारायणहृदयस्तोत्रमहामन्त्रस्य भार्गव ऋषिः ; + + श्रीलक्ष्मीनारायणो देवता । + + + ध्यानम्—

उद्यदादित्यसङ्काशं पीतवासं चतुर्भुजम् ।
शङ्खचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥
+ + + + +

स्तोत्रम्—

नारायणः परं ज्योतिरात्मा नारायणः परः ।

नारायणः परं ब्रह्म नारायण नमोऽस्तु ते ॥

प्रार्थनादशकं चैव मूलाष्टकमनः पुरा ।
यः पठेत् श्रुणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥

Colophon :

– – – –

267

Sl. No. 21268 **नारायणहृदयकर्णाटकटीका** **Ms. No. B.1263/2-B**
(समूला)

Beginning:

ध्यानम्–
ಇದರ ತಾತ್ಪರ್ಯ– ಉದಯಿಸುವ ಸೂರ್ಯನಿಗೆ ಸಮಾನವಾದ ಕಾಂತಿಯುಳ್ಳ, ಪೀತಾಂಬರವನ್ನು ಹೊಂದಿರುವನಾಗಿಯೂ ++ ಇರುವ ನಾರಾಯಣನನ್ನು ಧ್ಯಾನ ಮಾಡುತ್ತೇವೆ.

स्तोत्रम्– नारायणः परं ज्योतिः + + ಇದರ ತಾತ್ಪರ್ಯ–
ನಾರಾಯಣನು ಶ್ರೇಷ್ಠವಾದಂಥ ತೇಜೋರೂಪನು ನಾರಾಯಣನು ಶ್ರೇಷ್ಠನಾದ ಪರಮಾತ್ಮನು ನಾರಾಯಣನು ಶ್ರೇಷ್ಠನಾದ ಬ್ರಹ್ಮನು ನಾರಾಯಣನೆ! ನಿನಗೋಸ್ಕರ ನಮಸ್ಕಾರವು

End:

त्वमेव माता च + + + देव देव ॥ ಇದರ ತಾತ್ಪರ್ಯ–
ಎಲೈ ! ದೇವರಿಗೆಲ್ಲಾ ದೇವನಾದವನೆ ! ನನಗೆ ತಾಯಿಯು, ತಂದೆಯು, ನೆಂಟನು, ಸ್ನೇಹಿತರು ವಿದ್ಯವು, ಗುರುವು, ಎಲ್ಲವೂ ನೀನೇ ಆಗಿದ್ದೀಯೆ

Colophon:

– – –

268

Sl. No. 21270 **नृसिंहकरुणाकरस्तोत्रम्** **Ms. No. C. 461/20**
(नृसिंहपुराणीयम्)

Beginning :

याचेऽहं करुणासिन्धो यावज्जीवमिदं तव ।
अदैन्यं देहजाड्यं त्वत्पदाम्बुजसद्रतिम् ॥१॥

End :

प्रसीद मे श्रियः कान्त सुप्रसीद दयानिधे ।
पुनःपुनः प्रसीद त्वं प्रसीद वरदो भव ॥१५॥

Colophon :

इति श्रीनृसिंहपुराणे नृसिंहकरुणाकरस्तोत्रं समाप्तम् ॥

269

Sl. No. 21272 नृसिंहकवचम् (ब्रह्मप्रोक्तम्) **Ms. No. P. 1938/3**

Beginning;

अस्य श्रीलक्ष्मीनृसिंहकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः + + +

श्रीनारद उवाच–

कवचं नारसिंहस्य श्रोतुमिच्छामि दुर्लभम् ॥
\+ + + + +

ब्रह्मोवाच–

प्रणम्य शिरसा देवं नारसिंहं महामुने ॥

End :

य इदं शृणुयान्नित्यं पठेद्वा सुसमाहितः ।
विमुक्तः सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥
श्रीविष्णुलोकं गच्छत्योन्नम इति ॥

Colophon :

इति ब्रह्मप्रोक्तं नृसिंहकवचस्तोत्रं समाप्तम् ॥

270

Sl. No. 21279 नृसिंहकवचम् **Ms. No. P. 6806/9**

Beginning:

अस्य श्रीनृसिंहकवचस्तोत्रमहामन्त्रस्य प्रह्लादो भगवान् ऋषिः ; अनुष्टुप् छन्दः ;

सर्वव्यापीश्वरो देवता ; + + + सर्वार्थसिध्यर्थे जपे विनियोगः । + + + +

नमस्कृत्य गणाधीशं सर्वविघ्ननिवारणम् ।
नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा ॥

End :

माता नृसिंहश्च पिता नृसिंहो
भ्राता नृसिंहश्च सखा नृसिंहः ।
विद्या नृसिंहो द्रविणं नृसिंहो
स्वामी नृसिंहः सकलं नृसिंहः ॥

इतो नृसिंहः परतो नृसिंहो
यतो यतो याति नरो नृसिंहः ।
नृसिंहदेवादधिक न किञ्चित्
तन्नो नृसिंहं शरणं प्रपद्ये ॥

Colophon :

इति नृसिंहकवचस्तोत्रं समाप्तम् ॥

271

Sl. No. 21284 नृसिंहकवचम् Ms. No. P. 9797/5

(नृसिंहपुराणीयम्)

Beginning:

नमस्कृत्य गणाधीशं सर्वविघ्ननिवारणम् ।
नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा ॥
सर्वरक्षाकरं नृणां सर्वोपद्रवनाशनम् ।
सर्वसम्पत्प्रदं चैव स्वर्गमोक्षप्रदायकम् ॥

End:

नृसिंहकवचं स्तोत्र पठति
तस्य वक्ष्यति सर्वजनौघाः ।
तस्य पारादावशगाः सर्वार्थाः
तस्य पादवशगा जगत्सङ्घाः ॥

Colophon :

इति श्रीनृसिंहपुराणे नृसिंहकवचस्तोत्रं समाप्तम् ॥

272

Sl. No. 21292 नृसिंहकवचम् वा लक्ष्मीनृसिंहकवचस्तोत्रम् Ms. No. C. 4292/4

(प्रह्लादचरितम् ब्रह्माण्डान्तर्गतम्)

Beginning :

अस्य श्रीलक्ष्मीनृसिंहकवचस्तोत्रमन्त्रस्य- प्रह्लाद ऋषिः ; + + लक्ष्मीनृसिंहो देवता । + + +

ओम् ।

नमस्कृत्य गणाधीशं सर्वविघ्ननिवारणम् ।
नसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा ॥१॥

+ + + + +

ओम् ।

नृसिंहो मे शिरः पातु लोकरक्षार्थसम्भवः ।
सर्वव्यापी सम्भवासः फालं मे रक्षताद्धरी ॥

End :

इदं नृसिंहकवचं प्रह्लादमुखनिर्गतम् ।
भक्तिमान्यः पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥

+ + + + +

तप्तहाटककेशान्तज्वलत्पावकलोचन ।
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे प्रह्लादविरचितं श्रीलक्ष्मीनृसिंहकवचं समाप्तम् ॥

273

Sl. No. 21296 नृसिह्मगद्यम् Ms. No. P. 9338/8

Beginning :

अभ्रादभ्रंभ्यदभ्रेरिडभिरिभततेकाकुमीर्म्युराभ्यः
अभ्यासे दुर्विनेदुर्दनुजयवतयः त्रस्तनिर्भिन्नगर्भाः ।
घूर्णक्ष्माभृत्समुद्रो समभव × × × ×
× × नरहरेः स्तम्भसंभेदमुद्रा ॥१॥

End :

सुसाधामुनीन्द्रैस्स वैधात्रपुत्रैः स्सवेधाखिनेत्रः पुरोधा बुधानां स्वमेधाविशेषेऽपि ॥

Colophon:

– – –

274

Sl. No. 21297 नृसिह्मनुतिस्तुतिः Ms No. P. 10706/21

Beginning:

वृत्तोत्फुल्लविशालाक्षं विपक्षक्षयदीक्षितम् ।
निनादत्रस्तविश्वाण्डं विष्णुमुग्रं नमाम्यहम् ॥

सर्वैरवध्यतां प्राप्तं सबलं यं दितेर्सुतम् ।
नखाग्रैश्शकलीचक्रे यस्तं वीरं नमाम्यहम् ॥

End:

दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः ।
अतोऽहमपि ते दासः इति मत्वा नमाम्यहम् ॥

ज्योतींष्य .... नक्षत्रज्वलनादीन्यनुक्रमात् ।
ज्वलन्ति मेजसा यस्मात् ज्वलन्तं नमाम्यहम् ॥

Colophon :

275

Sl. No. 21298 नृसिंहमन्त्रस्तोत्रम् Ms. No. P. 5627/32

Beginning :

श्रीदेव्युवाच–

मन्त्राणां परमो मन्त्रः गुह्यानां गुह्यमुत्तमम् ।
ब्रूहि मे नारसिंहस्य तत्वं मन्त्रस्य शङ्कर ॥ (१)

शङ्कर उवाच–

+ + + + +

वृत्तोत्फुल्लविशालाक्षं विपक्षक्षयदीक्षितम् ।
निदानात्पत्रविश्वानां विष्णुमग्रं नमाम्यहम् ॥

End :

दासभूतास्सतस्सर्वे ह्यात्मानः परमात्मनः ।
अतोऽहमपि ते दासः इति मत्वा नमाम्यहम् ॥

Colophon :

– – – –

276

Sl. No. 21301 नृसिंहाष्टकम् Ms. No. P. 10322/5

Beginning:

श्रीमदकलङ्कपरिपूर्णशशिकोटिश्रीधर
मनोहरसटापटलकान्ता ।
पालयतु पालय भवाम्बुधिमग्नं मामतु
...

End :

अष्टकमिदं सकलपातकभयघ्नं
कामदमशेषदुरितमयरिपुघ्नम् ।
यः पठति सन्ततमशेषनिलयं
ते गच्छति पदं स नरसिंह नरसिंह ॥९॥

Colophon :

नरसिंह्माष्टकं समाप्तम् ॥

277

Sl. No. 21302 पञ्चदशीकवचम् Ms. No. C. 3528

(रुद्रयामलीयम्)

Beginning :

श्रीदेव्युवाच–

भगवन् देवदेवेश लोकानुग्रहकारक ।
यदुक्तं मे महादेव कवचं सुन्दरीप्रिय ।
तन्मे कथय देवेश यदि स्नेहोऽस्ति मां प्रति ॥

श्रीमहादेव उवाच–

शृणु देवि प्रवक्ष्यामि कवचं मन्त्रविग्रहम् ।
सर्वार्थसाधकं दिव्यं सर्वसंपत्तिपूरकम् ॥

End:

इतीदं कवचं देवि कवच मन्त्रसूत्रकम् ।
यस्मै कस्मै न दातव्यं न प्रकाश्यं कथञ्चन ॥

व्यस्त्रिसन्ध्यं पठेद्देवि लक्ष्मीस्तस्य प्रजायते ।
अष्टम्यां वा चतुर्दश्यां यः पठेत् सततं सदा ।
प्रसन्ना सुन्दरी तस्य सर्वसिद्धिप्रदायिनी ॥

Colophon :

इति श्रीरुद्रयामले पञ्चदशीकवचं समाप्तम् ॥

278

Sl No 21305 **पञ्चमीस्तवराजः** **Ms. No P. 2210/11**

(त्रिपुरसुन्दरीमहाविद्यास्तवराजः- रुद्रयामलीयः)

Beginning :

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थ मुक्तिकामार्थसिद्धये ॥

या नित्या परमा शक्तिः जगच्चैतन्यरूपिणी ।
तां नमामि महादेवीं पञ्चमीं प्रणमाम्यहम् ॥

End :

इमँ त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च सुभग शिवेन परिभाषितम् ॥

Colophon :

इति श्रीरुद्रयामळे महागमसारे सदाशिवोक्तपञ्चमीस्तवराजः समाप्तः ॥

279

SlNo. 21309 **पञ्चमीस्तवराजः (रुद्रयामलीयः)** **Ms No. P. 7982/6**

Beginning :

हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः ॥

ईश्वर उवाच-

सेवे सिन्दूरसन्दोह सुन्दरस्वाङ्गभासुराम् ।
करुणापूरकल्लोलकलां कलाम्बिकाम् ॥

End :

शान्ता पृथिवी शिवमन्तरिक्षं
द्यौर्नो देव्यभयं नो अस्तु ।
शिवा दिशः प्रदिश उद्दिशान
आपो विश्वतः परिपान्तु सर्वतः ॥

शान्तिः शान्तिः शान्तिः ॥

Colophon :

इति श्रीरुद्रयामले बहुरूपाष्टकप्रस्तारे षष्ठिसहस्रग्रन्थे श्रीपञ्चमीस्तवराजस्तोत्रं समाप्तम् ॥

280

Sl. No. 21312 पञ्चमीस्तवराजस्तोत्रम् Ms. No. B. 664/11

(रुद्रयामलीयम्)

Beginning :

पञ्चमीस्तवराजः प्रारम्भः--

अकृशं कृशयो कृशावलग्ने
विपुलं चक्षुषि विस्तृतं नितम्बे ।
अरुणादरि (?) चाविशस्तु चित्ते,
करुणाशालिकपालिभागधेयम् ॥

अस्य श्रीपञ्चमीस्तवराजस्तोत्रमहामन्त्रस्य– + + पञ्चमीस्तवराजपारायणे विनियोगः॥

End:

तत्क्षणादेव जायन्ते सर्वसिद्धिमुपालभेत् ।
इदं त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ॥२१७॥

रक्षामन्त्रं च शुभदं शिवेन परिभाषितम् ।
तत्सर्वं शम्भुना प्रोक्तं आचार्येण प्रभाषितम् ॥२०८॥

Colophon :

इति श्रीरुद्रयामले सपादलक्षग्रन्थविस्तारे पञ्चमखण्डे मोक्षपादे पञ्चमीस्तवराजस्तोत्रं सम्पूर्णमगमत् ॥

281

Sl. No. 21313 — पञ्चमीस्तवराजस्तोत्रम् — Ms No. C. 4324/1

Beginning :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरव
सिद्धौघं बटुकत्रयं × पयुगं दूतिक्रमं शांभवम् ।
वीरे चाष्टचतुष्कषष्टिनवकं वीरावळीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ १॥
सेवे सिन्दूर ‥ कुळनायकम् ॥ २॥

End:

पूजयेद्योगिनीचक्रे देवीं तद्दोषशान्तये ।

शान्ता पृथिवी शिवतमं रिष्टं द्यौर्नोऽभयमन्तो अस्तु शिवादिश. प्रदिशः उद्दिशो न आपो विद्युतः परिपान्तु सर्वतः ; शान्तिश्शान्तिश्शान्तिः ॥

Colophon :

– .. –

282

Sl. No. 21314 — पञ्चमीस्तोत्रम् (कुलार्णवीयम्) — Ms No. C. 3529

Beginning :

सत्कलाचार्यसंभेधे संविन्मयपरात्मिके ।
षड्ूर्मिरहिते देवि पञ्चमीपरदेवते ॥
मूलाधारस्थिते देवि मन्त्रमाता सरस्वती ।
महाचक्रमयी देवी पञ्चमी परदेवते ॥

End :

य इदं पठते नित्यं योनिलिङ्गसुमध्यमे ।
मनसार्थं नयोन्नित्यं स जीवपरमेश्वरः ॥

कुलाकुलमहाचक्रे कुलविद्यासरस्वती ।
देहि मे विन्दुरक्षार्थं गृहाण त्रिपुरेश्वरि ॥

Colophon :

इति श्रीकुलार्णवे महारहस्ये ईश्वरप्रोक्तं पञ्चमीस्तोत्रं समाप्तम् ॥

283

Sl. No. 21319 पञ्चायुधस्तोत्रम् Ms. No. P. 930/2

(ब्रह्मपुराणीयम्)

Beginning:

स्फुरत्सहस्रारशिखातितीव्रं
सुदर्शनं भास्करकोटितुल्यम् ।
सुरद्विषां प्राणविनाशि विष्णोः
चक्रं सदाहं शरणं प्रपद्ये ॥

End :

वने रणे शत्रुजलाग्निमध्ये
यदृच्छयापत्सु महाभयेषु ।
इदं पठन् स्तोत्रमनाकुलात्मा
सुखी भवेत्तत्कृतसर्वरक्षः ॥

Colophon :

इति ब्रह्मपुराणे श्रीमन्नारायणपञ्चायुधस्तोत्रं समाप्तम् ॥

284

Sl. No. 21337 | पञ्चावरणस्तवः | Ms. No. P. 4526/28

(महाशैवतन्त्रान्तर्गतः)

Beginning:

सृष्टिस्थित्युपसंहाराणां विश्वस्यास्यैककारणम् ।
महागणपतिं स्तोष्ये पञ्चावरणसंयुतम् ॥

End:

चतुश्चत्वारिंशद्दिवसमपि जप्त्वा स लभते ।
समृद्धान् इष्टार्थानपि स पवित(?)त्वेव सुलभान् ।

नालिकेरकदलीफललाजान् मोदकान् पृथुकसक्ततितिक्षून् ।
सन्निवेद्य परितर्प्य गणेशमन्त्रमेतदभयं प्रजपेच्च ॥४३॥

Colophon:

इति श्रीमहाशैवतन्त्रे महागणपतिविधाने पञ्चावरणस्तवः समाप्तः ॥

285

Sl. No. 21339 | पतञ्जलीव्याघ्रस्तोत्रम् | Ms. No. C. 694/118

Beginning:

सौवर्णपद्मनितटान्तविद्यहर्म्यवासिने
सुवर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणीभरेन्द्रधारिणे
सदा नमः शिवाय ते सदाशिवाय शम्भवे ॥

End:

हालास्यनाथाय महेश्वराय
हालाहलालङ्कृतकन्धराय ।

मीनेक्षणीयपतये शिवाय
नमो नमो सुन्दरताण्डवाय ॥

Colophon:

-- -- --

286

Sl. No. 21341 परमहंसकवचम् (रुद्रयामलीयम) Ms. No. B 955/1

Beginning :

श्रीदेव्युवाच–

ओं भगवन् सर्वधर्मज्ञ सर्वतन्त्रविशारदः ।
कवचं श्रोतुमिच्छामीहं सत्यपरमस्य च ॥

त्वत्प्रसादान्महादेव श्रुतानि विविधानि च ।
तन्मे कथय देवेश यदि स्नेहोस्ति मां प्रति ॥

End :

शिवाय ज्ञानहीनाय गुरुभक्ताय शातये ।
आत्मजेभ्योऽथ भक्तेभ्यो दत्वा मृत्युमवाप्नुयात् ॥

Colophon :

इति श्रीरुद्रयामलतन्त्रे परमहंसकवचं समाप्तम् ॥

287

Sl. No. 21342 परवासुदेवध्यानस्तोत्रम् Ms. No P. 4897/1
(शेषसंहितीयम)

Beginning :

पञ्चरात्रे शेषसंहितायां परवासुदेवाय ध्यानम्–

कूर्मभादीन् दिव्यलोकान् तदनुमणिमयं मण्टपं तत्र शेषं
तास्मिन्धर्मसमादिपीठं तदुपरि कमलं चामरग्राहिणीश्च ।

विष्णुं देव्यो विभुषा×गणमुरगं पादुके ते वैनतेयं
सेनेशं द्वारपालं कामुदमुखगणान् विष्णुभक्तान् प्रपद्ये ॥

End :

दक्षिणे पराह×रि पश्यरूपेणायोगतो हरिः ।
वामदक्षिणपार्श्वस्थौ कृताञ्जलिसमन्वितौ ॥
स्वरिपेण द्विपादस्थौ ध्वजविष्णूविभुपरेश (?)
+ + + + +

Colophon :

– – – –

288

Sl. No. 21343 **परात्रिंशिका** **Ms. No. B. 7619/2**

Beginning:

त्रिंशिकालिख्यते । देव्युवाच–

अनुत्तरं कथं देव स्वतः कौलिकसिद्धिदम् ।
येन विज्ञातमात्रेण खेचरीसमतां व्रजेत् ॥
एतद्गुह्यं महागुह्यं कथयस्व मम प्रभो ।
हृदयस्था तु या शक्तिः कौलिका कुलनायका ॥

nd:

यान् यान् कामयते कामान् तांस्तान् शीघ्रमवाप्नुयात् ।
आत्मा प्रत्यक्षतामेति सर्वज्ञत्वमवाप्यते ॥
एतन्मन्त्रफलावाप्तेः इत्येतध्हृदयामलम् ।
एतदभ्यस्यतः सिद्ध्येत् सर्वज्ञत्वं न संशयः ॥

Colophon :

इति परात्रिंशिका समाप्ता ॥

289

Sl No. 21344 परानन्दस्तुतिः Ms. No. P. 6979

Beginning;

कर्मभिराचरितं शिष्यशिक्षार्थं मङ्गलाचरणं ग्रन्थे निबध्नाति–

यदाहुर्वेदान्तेष्वजममरमध्यैकममृतां
यदङ्कं पश्यन्ति प्रयतमनसः कोऽपि कृतिनः
निजं यच्चैतन्यं पुरमथनतद्रूपममलं
परानन्दं वन्दे भुवनतरुकुन्दस्य भवतः ॥१॥

End :

परानन्दस्तुतिमिमां कुर्वतो मम नन्दिनः ।
यत्पुण्यमस्ति तेनास्तु जगदात्महरोन्मुखम् ॥३९॥

Colophon :

इति श्रीपरानन्दस्तुतिस्समाप्ता ॥

२९०

Sl. No 21345 परानन्दस्तुतिः Ms. No. P. 6982/1

Beginning :

परानन्दस्तोत्रम्—

शिवं तं सच्चिदानन्दं शिवानन्दकरं परम् ।
विभुं विभूतिविभवं वन्दे वन्दारुवल्लभम् ।१॥

End:

त्रैलोक्ये श्रीगिरिस्सारः श्रीगिरौ नन्दिमण्डलम् ।
तत्रापि च महानन्दी सारं क्षेत्रमनुत्तमम् ॥
एवं विधो नन्दिकेश्वरः परानन्द स्तुतिं कृतवान् ॥

Colophon :

291

Sl. No. 21347 प्रतिक्रियाशूलिनीदुर्गास्तोत्रम् **Ms. No. P. 1021/14**

Beginning:

रत्नक्ष्मामर्धचन्द्रे हिममरिदुरितान्मोचयान्तस्व वर्हि
स्वश्रेयो व्योमभूतानलपवनमुखं मूलमन्त्राद्विवर्णम् ।
रेखाशूलान्तरलोदरमरुदनलप्रासयाशु प्रयोक्तृ,
नित्यग्रे प्वग्निवीजं निखिलरिपुहरं शूलिनीप्राणयन्त्रम् ॥

End :

दैविकाद्दैरिकान्नानाहेतुकात् केवलाद्भयात् ।
पाहि मां प्रणतापत्तिभञ्जने विश्वलोचने ॥

जन्मान्तरसहस्रेषु यन्मया दुष्कृतं ।
तन्निवारय देवेशि शरण्ये भक्तवत्सले ॥

Colophon :

— — — —

292

Sl. No. 21349 प्रतिक्रियाशूलिनीदुर्गास्तोत्रम् **Ms. No. P. 4868/5**

(शैवतन्त्रीयाकाशभैरवकल्पीयम्–उमामहेश्वरसंवादरूपम्)

Beginning :

अथ प्रतिक्रियाशूलिनीदुर्गास्तोत्र मनुः । श्रीदेव्युवाच....

श्रीमन् सकलसूक्ष्मैकवोधकस्त्वं · जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्र प्रवदस्व दयानिधे ॥

श्रीशिवः—

शृणु देवि प्रवक्ष्यामि गुह्या.. गुह्यमनुत्तमम् ॥

End :

इति श्रीशिवाया: प्रसादानुभूति
प्रद्ालेपसूक्ष्मप्रयोगप्रभावम् ।
समस्तप्रकारै: श्रुत भुक्तिमुक्तं
पुन: श्रोतुमिच्छन्त्युमेशीरहस्यम् ॥

Colophon :

इति श्रीशैवतन्त्रे आकाशभैरवे कल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे + + प्रतिक्रिया-शूलीनीदुर्गास्तोत्रं नाम विंश: पटल: ॥

293

Sl. No. 21352 प्रतिक्रियाशूलिनीदुर्गास्तोत्रम् Ms. No. B 658/19

(महाभारततन्त्रीयाकाशभैरवतन्त्रकल्पान्तर्गतम्–उमामहेश्वरसंवादरूपम्)

Beginning :

अस्य श्रीप्रतिक्रियाशूलिनीमहामन्त्रस्य ब्रह्मा ऋषि: + + स्वाहा !
श्रीपार्वत्युवाच—

श्रीमत्सफलसूक्ष्मैकबोधकेश जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्रं प्रवदस्व दयानिधे ॥

श्रीशिव:—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ।
प्रतिक्रियाशालिनीय्यं स्तोत्रमन्त्रमभीष्टदम् ॥

End:

प्रतिक्रियास्तोत्रमिदं रहस्यं
जपेद्द्विसन्ध्यं प्रतिवासरं यत् ।
अवाप्य कामानखिलान् मनीषी
निजावृतैर्मुक्तिमुपैति सत्यम् ॥

Colophon :

इति श्रीमहाभारततन्त्रे आकाशभैरवतन्त्रे आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते अतिरहस्ये प्रक्रियास्तोत्रं सम्पूर्णम् ॥

294

Sl. No. 21353 प्रत्यङ्गिराकवचम् **Ms. No. P. 709/11**

(मान्त्रिकम्)

Beginning :

अस्य श्रीप्रत्यङ्गिराकवचमहामन्त्रस्य– अङ्गिरा ऋषिः ; अनुष्टुप् छन्दः ; उग्रकृत्या देवता ; पां बीजम् ; बुद्धिः शक्तिः ; तां ब्रह्मणा अपनिर्णुह्य इति कीलकम् ; प्रत्यङ्गिराप्रसादसिध्यर्थे जपे विनियोगः ॥

End

शीघ्रं पूर्णावेशं कुरु कुरु उच्चाटयोच्चाटय मारय मारय मर्दय बन्धय, बन्धय, भक्षय, भक्षय, संहारय संहारय, शीघ्रं मुञ्च मुञ्च हु फ_ स्वाहा । सर्वजनवशं कुरु कुरु ; सर्वदुष्टग्रहबन्धं कुरु कुरु ; क्षं क्रों अकर्षयाकर्षय ; सर्वदुष्टान्नाशय ; नाशय ; मारय मारय ; हुं फट् स्वाहा ॥

Colophon :

इति प्रत्यङ्गिरास्तोत्रम ॥

295

Sl. No. 21156 प्रत्यङ्गिरानिग्रहानुग्रहस्तोत्रम् **Ms No. P. 3897/5**

(अथर्वणरहस्यान्तर्गतम् शङ्कररचितम्)

Beginning :

सीं सीं सिंहमुखीमिति ध्यात्वा,–

कालीकरालवदने कपर्दीकृतमालिके ।

कालाग्निकल्पके मम शत्रून् निर्दह ॥

खर × वे महारूपे खरपृष्ठसमाश्रिते ।
खट्वाङ्गादिप्रहरणे खड्गेन हन मद्रिपून् ॥

End :

रक्तान्नेन बलीन् दद्यात् ग्रहान्मुक्तो भविष्यति ।
किं पुनर्बहुनोक्तेन रहस्यं वक्ष्यतेऽधुना ॥

सहस्रं प्रजपेद्विद्वान् शत्रून् संहरति ध्रुवम् ॥

Colophon :

इति शङ्करेण विरचिते अथर्वणरहस्ये प्रत्यङ्गिरानिग्रहानुग्रहस्तोत्रं समाप्तम् ॥

296

Sl. No. 21359 प्रत्यङ्गिरास्तोत्रम् Ms. No. C.696/34E

(चामुण्डोग्रशूलपाणिरचितम्)

Beginning:

अस्य श्रीप्रत्यङ्गिरास्तोत्रमहामन्त्रस्य– नारदो भगवान् ऋषिः; अनुष्टुप् छन्दः, प्रत्यङ्गिरा उग्रकृत्या देवता ; क्रं बीजम् ; फट् शक्तिः ; ह्रां कीलकम् ; प्रत्यङ्गिराप्रीत्यर्थे जपे विनियोगः ; ·|· ·|·

कृष्णवर्णां बृहद्रूपां रत्नकुञ्चितमूर्धजाम् ।
शिरःकपालमालाढ्यं सुकेशीमाननताननाम् ॥

दंष्ट्राकरालवदनां नेत्रभ्रूकुटिलेक्षणाम् ।
रक्तनेत्रमन्दरस्थं सुखसीनं भगवन्तम् ॥

End :

संपूज्य सर्वलोके × × त्वत्प्रसादान्महेश्वरि ।
यश्चनां पूजयेन्नित्यं स मे प्रियतमो भवेत् ॥

Colophon :

इति श्रीचामुण्डोग्रशूलपाणिविरचिते प्रत्यङ्गिरास्तोत्रं समाप्तम् ॥

297

Sl. No. 21360 | प्रदोषस्तोत्रम् | Ms. No. P. 8088/4

(ब्रह्मोत्तरखण्डीयम्--ब्रह्मनारदसंवादरूपम्)

Beginning :

सत्यं ब्रवीमि सुरलोकहितं ब्रवीमि
सारं ब्रवीम्युपनिषद्रहस्यं ब्रवीमि ।
संसारमूल × × मावसारमवाप्य जन्तोः
सारोऽयमीश्वरपादयुगस्य...सेवा ॥

End :

महाशोकनि× ×स्य महारोगातुरस्य च ।
ऋणभारपरीतस्य × × मानस्य कर्मभिः ॥
माहँ पीडय मनसा प्रसीद परमेश्वर ।
दारिद्र्यात्प्रार्थयेदेव पर्वान्ते गिरिजापतिम् ॥

Colophon:

इति ब्रह्मोत्तरखण्डे ब्रह्मनारदसंवादे प्रदोषस्तोत्रं समाप्तम् ॥

298

Sl. No. 21363 | प्रह्लादकवचम् | Ms. No. P. 8785/4

(मांत्रिकम्— नृसिंहकवचम)

Beginning :

अस्य श्रीप्रह्लादकवचनृसिंहस्तोत्रमहामन्त्रस्य- प्रह्लादो भगवान् ऋषिः ; अनुष्टुप् छन्दः ; श्रीलक्ष्मीनृसिंहो देवता ; श्रीलक्ष्मीनृसिंहप्रीत्यर्थे जपे विनियोगः ॥

End :

प्रतिभटवाक् कृत्रिमान् नाशय ; भस्मीकुरु ; वरमन्त्रज्ञान् वाक्-स्तम्भय ; स्तम्भय ; मम आज्ञावशं कुरु ; ह्रां ह्रीं ऐं क्लीं ओं नमो भगवते नृसिंहाय स्वाहा ॥

Colophon :

— — —

299

Sl. No. 21365 **प्रातःस्मारणस्तुतिः** **Ms. No. P. 10344/16**

Beginning :

प्रातस्स्मरामिभव × महार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहविभूतमवदारणमुक्तिहेतोः (?)
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥

End :

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥

अहल्या द्रौपदी तारा तारा मण्डोदरी तथा ।
पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम् ॥

Colophon :

— — — —

300

Sl. No. 21365 **प्रातस्स्मरणीयगणनाथश्लोकत्रयम्** **Ms. No. C. 4683/39**

Beginning :

पञ्चायतनसारे—

अथाहं सम्प्रवक्ष्यामि श्लोकत्रय × × ।
× × × स्तोत्रं गणनाथस्य × × × ॥

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूर्णपरिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्ड-
माखण्डलादिसुरनायकवृन्दवन्द्यम् ॥

End:

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ॥
प्रातरुत्थाय सततं यः पठेत् प्रयतः पुमान् ॥

Colophon :

— — —

301

Sl. No. 21369 प्रेमामृतरसायनम् Ms. No. P. 3136/20

Beginning:

ओं × × × × × × केसरी ।
कालिन्दीनीलकल्लोलकोलाहलकुतूहली ॥१॥

नारद उवाच–

एकदा कृष्णविरहात् ध्यायन्ती प्रियसङ्गमम् ।

End:

इत्येवं प्राणनाथस्य प्रेमामृतरसायनम् ।
यः पठेच्छृणुयाद्वाऽपि स प्रेम्णि प्रमिलेद्ध्रुवम् ॥२६॥

Colophon :

इति प्रेमामृतरसायनं समाप्तम् ॥

302

Sl. No. 21374 **बगलाकवचम्** Ms. No. B. 10038/13

(एकवीरतन्त्रीयम् – मोहम्रवालभैरवसंवादरूपम्)

Beginning :

अस्य श्रीबगलामुखीकवचस्तोत्रमहामन्त्रस्य– भैरव ऋषिः ; उष्णिक् छन्दः ; अद्वैत-रूपिणी सर्वशत्रुसंहारिणी प्रतिवादिवाक्स्तम्भिनी बगलामुखी देवता ; ह्लीं बीजम् ; स्वाहा शक्तिः ; ओं कीलकम् ; मम सर्वशत्रुसंहारणार्थे जपे विनियोगः ॥

End :

नास्तिके तस्करे दुष्टे मूढा पण्डितमानिनी ।
न देया हृदया विद्या वदन् भयमवाप्नुयात् ॥
सुशीलाय सुशान्ताय गुरुभक्तिरताय च ।
विशुद्धाय महामन्त्रं जप्त्वा देयमनुत्तमम् ॥
कृत्वा पुरा तु कवचं जपेन्मन्त्रं समाहितः ॥

Colophon :

इति श्रीएकवीरतन्त्रे मोहाम्रतालभैरवसंवादे ××× बगलामुखीकवचस्तोत्रं समाप्तम् ॥

303

Sl. No. 21375 **बगलाकवचम्** Ms. No. P. 10059/7

(बीरतन्त्रीयम् -- महोग्रभैरवसंबादरूपम्)

Beginning :

कैलासशिखरासीनं देवदेवं महेश्वरम् ।
शैलाधिराजतनया तमुवाच महेश्वरम् ॥

श्रीदेव्युवाच—

परमेश परन्धामन् प्रधानपुरुषोत्तम !
कवचं बगलामुख्याः वद मे करुणाकर ॥

End :

कृत्वा पुरा तु कवचं जपेन्मन्त्रं समाहितः ।
नान्यथा स्तम्भिनीविद्यासिद्धिः स्यादिति निश्चयः ॥

Colophon :

इति श्रीवीरतन्त्रे महोग्रभैरवसंवादे पादत्रिंशदक्षप्रस्तावे बगलाकवचं समाप्तम् ॥

304

Sl. No. 21378 बागलास्तोत्रम् Ms No. P. 4447/10

(नारदप्रोक्तम् – बागलामुखीस्तोत्रम्)

Beginning :

अस्य श्रीबगलामुखींस्तोत्रमहामन्त्रस्य– ...ता प्रद भगवान् ऋषिः ; अनुष्टुप छन्दः ; बगलामुखी देवता ; ह्लां बीजम् ; ह्लीं शक्तिः ; ह्लं कीलकम् । श्रीबगलमुखी॰ प्रीत्यर्थे जपे विनियोगः ॥

End :

पीतवस्त्रां त्रिनेत्रां च पीताभरणभूषिताम् ।
वैरिनिर्हरणार्थाय स्मरे त्वां बगलामुखि ॥९७॥
ब्रह्मास्त्रमिति विख्यातं त्रिपु लोकेषु दुर्लभम् ॥
गुरुभक्ताय दातव्यं न देयं यस्य कस्य चि० ॥१८

Colophon :

इति श्रीनारदप्रोक्तं बगलामुखीस्तोत्रं समाप्तम् ॥

305

Sl. No. 21381 वकुलास्तोत्रम् Ms. No. P. 4980/7

(रुद्रयामळीयम् बकुलमुखीमन्त्रस्तोत्रम्)

Beginning :

अस्य श्रीबगलामुखीस्तोत्रमन्त्रस्य भगवान् नारद ऋषिः ; जगती छन्दः ; बगलामुखी देवता ; मम संनिहितानां दुष्टानां विरोधिनां जिह्वामुखबुद्धिस्तम्भनार्थे श्रीमहामाया बकुलामुखी स्तोत्रजपे विनियोगः ॥

End:

अनुदिनमभिरामं साधकोऽयं त्रिकालं
पठति भुवनमातुः पू × × ते देववर्यैः ।
भवति परमकृत्यं तस्य हर्म्यावलोके
भवति परमसिद्धिः लोकमाता पराम्बा ॥

विद्यालक्ष्मीः सर्वसौभाग्यलाभः
पु × × सम्यग्राज्ञाभिष्टार्थसिद्धिः ।
मानः श्रेयो सर्वेब × × × स्वसिद्धिः
प्राप्तं प्राप्तं भूतले तन्नरेण ॥

य ××× जपसंसा ××× चिन्तनात्परमेश्वरी ।
शत्रूणां स्तम्भनार्थाय तद्गृहाण नमोऽस्तु ते ॥

Colophon :

इति रुद्रयामळाचार्यविरचितायां बगलामुखीस्तोत्रं समाप्तम् ॥

Extra information :

"ओम् ठम् ह्रीं श्रीं बकुलमुखीं मम विरोधिनां वाचामु × × भय जिह्वां कीलय बुद्धिं विनाशय श्रीं ह्रीं ओं स्वाहा ॥" इति ग्रन्थसमापनवाक्यानन्तरमेष बकुलामन्त्रविशेषोऽस्ति ॥

306

Sl. No. 21391 वगलास्तोत्रम् (बगलास्तवराजस्तोत्रम्) Ms. No. C. 3780/19

Beginning:

श्रीमातर्बगले परात्परतरे विद्युत्प्रभाभासुरे
भक्ताभीष्टफलप्रदे जयकरि प्रत्यर्थि वाक्स्तम्भिनि ।
विश्वाकर्षिणि मुद्गरारिरसनापाशांकुशोद्यत्करे
पीतानर्घ्यविभूषणाम्बरधरे स्रग्भूषिते ते नमः ॥

End :

निर्नित्ये बगले समुद्रनिलये रौद्रादिवाङ्मुद्रिके
भद्रे रुद्रमनोहरे त्रिभुवनत्राणे दरिद्रापहे ।
सद्रात्नाकरभूषणोज्वलमहानिस्सान्द्रचन्द्रानने
नीहाराद्रिसुते निसर्गविजये वेदैर्नुतायैनुमः ॥

Colophon:

इति बगलास्तवराजः समाप्तम् ॥

307

Sl. No. 21393 बालकवचम् (बालात्रिपुरसुन्दरीकवचम्) Ms. No. P. 2366/1

Beginning:

श्रीमहादेव्युवाच–

देवदेव महादेव भक्तानां प्रीतिवर्धन ।
सूचिता या महाविद्या कवचं कथयस्व मे ॥

श्रीमहादेव उवाच–

शृणु देवि प्रवक्ष्यामि कवचं देवदुर्लभम् ।
अप्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदम् ॥

End :

न दारिद्र्यवशं गच्छेत् × मृत्युवशं न च ।
गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहम् ॥

इदं कवचमज्ञात्वा बालां योभजतेऽधमः ।
विपरीतं फलं तस्य प्राप्नुयात् शास्त्रघातनः ॥

Colophon :

इति श्रीरुद्रयामळतन्त्रे श्रीबालात्रिपुरसुन्दरीकवचं समाप्तम् ॥

308

Sl. No. 21402 बालाकवचम् Ms. No. P. 7052/2

(बालात्रिपुरसुन्दरीस्तोत्रकवचम्)

Beginning :

हे मातः हेमणिमाणिक्यखचितोज्वलन्तिरञ्जितशुभे (?) हेमार्ककोटि× मे
हे धूम्राक्षराक्षसमहाशुम्भादिविच्छेदिते ।
हे मातङ्गि समस्तदेवविणुते हरिहरब्रह्मादिभिः सेविते
हे राजेश्वरीभनद (?) शङ्करि महादेवि सदाहं भजे ॥ (?)

अमले कमलालये कथं त्वां
स्तुतिभिः स्तोतुमहं प्रसक्तः ।
× × यात् मधुकैटभजीवितान्तां
× × × भूपते शरणं मे भव शम्भुवल्लभे॥ १॥

End :

श्यामाभां वेदहस्तां त्रिनयनसहितां सैह्मिकेयूर्ध्वकेशीं
शूलं मुण्डं च सर्पं डमरुयुतभुजां कुन्तळात्युग्रदंष्ट्राम् ।
वृत्तेऽश्वारूढयुक्तां ज्वलदनलयुतां ब्रह्मगायत्रियुक्तां
वन्दे प्रत्यङ्गिरां तां मरणरिपुविधां व्याधिदारिद्र्यनाशाम् ॥

Colophon :

इति बालात्रिपुरसुन्दरीकवचस्तोत्रं समाप्तम् ॥

309

Sl. No. 21404 बालाकवचम् **Ms. No. C. 8278/10**

(बालापरमेश्वरीकवचम्-देवीकवचं वा)

Beginning :

वदनं सकलं पातु पञ्चकूटेस्त (?) पञ्चमी ।
× स्मरो योनिस्तथा लक्ष्मीः वाग्भवो भुवनेश्वरी ॥ १ ॥

End:

रमादिषोडशी पातु करौ त्रिपुरसुन्दरी ।
माया × × णवो वाणी माया लक्ष्मीश्च सुन्दरी ॥

\+ + + + +

मायादिषोडशी ख्याता हृदयं × × × रक्षतु ॥

Colophon :

– – –

Extra information :

अत्र ग्रन्थस्यान्ते–

वागादिप्रणवाः पञ्च त्रिपुरे द्वे पुनश्च ते ।
वागादिषोडशी पूर्णा सरस्वत्या प्रपूजिता ॥
वाग्बीजं भुवनेशा × × रमा मनोभवः ।
बीजं बालातृतीयं च पराख्यं बीजमुत्तमम ॥
पञ्च तारा इमे ज्ञेयाः मन्त्रादौ योजिताः प्रिये ॥

इति देवीमन्त्रयोजनोपयुक्ताः पञ्चतारा वर्णिताः ॥

310

Sl. No. 21411 बालसरस्वतीध्यानम् Ms. No. C. 4679/11

Beginning :

श्रीअम्बाध्यानम् –

वरदाभय पुस्तकाक्षमालां,
विलसत्पाणि सरोजभासमानाम् ।

End :

शरदिन्दुसहस्रकोटिकल्पां
परमानन्दमयीं प्रणमोऽस्मि बालाम् ॥१॥

Colophon :

– – – –

311

Sl. No. 21412 बालास्तवराजः Ms. No. P. 10732/12

(भैरवयामलीयः--उमामहेश्वरसंवादरूपः)

Beginning :

आ×त्वा शशिखण्डमण्डितजटाजूटानृमुण्डस्रजं
बन्धूकप्रस×रिणीं वरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयन्यमापीनतुंगस्तनीं
मध्ये निम्नवलित्रयांकितन्यन्त्व (?) द्रूपसंवित्तये ॥

End:

एता भूपुरमध्ये तु पूजनीयां यथाक्रमात् ।
इन्द्रादिमोकलाच्च पूजयेद्रुपुद्रहिः (?) ॥

एवं क्रमेण योविद्वान् नित्यं वालां प्रपूजयेत् ।
इहाभीष्टफलं भुक्त्वा मत्सायुज्यमवाप्नुयात् ॥

Colophon :

इति श्रीभैरवयामले उमामहेश्वरसंवादे बालास्तवराजं समाप्तम् ॥

312

S l. No. 21413 बालहृदयम् **Ms. No. P. 2366/3**

(ज्ञानार्णवीयम्)

Beginning:

पार्वत्युवाच–

महादेव नमस्तुभ्यं विरूपाक्ष नमोऽस्तु ते ।
बालाहृदयमन्त्रस्य प्रयोगं वद शङ्कर ॥

ईश्वर उवाच–

बालाया हृदयं मन्त्रं गुप्तान् गुप्ततमं तथा ।
एतच्छ्रवणमात्रेण मन्त्रसिद्धिमवाप्नुयात् ॥

End :

कृत्रिमेषु च रोगेषु नानाभयसमुद्भवे ।
त्रिसप्तमन्त्रितं तोयं सद्योनैर्मल्यमाप्नुयात् ॥

नित्यमष्टोत्तरशतं बालाया हृदयं मनुम् ।
चिन्तितं च भवेद्देवि नात्र कार्या विचारणा ॥

Colophon :

इति ज्ञानार्णवे बालाहृदयं समाप्तम् ॥

313

Sl. No. 21415 विल्वाष्टकम् Ms. No. P. 5788/19

(विल्वपत्राष्टकम्—काशीखण्डीयम्)

Beginning :

त्रिदळं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पणम् ॥

End :

दर्शनं बिल्ववृक्षैश्च स्पर्शनं पापनाशनम् ।
अमोघसर्वपापैश्च नश्यन्ति न विना वद (?) ॥

Colophon :

इति श्रीकाशीखण्डे बिल्वपत्राष्टकस्तोत्रं समाप्तम् ॥

314

Sl. No. 21422 बुधकवचम् (स्कान्दीयम्) Ms. No. P. 6505

Beginning :

अस्य श्रीबुधकवचस्तोत्रमहामन्त्रस्य– कात्यायन ऋषिः ; अनुष्टुप् छन्दः ; बुधो देवता ; + + ध्यानम्–

बुधः पुस्तकहस्तस्तु कुन्दपुष्पसमद्युतिः ।
पीताम्बरधरः पातु पीतामाल्यानुलेपनः ॥

End :

यः पठेत् श्रुणुयाद्वापि श्रावयेद्वा समाहितः ।
सर्वान् कामनवाप्नोति दीर्घमायुश्च विन्दति ॥

Colophon:

इति श्रीस्कान्दे उत्तरखण्डे बुधकवचं समाप्तम् ॥

315

Sl. No. 21431 बुधस्तोत्रम् (स्कान्दीयम्) Ms. No. P. 6604

Beginning :

अस्य श्रीबुधस्तोत्रमहामन्त्रस्य- वसिष्ठो भगवान् ऋषिः ; त्रिष्टुप् छन्दः ; बुधो देवता । + + + । ध्यानम्-

बुधस्त्वम × × व्यरदाभयासिगदां प × × न्नं च करैः प्रशान्तम् ।
पीतप्रभं चन्द्रसुतं सुराढ्यं सिंहे निषण्णं बुधमाश्रयामि ॥

End :

वि × × रोग्यमपस्मारगुल्मातिव्याधिविनाशनम् ।
यत्तत्कामयते तत्तत् प्राप्नोत्येव न संशयः ॥

Colophon :

इति स्कान्दे पुराणे बुधमहास्तोत्रं समाप्तम् ॥

316

Sl No. 21434 बृहस्पतिकवचम् (स्कान्दीयम्) Ms. No. C. 461/14

Beginning :

अस्य श्रीबृहस्पतिकवचस्तोत्रमन्त्रस्य- ईश्वर ऋषिः ; अनुष्टुप् छन्दः ; बृहस्पति- देवता ; आं बीजम् ; ह्रीं शक्तिः ; — कीलकम् ; बृहस्पतिप्रसादसिध्यर्थे जपे विनियोगः ।

ध्यानम्–

अभीष्टफलदं वेदे सर्वज्ञं सुरपूजितम् ।
सर्वकार्यार्थसिध्यर्थं प्रणमामि गुरुं सदा ॥

बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः ।
कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः ॥

End :

य इदं कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः ।
सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत् ।
सर्वत्र पूज्यो भवति वाक्यं तस्य प्रभावतः ॥

Colophon :

इति स्कान्दपुराणे उमामहेश्वरसंवादे बृहस्पतिकवचं समाप्तम् ॥

317

Sl. No. 21436 बृहस्पतिकवचम् Ms. No. C. 4722/5
(ब्रह्मवैवर्तीयम्)

Beginning :

अस्य श्रीबृहस्पतिकवचस्तोत्रमहामन्त्रस्य– ईश्वर ऋषिः ; + + बृहस्पति-देवता ; + + + ध्यानम्–

अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम् ।
सर्वकार्यार्थसिध्यर्थं प्रणमामि गुरुं सदा ॥

बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः ।
कर्णौ सुरगुरुः पातु नेत्रौ मेऽभीष्टदायकः ॥

End:

इत्येवं कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः ।
सर्वान् कामनवाप्नोति सर्वत्र विजयी भवेत् ॥
सर्वत्र पूज्यो भवति गुरौ स हि प्रसादतः ॥

Colophon :

इति ब्रह्मवैवर्तकपुराणे बृहस्पतिकवचम् ॥

318

Sl. No. 21437 बृहस्पतिपञ्चविंशतिनामस्तोत्रम् Ms. No. 1554

(बृहस्पतिस्तोत्रम्)

Beginning :

अस्य श्रीबृहस्पतिकवचस्तोत्रमन्त्रस्य– ईश्वर ऋषिः ; अनुष्टुप् छन्दः ; बृहस्पति-देवता ; गं बीजम् श्रीं शक्तिः ; क्लीं कीलकम् ; मम बृहस्पतिप्रसादसिध्यर्थे जपे विनियोगः ॥

End

पञ्चविंशतिनामानि पुण्यानि फलदानि च ।
नन्दगोपग्रहस्तेन विष्णुना कीर्तितानि वै ॥
प्रातरुत्थ य यो नित्यं कीर्तयेत × × × × ।
परितोऽपि भगवान् प्रीतिस्तस्य बृहस्पतेः ॥

Colophon :

इति बृहस्पतिस्तोत्रं समाप्तम् ॥

319

Sl. No. 21445 ब्रह्मस्तुतिः **Ms. No. P. 3862/3**

(ब्रह्मगीता भागवतान्तर्गता)

Beginning :

ब्रह्मोवाच–

नौमीड्य तेऽभ्रवपुषे तडिदम्बराय
गुञ्जावतंसपरिपिञ्छलसन्मुखाय ।
वन्यस्रजे कवलवेत्रविषाणवेणु-
लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥

End :

एतत्सुहृद्भिश्चरितं मुरारेः
अघार्दनं शाद्वलजेमनं च ।
व्यक्तेतरद्रूपमजोर्वभिष्टव
शृण्वन् गृणन्नेति नरोऽखिलार्थान् ॥

एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ।
निलायनैः सेतुबन्धैः मर्कटोत्प्लवनादिभिः ॥

Colophon :

इति ब्रह्मगीता । इति श्रीमद्भागवते महापुराणे दशमस्कन्धे चतुर्दशोऽध्यायः ॥

320

Sl. No. 21446 ब्रह्मस्तुतिव्याख्या **Ms. No. P. 1326/2**

(भागवतव्याख्यान्तर्गता– वेङ्कटकृष्णमाचार्यकृता)

Beginning :

नौमिति । हे ईड्य– स्तुत्य, अभ्रवपुषे, तटिदम्बराय– नीलमेघश्यामलवपुषे, तटिद्वर्णाम्बराय, गुञ्जावतंसपरिपिञ्छलसन्मुखाय, गुञ्जामणिमयेनावतंसेन शिरोभूषणेन

परितः पिञ्छमालया च लसन्मुखाय प्रकाशमानवद्‌नारविन्दाय, वन्यस्त्रजे- वन्यकुसुममालिकाधारिणे नौमीत्यर्थः ।।

End:

तन इति । ततो भगवान् श्रीकृष्णः स्वयम्भुवं ब्रह्माणं अनुज्ञाप्य यथापूर्वं पूर्ववदेव प्रागवस्थितान् अमायिकान् वत्सान् सखस्वकं पुलिनमानिन्ये (?) ॥

Colophon :

इति वेङ्कटकृष्णमाचार्यविरचिते श्रीभागवतव्याख्याने तात्पर्यचन्द्रिकाख्याने दशमस्कन्धे ब्रह्मस्तुतिर्नाम चतुर्दशोऽध्यायः ॥

321

Sl. No. 21448 भगवतीकीलकम् Ms. No. C 4592/7

Beginning:

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥१॥

सर्वमेतद्विना यस्तु मन्त्राणामभिकीलकम् ।
सोपि क्षेममवाप्नोति सततं जापतत्परः ॥२॥

End :

शनैस्तु जाप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥१५॥

Colophon :

इति भगवत्याः कीलकं समाप्तम् ॥

322

Sl. No. 21449 भगवद्गीताप्रकर्षस्तुतिः Ms. No. 2864/1

Beginning :

चतुर्णामुपादान सारमुद्धृत्य × × ।
त्रैलोक्यस्या × × गीताशास्त्रं प्रवर्तितम् ॥

यावत्तु पठ्यते गीता कृष्णवक्त्राद्विनिस्सृता ।
धर्ममर्थं च कामांश्च मोक्षं चानिक्षतां (?)सताम् ॥

गीतायाः श्रवणे यस्य मानसं सम्प्रवर्तते ॥

End :

गीता नामसहस्रे द्वे स्तोराजोह्यनुस्मृतिः ।
यस्य कुक्षौ तु वर्तन्ते सर्वो नारायणस्स्मृतः ॥

कृष्णं कमलपत्राक्षं पुण्यश्रवणकीर्तनम् ।
वासुदेवं जगद्योनिं × × नारायणं × ॥

Colophon :

— .. .. – –

323

Sl. No. 21450 भगवद्भागवतनामसङ्कीर्तनफलस्तुतिः Ms. No. P. 5791/3

Beginning:

प्रह्लादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीष्म दाल्भ्यान् ।
× × × × द्बलिविभिषणादि-
पुण्याभिमान् परमभागवतान् स्मरामि ॥१॥

श्रीभगवानुवाच—

ध × × × × × ×

× × × कीर्तनेन ।

पापं प्रणश्यति वृकोदरकीर्तनेन

शत्रुर्विनश्यति धनञ्जयकीर्तनेन ॥

End:

लक्ष्मीश केशव जनार्दन वासुदेव

विश्वेश विश्व मधुसूदन विश्वरूप ।

श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष

नारायणाच्युत नृसिंह नमो नमस्ते ॥

Colophon:

– – – –

324

Sl. No. 21454 **भीमद्वादशनामस्तोत्रम्** **Ms. No. P. 5056/57**

Beginning:

मारुतिः पाण्डवो भीमो गदापाणिर्वृकोदरः ।

कौन्तेयः कृष्णदयितः भीमसेनो महाबलः ॥

End:

जरासन्धान्तकृद्वीरो दुश्शासनविनाशकृत् ।

एतानि द्वादश नामानि भीमस्य तु महात्मनः ॥

Beginning:

– – –

325

Sl. No. 21458 **भूमिप्रार्थना** Ms. No. P. 8860/7

ಭೂಮಿಪ್ರಾರ್ಥನೆ—

सर्वाधारे धरे देवि चतुस्सागरमेखले ।
भूमिदेवि नमस्तुभ्यं पादस्पर्शं क्षमस्वमे ॥ १ ॥
समुद्रमेखले देवि पर्वतस्थानमण्डले ।
विष्णोः पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

End :

रोमजाले तु संप्राप्त सोमो भवतु कर्निका ।
रजः पश्यतु गन्धर्वः वह्निस्तु कुचदर्शने ॥
अत ऊर्ध्वं मनुष्याणां तत्पूर्वं पतितो भवेत् ॥ ६ ॥

Colophon :

... ...

326

Sl. No. 21459 **भैरवकवचम् (भैरवतन्त्रीयम)** Ms. No. C. 3617

Beginning:

शिव उवाच—

देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवम् ।
म्रियं साधका येन विमार्गश्मशानभूमिषु ॥ १ ॥
भैरवश्चतिघोरेषु महावायुजवेषु च ।
शृङ्गी सलिलवज्रेषु जराधिव्याधिवह्निषु ॥ २ ॥

End :

सततः पठ्यते येन तत्र भैरवसंस्थितम् ।
न शक्नोमि प्रभाव वै कवचस्यास्यवर्णितुम ॥१९॥

नमो भैरवनाथाय सारभूताय वै नमः ।
नपस्त्रैलोक्यनाथाय नाथनाथाय वै नमः ॥२०॥

Colophon:

इति श्रीभैरवतन्त्रे देवीहरसंवादे भैरवकवचं सम्पूर्णम् ॥

327

Sl. No. 21460 भैरवद्वयष्टकम् (बुधारण्यऋषिकृतम्) Ms No. C. 10024/9

Beginning:

करलतिकपाल ;कुण्डली दण्डपाणिः
तरुणतिमिरजूटो व्यालयज्ञोपवीती ।
ऋतुसमयमपर्याविघ्नविच्छेदहेतोः
जयतु वटुकनाथः सिद्धिदस्साधकानाम् ॥

End :

देशे तु निस्मरेन्नित्यं महापातकनाशनम् ॥ १४ ॥
इति दक्षमहाकायः कन्थान्ते अतितीक्ष्ण ×× माः।
भैरवाय नमस्तुभ्यं जन्तूनत्रातुंत्वर्मिहसि ॥१४॥

Colophon:

इति श्रीबुधाष्टारण्यऋषिविरचितं भैरवाष्टकस्तोत्रं सम्पूर्णम् ॥

328

Sl. No. 21462 **भैरवाष्टकम्** Ms. No. C. 2966/9

(क्षेत्रपालस्तोत्रम्)

Beginning :

तीक्ष्णदंष्ट्रेति प्रार्थनं भैरवोऽस्य देवता ।

ओं थं यं यं यक्षरूपं दशदिशि विदितं भूमिकम्पायमानं
सं तं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम् ।
दं दं दं दीर्घकायं विवृननखमुखं ऊर्ध्वरोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ।।

End :

भैरवस्याष्टकमिदं षण्मासं यः पठेन्नरः ।
स याति परमं स्थानं यत्र देवो महेश्वरः ।।
सिन्दूरारुणगात्रं च सर्वजन्मवि जितम् ।
मुकुटाग्रयधरं देवं भैरवं प्रणमाम्यहम्।

Colophon :

इति भैरवाष्टकं सम्पूर्णम् ।।

329

Sl. No. 21463 **भ्रमराम्भास्तुतिः** Ms. No. P 5772/8

(स्कन्दीया सनत्कुमारसंहितीया च)

Beginning :

पद्मकरे पद्मिनीव चन्द्रिके वसुधाकरे।
अज्ञा श्रीपर्वते देवि स्थिता त्वं वरदा भव ।।
अत्र ये त्वां समुद्दिश्य नरास्सुश्चरितव्रताः ।
भव तेषां महादेवि सर्वसिद्धिप्रदायिनी ॥

End :

यत्पादाम्बुजसेवया बुधजनस्सूते जगद्विस्मृतां (?)
वाक्सिद्धिं विबुधेन्द्रलालितगुणामिष्टार्थसन्धायिनीम ।
सोऽसौ श्रीगिरिमौळिमण्डनमणिः सांबः कृपाम्भोनिधिः
दिश्यात् श्रीगिरिमल्लिकार्जुनविभुः श्रेयांसि भूयांसि नः ॥

Colophon :

इति श्रीस्कान्दे सनत्कुमारसंहितायां श्रीशैलखण्डे अमराबास्तुतिर्नाम षड्विंशोऽध्यायः ॥

330

Sl. No. 21464 मङ्गलव्रतस्तोत्रम् Ms. No. C 208/3

(भविष्योत्तरीयम्)

Beginning:

द्वितीय मङ्गलस्तोत्रस्य ब्रह्मा ऋषिः ; त्रिष्टुप् छन्दः ; अङ्गारको देवता ; अभीष्ट-सिध्यर्थे जपे विनियोगः ।

अङ्गारकेति बलवानधिपो ग्रहाणां
स्वेदोद्भवस्त्रिनयनस्य पिनाकपाणेः ।
यो रक्तचन्दनसुशीतलवारिपुष्पैः
अभ्यर्च्यतेऽर्थमतुलं प्रददाति सद्यः ॥

End :

माङ्गल्यदो मङ्गलदो मङ्गलनाम
धेयो ग्रहः सदा यच्छतु वाञ्छितं मे ।
धार्मार्थकामादि सुखं प्रसूते
कलत्रपुत्रैर्न कदापि योगः ॥

Colophon :

इति भविष्योत्तरपुराणे मङ्गलस्तोत्रं सम्पूर्णम् ॥

331

Sl. No. 21467 **मङ्गलाष्टकम्** **Ms. No. P. 4360/1**

(वाल्मीकीयम्)

Beginning :

सानन्दः × × × × × न्दुप्रभां
वृन्दमन्दमहः शिवा न नम वृज्ज्योत्स्नानिरस्तश्रमः ।
रङ्गत्तुङ्गतरङ्गसङ्गविगटद्गाङ्गान्दजभृङ्गाङ्गना
सङ्गीतोल्लसितेन ते गिरिपतिः कुर्यात्सदा मङ्गलम् ॥

End :

इत्येतां नव मङ्गलाष्टकमिदं वाल्मीकिनोदीरितं
पापौघप्रशमाय पुण्यफलदं ब्रह्मादिभिर्दुर्लभम् ।
यः प्रातः शृणुयात् समाहितमनो भक्त्यान्वितो यः पठेत्
सर्वारिष्टविनाशनं सुतफलं देयादलं × × ॥

Colophon :

... ...

332

Sl. No. 21468 **(विवाहीम्) मङ्गलाष्टकम्** **Ms. No C. 495/2**

(वाल्मीकिकृतम्)

Beginning :

लक्ष्मीशो भुवनत्रये निवसितान् देवान् मनुष्योरगान्
संस्थातः करुणानिधेः करुणया मार्ताण्डवंशे ययौ ।
कौसल्यानिजगर्भसम्भवकृते जन्मन्यसाधारणे
जातश्रीरघुनायकस्य जननं देयादिदं मङ्गलम् ॥१॥

End :

इत्येतद्वरमङ्गलाष्टकमिदं वाल्मीकिना चोदितं
पापौघप्रशमाय पुण्यफलदं ब्रह्मादिभिर्दुर्लभम् ।
यः प्रातः शृणुयात्समाहितमनाः भक्त्यान्वितो यः पठेत्
सर्वारिष्टविनाशनं शुभकरं देयादिदं मङ्गलम् ॥ ९ ॥

Colophon :

इति मङ्गलाष्टकं सम्पूर्णम् ॥

333

Sl. No. 21471 मन्त्रविग्रहकवचम् Ms No. P. 5764/2

(रुद्रयामिलीयम्)

Beginning :

पार्वत्युवाच—

भगवन् देवदेवेश लोकानुग्रहकारकम् ।
यदुक्तं मे महादेव कवचं सुन्दरीप्रियम् ॥
तन्मे कथय देवेश यदि स्नेहोऽस्तिमां प्रति ॥

श्रीमहादेवोवाच—

शृणु देवि प्रवक्ष्यामि कवचं मन्त्रविग्रहम् ।
सर्वार्थसाधकं देवि सर्वसम्पत्प्रपूरकम् ॥

End:

यस्मै न दातव्यं न प्रकाशं कदाचकस्मै न ।
यं त्रिसन्ध्यं पठेत् देवि लक्ष्मीः तस्य प्रजायते ॥
अष्टम्यां च चतुर्दश्यां यः पठेत्प्रयतस्सदा ।
प्रसन्नसुन्दरी तस्य सर्वसम्पत्प्रदायिनी ॥

यो मध्याह्ने च पीयूषे ... प्रतिदिनम् ।

Colophon :

इति श्रीरुद्रयामिळे सर्वागमसारोत्तरे ईश्वरसंवादे मन्त्रविग्रहकवचं सम्पूर्णम् ॥

334

Sl. No. 21475 मणिकर्णिकास्तोत्रम् Ms.No C.4687/19

(काशीखण्डान्तर्गतम्)

Beginning :

त्वत्तीरे मणिकर्णिके हरिहरौ सायुज्यमुक्तिप्रदौ
वादन्तौ कुरुतः परस्परमुभौः जन्तोः प्रयाणोत्सवे ।
मद्रूपो मनुजो यमस्तु हरिणा प्रोक्तः शिवास्तत्क्षणे
तन्मध्या × × लांछनोगरुडगः पीताम्बरो निर्गतः ॥

End:

कृच्छ्रैः कोटि × स्वैः स्वपाकनिधनं यच्चाश्वमेधैः फलं
तत्सर्वे मणिकर्णिका स्नानजं पुण्यात्प्रकृष्टं भवेत् ।
स्नात्वा स्तोत्रमिदं नरः पठति यः संसारपाथोनिधिं
तीर्त्वा पल्वलवत्प्रयाति सदनं तेजोमयं ब्रह्मणः ॥

Colophon :

इति काशीखण्डे मणिकर्णिकास्तोत्रं सम्पूर्णम् ॥

335

Sl. No. 21477 मदनगोपालस्तोत्रम् Ms. No. C. 4669/1

(ध्यानस्तुतिः)

Beginning :

ईश्वर उवाच—

शृणु देवि प्रव × × × भुवनेश्वरि ।
तवैव पौरुषं रूपं गोपिकानयनामृतम् ॥

सदा निवासितं रागात् भवद्भिर्बहुभीरुणा ।
सत्यभामादिरूपाभिर्मया मूर्तिभिरष्टभिः ॥
ख्यातं मदनगोपालसंज्ञया भुवनत्रये
ध्यानं तस्य प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥

× × × ×

श्रीमद्बालार्कसंकाशं पद्मरागारुजद्युतिम् ।
बंधूकबन्धुरालोकसंध्यारागारुणाद्युतिम् ॥

End:

सौरभ्यलोलरोलम्बैः शुभैर्मन्दारदामभिः ।
श्रीवत्सकौस्तुभाभ्यां च परिष्कृतभुजान्तरम् ॥

Colophon:

— -- —

335

Sl. No. 21478 मन्युसूक्तस्तोत्रम् Ms. No P 8757/5

Beginning:

अस्य श्रीमन्युसूक्तस्तोत्रमहामन्त्रस्य तापसपुत्रोमन्युः ऋषिः; मन्युर्देवता; त्रिष्टुप् छन्दः; भाबाश्वतमः; अन्त्या जगती; अन्युरिन्द्रो मन्युरेवा स इति बीजम्; आभिः हि मन्योरिति शक्तिः; संशिष्टं धनमिति कीलकम्; मन्युर्देवता तत्प्रसादसिध्यर्थे जपे विनियोगः ॥

End:

रूपेतं तापसं मन्युं सर्वाभीष्टफलप्रदम् ।
दंष्ट्राकरालवदनं ज्वालामालाशिरोरुहम् ॥
× × समरिभीषाढ्यं × × भयङ्करम् ।
कपालमौक्तिकधरं रुद्रं मन्युं नमाम्यहम् ॥

Colophon :

इति तापसुपुत्ररचितं मन्युसूक्तं समाप्तम् ॥

337

Sl. No. 21479 मनोन्मनीस्तोत्रम् Ms. No. P. 1768/3

(भृगुप्रोक्तम्– स्कन्दपुराणस्थम्)

Beginning :

वन्द्यते मनसा देवि शुद्धज्ञानस्वरूपिणि ।
शुद्धदीपमयाकारे शुद्धशारपरावरे ॥
अखण्डमण्डलाकारे शिवरूपे शिवालये ।
मूलमन्त्रस्वरूपायै मूलशक्तिस्वरूपिणि ॥

End :

अवस्थाधीयते तत्त्वे रूपातीते महात्मनि ।
सर्वत्र मनसा देवि मनसा त्वरस्वरूपिणि ॥
तस्याद्यस्य प्रयत्नेन सर्वदेवमयं प्रभुम् ।
इदं स्तोत्रं पठेन्नित्यं शृणुयाद्वा समाहितः ॥

Colophon :

इति स्कान्दपुराणे भृङ्गिऋषिप्रोक्ते मनोन्मनीस्तोत्रं सम्पूर्णम् ॥

338

Sl. No. 21482 मल्लारीस्तवराजः (मल्लारिस्तोत्रम्) Ms. No. C. 226/16

(स्कान्दीयं आवन्तीखण्डार्गतम्)

Beginning :

अस्य श्रीमल्लरिस्तवराजमन्त्रस्य– स्कन्द ऋषिः श्रीमल्लारिर्देवता ; अनुष्टुप् छन्दः ; श्रीमल्लारिप्रीत्यर्थे जपे विनियोगः ॥

End :

दुःस्वप्नशान्तिः प्राणस्य बालानां शान्तिकारकम् ।
सन्देहो नात्र कर्तव्यो मल्लारिकवचं ध्रुवम् ॥
सर्वार्थं प्राप्यसन्तानं किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इति स्कान्दपुराणे अवन्तीखण्डे श्रीमल्लारिस्तवराजस्तोत्रं सम्पूर्णम् ॥

339

Sl. No. 21484 महागणपतिकवचम् Ms. No. B. 279/3

(रुद्रयामलीयम्)

Beginning :

श्रीपार्वत्युवाच–

देवदेव जगन्नाथ सृष्टिस्थित्यन्तक प्रभो ।
विना तपोविना ध्यानं विना होमं विना जपम् ।
अनायासेन विघ्नेश प्रीणनं वद मे प्रभो ॥

ईश्वर उवाच + + + +

गणनाथस्य कवचं सर्वसिद्धिप्रदायकम् ।

End :
ईश्वर उवाच–

इति परमरहस्यं देवि देवार्चितं च
पठति परमदिव्यं पार्वतीशात्मकं च ।
भवति सकलैश्वर्यं मोक्षसिद्धिप्रदं च

भवति सकलसौख्यं शक्तिपुत्रप्रसादात् ॥

Colophon :

इति रुद्रयामिळतन्त्रे अतिरहस्ये शतसहस्रकोटिविस्तारे अगमसारे गौरीशङ्करसंवादे श्रीमहागणपतिकवचं संपूर्णम् ॥

340

Sl. No. 21485 महाराजगणपतिस्तवराजः Ms. No. P. 4832/7
(गणेशस्तवराजः – रुद्रयामिलीयः)

Beginning :

अस्य श्री महागणपतिस्तवराजस्तोत्रमालमन्त्रस्य–भगवान् सदाशिव ऋषिः ; श्रीगणपतिः देवता; अष्टी छन्दः। श्रीमहागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

यो भक्तिप्रणवः चराचरगुरोः स्तोत्रं गणेशाष्टकं
शुद्धं संयतचेतसा यदि पठेत् नित्यं त्रिसंध्यं पुमान् ।
यस्य श्रीरतुला स्वसिद्धिसहिता श्रीशारदा शारदा
स्यातां तपरिचारके किल तदा कः कामिनीनां कथा ॥

Colophon:

इति श्रीरुद्रयामले गणेशस्तवराजस्तोत्रं सम्पूर्णम् ॥

341

Sl No. 21488 महादेवस्तोत्रम् Ms. No. C. 4681/19
(विष्णुप्रोक्तम् - महास्तोत्रम)

Beginning :

महादेव महादेव महादेवेति वादिनम ।
वत्सं गो रं व देवेश धावंतमनुधावति ॥
महादेव महादेव महादेवेति वादिनम ।
नरं मुञ्चति पापानि दरिद्रमिव योषितः ॥

End :

महादेव तरुछाया नातिशीताघर्मदा (?) ।
संसारतापशमनी सा किमर्थं न सेव्यते ॥
कोट्यो ब्रह्महत्यनामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥

Colophon :

इति सप्तमांशे विष्णुब्रह्मसंवादे विष्णुप्रोक्तं महास्तोत्रं सपूर्णम् ॥

342

Sl. No 21489 महादेवीकवचम् (देवीकवचम्) Ms. No. P. 6972/3

Beginning :

भगवान् उवाच—

अरुणामरुणान्तरङ्गित × ×
धृतपाशाङ्कुशपुष्पबाणयापाम् ।
अणिमादिभिरावृतां मयूखैः
अहवित्स्येव (?) विभावयेद्भवा × × ॥

End :

य इदं कवचं हिव्यं पठेद्वा × × हितः ।
पुत्रान् पुत्रप्रदा × × क्षेत्रं क्षेत्रेशवन्दिता ।
धातून् धातु × × पातु सर्वं सर्वेश्वरी उमा ॥

Colophon :

इति देवीकवच सम्पूर्णम् ॥

343

Sl. No. 21491 **महामारिकास्तोत्रम्** Ms. No. C. 3552

(स्कान्दीयम् – भगवत्याख्यानीयम)

Beginning :

महादेव नमस्तेऽस्तु मृत्युरूपा भवाम्यहम् ।
इत्युक्तां तत्समासेन श्रोतुमिच्छामि तद्वद ॥ १ ॥

सुरा ब्रह्मा तु मां दृष्ट्वा समाहूयाब्रवीद्वचः ।
शृणु मे वचनं मित्र कुरुष्वाथ च सादरम् ॥ २ ॥

End :

पुस्तकं पूजयेद्यस्तु श्रद्धावान् परया मुदा ॥२८॥
सोऽपि माङ्गल्यमाप्नोति तेहामुत्र परां गतिम् ।

सर्वं त्यक्त्वा साधयेदं यत्नेनापि धनैरपि ॥ २९ ॥
श्रोतव्यं परया भक्त्या सर्वकामार्थसिद्धये ॥

Colophon :

इती श्रीस्कान्दपुरणे भगवत्याख्याने षष्टोऽध्ययः ॥

344

Sl. No. 21492 **महामारिकास्तोत्रम्** Ms. No. C. 429/13A

Beginning :

अथ महामारिकास्तोत्रं लिख्यते—

ओं नमो भगवति महामारिके मृत्युरूपिणि सकुटुम्बं मामव स्वाहा इति महामन्त्रः ।

नमो देवि ....सर्वलोकभयङ्करि ।
सर्वदा सर्वतो मह्यं कृपां कुरु कृपाकरि ॥ १ ॥

मेरौ कैलासशिखरे हिमाद्रौ गन्धमादने ।
नित्यं प्रियकृताबासे मद्यमांसबलिप्रिये :

End :

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्राताः प्रणतास्स्म ताम् ॥ ७ ॥

Colophon :

इति महामारिकास्तोत्रं सम्पूर्णम ।

345

Sl. No. 21493 **महामारिकास्तोत्रम्** (भगवतीपुराणीयम्) Ms. No. C. 4585/8

Beginning:

अथ महामारिकास्तोत्रं लिख्यते । देवाः ऊचुः —

महादेवि नमस्तेऽस्तु मृत्युरूपा भवाम्यहम्
इत्युक्तं ते समासीनश्रोतु मिच्छामि तत्त्वतः ॥

देव्युवाच—

पुरा ब्रह्मा तु मां सृष्ट्वा समाहूयाब्रवीद्वचः ।
श्रुणु मे वचनं पुत्रि कुरुष्वाथ च सादरम् ॥ २ ॥

End :

एवं कृते विधानेन मारिकाशान्तिमुत्तमम् ।
जायते नात्र सन्देहः सत्यं सत्यं समीरितम् ॥२६॥

इत्येवं कथितं भक्त्या देवेभ्यः स्वात्मसम्भवम् ।

महात्म्य पठते यस्तु सोऽपि मङ्गलमाप्नुयात् ॥

Colophon :

इति श्रीभगवतीपुराणे भगवत्युक्ते महामारिका स्तोत्रंसम्पूर्णम् ॥

346

Sl. No. 21494 माहालक्ष्मीद्वादशनामस्तोत्रम् Ms No. C. 7552/22

Beginning :

श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा ।
तृतीयं कमला प्रोक्ता चतुर्थं लोकसुन्दरी ॥

End :

नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका ।
एकादशं महालक्ष्मीः द्वादशं भुवनेश्वरी ॥

+ + + + +

सर्वाभीष्टफलप्रदेति सततं नामानि ये द्वादश
प्रातः शुद्धतरा पठन्ति सततं सर्वान् लभन्ते शुभम् ॥

Colophon :

इति महालक्ष्मीहृदयं (?) सम्पूर्णम् ॥

347

Sl. No. 21495 माहालक्ष्मीनवरत्नमालिका Ms. No. P. 7637/7

(स्कान्दसनत्कुमारसंहितीया—अगस्त्यस्तुतिनवरत्नमालिका)

Beginning :

अगस्त्यस्तुतिनवरत्नमालिका । सूत उवाच—

कोल्हापुरे महालक्ष्मीं अगस्त्यो भगवानृषिः ।
अस्तौषीत् सुसमाराध्य मन्त्रसारमयोक्तिभिः ॥

अगस्त्य उवाच–

श्रीदेवि श्रितपारिजातचरणे श्रीचक्रराजेश्वरि !

End :

इति स्तुत्वा महालक्ष्मीमगस्त्येन महात्मना ।
सद्यः प्रत्यक्षतामेत्य ददावीप्सितसंपदम् ॥

अगस्त्यकीर्तितं स्तोत्रं यः पठेच्छुभवासरे ।
आयुष्मानपि विद्यावान् धनवान् भोगवान् भवेत् ॥

Colophon :

इति श्रीस्कान्दे पुराणे सनत्कुमारसंहितायां देवीखण्डे अगस्त्यविरचित– महालक्ष्मी-नवरत्नमालिकास्तोत्रं संपूर्णम् ॥

348

Sl. No. 21496 **महालक्ष्मीस्तोत्रम्** Ms No. C. 694/163
(विष्णुपुराणीयम्)

Beginning :

पराशर उवाच–

सिंहासनगतश्शुक्रस्सम्प्राप्य त्रिदिवं पुनः ।
देवाराज्ये स्थितो देवीं तुष्टावाब्जकरां तदा ॥

इन्द्र उवाच—

नमामि सर्वलोकानां जननीमब्धिसम्भवाम् ।
श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षस्थले स्थिताम् ॥

End :

एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥

इति सकलभूत्यवाप्तिहेतुः
स्तुतिरियमिन्द्रमुखोद्गता हि लक्ष्मीः ।
प्रतिदिनमिह पठ्यते नृभिः × × ×
× × सरे नतेह कदाचिदप्यलक्ष्मीः ॥

Colophon :

इति श्रीविष्णुपुराणे प्रथमांशे लक्ष्मीस्तुतिर्नाम नवध्यायः ॥

349

Sl. No. 21497 माहालक्ष्मीस्तोत्रम् Ms. No C. 4722/28

Beginning :

अथ महलक्ष्मीस्तोत्रप्रारम्भः—

श्रीपद्मा विकसत्सुपद्मनयना पद्मप्रिया पद्मिनी
श्रीपद्मासनाशोभिताब्जकरहृद्धासा सुपद्मासना ।
- मातस्त्वत्पदपद्मसेवनरताः धन्यास्तु पद्मा धुना (?)
श्रुत्वेत्थं शरणागतस्तव पदं त्वं देह्यभीष्टं मम ॥ १ ॥

End:

सरण्य उवाच—

शृणु राजम् प्रवक्ष्यामि सुगोप्यमपि दुर्लभम् ।
मां पृष्ट्वा न जनः कश्चित् संसारक्लेशमर्हति ॥ ३ ॥
इमं मन्त्रं मन्त्र × × सर्वकाम × × × साधकम् ।
गोप्याद्गोप्य— .... ॥

Colophon :

— — — —

350

Sl. No. 21504 महालक्ष्म्यष्टकम् (इन्द्रकृतम्) Ms. No. C 2966 12

Beginning :

इन्द्र उवाच—

अस्य श्रीमहालक्ष्म्यष्टकस्तोत्रस्य— महेन्द्रो भगवान् ऋषिः ; अनुष्टुप् छन्दः ; श्रीमहालक्ष्मीर्देवता । + + + विनियोगः । + + +

नमस्तेस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१॥

नमस्ते गरुडारूढे कोलासुरभयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोस्तु ते ॥२॥

End.

एककाले पठेन्नित्यं महापापविनाशनम ।
द्विकालं यः पठेन्नित्यं धनधान्य समन्वितः ॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥

Colophon :

इतीन्द्रकृतमहालक्ष्म्यष्टकं सम्पूर्णम ॥

351

Sl. No. 21506 माहासरस्वतीधेनुवागीश्वरीमन्त्रस्तोत्रम् Ms No. P. 2190/2

Beginning :

अस्य श्रीमहासरस्वतीधेनुवागीश्वरीमन्त्रस्यजमदग्नि ऋषिः; अनुष्टुप् छन्दः; श्रीमहा-सरस्वती धेनुवागीश्वरी देवताः; श्री बीजम; सौं शक्तिः; क्लीं कीलकम, + + + मम महासरस्वतीधेनुवागीश्वरी प्रसादसिद्धर्थे जपे विनियोगः ॥

End :

वक्ष्ये सारस्वतं स्तोत्रं वाक्प्रवृद्धिकरं परम् ।
लक्ष्मी विवर्धनं चैव विवादे विजयप्रदम् ॥

सदा सकललोगघ्नं (?) सर्वसम्पत्समृद्धिदम् ।
सर्वपापक्षयकरं भक्ताभीष्टफलप्रदम् ॥

Colophon :

इति × × × तन्त्रे महासरस्वतिधेव गीश्वरीस्तोत्रं संपूर्णम् ।।

352

Sl. No. 21507 महिम्नस्तुतिः (देविस्तोत्रम) Ms. No. P. 3556/1

Beginning :

श्रीदुर्वासा उवाच -

मातस्ते महिमा वक्तुं शिवेनापि न शक्यते ।
भक्त्याऽहं स्तोतुमिच्छामि प्रसीद मम सर्वदा ।।
श्रीमातास्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णव × × × × × × × ।
× × × × × × × ×
त्रिकोण- निलयां ज्योतिर्मयां वाङ्मयम् ।। १ ।।

End :

छत्रं चामरयोर्युगं व्यजनमादर्शः तथामङ्गलः
× × × × × × समर्पिता तव ।
× × × × × × × × ×
× × × शिवे सन्तुष्टये कल्प्यताम ।।६४।।

इक्षुकोदण्डपुष्पेषुपाशांकुशकरोज्वलाम् ।
उद्यत्सूर्यनिभां वन्दे महात्रिपुरसुन्दरीम ।। ६५ ।।

Colophon :

— — — —

353

Sl. No 21508 मातङ्गीकवचम् (रुद्रयामलस्थम्) Ms. No. C. 596

Beginning :

ओं मातङ्गी मातरिके मधुमथनाराधिते महामाये मोहिनि मोहप्रमथिनि मन्मथमथनप्रिये नमस्तेऽस्तु ।।

End :

जङ्घाघटी च पादौ च गुल्फौ द्वे च दयायुता ।
सर्वदा सर्वदा पातु सुमुखी सर्वकामना ॥

इत्येतत्कवचं देवि कथितं यत्नतस्त्वय ।
ज्ञात्वैतत्सर्वमाप्नोति साधको नात्र संशयः ॥

Colophon :

इति रुद्रयामलोक्तं मातङ्गीकवचं समाप्तम् ॥

354

Sl. No. 21 09 माधवस्तवराजः Ms. No. C 461/9

(वायुपुराणे माघमाहात्म्यीयः)

Beginning :

स्तोत्रमेतन्महापुण्यं यत्त्वयोक्त द्विजोत्तम ।
माधवस्तवराजं तु श्रोतुमिच्छामहे वयम् ॥

End :

यः पठेत्पुण्यकालेषु स्तवराजं मनुम् सदा
कल्पकोटिसहस्रेषु मोदते विष्णुमन्दिरे ॥

Colophon :

इति श्रीवायुपुराणे माघमाहात्म्ये पञ्चविंशोऽध्यायः ॥

355

Sl. No. 21511 मार्कण्डेयाष्टकम् Ms. No. P. 5594/3

Beginning :

मार्कण्डेयपुराणे मार्कण्डेय उवाच—

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।

नमामि शिरसा देवं किन्नो मृत्युः करिष्यति ॥

End:

स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारिणम् ।
नमामि शिरसा देवं किन्नो मृत्युः करिष्यति ।।

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति सत्यमेदिति प्रभुः ।।

Colophon :

— — — —

356

Sl. No. 21514 मृत्युञ्जयकवचम् (दधीच्युक्तम्) Ms. No. C. 3557/3

Beginning :

श्रो दधीचिरुवाच—

कवचं देवदेवस्य वक्ष्ये शृणु नराधिप ।
येनावृतो महद्दुःखैर्मुक्तो मुक्तिं च विन्दति ।।१।।

ध्येयः श्रीमान् महादेवः साम्बः संसारमोचकः ।
पवित्रहृदयैश्शुद्धैर्भस्मरुद्राक्षभूषणैः ।।२।।

End :

श्रीरुद्रकवचं जप्त्वा कृत्वा रुद्राभिषेचनम् ।
जप्त्वा पञ्चाक्षरं शैवं निष्पापो जायते नरः ।।

+ + + + +

अनेन कवचेनैव संवृतः स ययौ हरिः ।
ततस्तेन जयं प्राप्तः कवचस्य प्रभावतः ।।

Colophon :

इति मृत्युञ्जयकवचं सम्पूर्णम् ॥

357

Sl. No 21515 मृत्युञ्जयकवचम् (शारदातिलकीयम्) Ms. No C. 3589

Beginning :

अस्य श्रीमृत्युञ्जयमहामन्त्रस्य— मार्कण्डेय ऋषिः ; मृत्युञ्जयो देवता ; ओं बागं जुं शक्तिः ; सः कीलकम् मम मृत्युञ्जयप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

उकारोजानुयुगलं अनुस्वारस्तु गुह्यकम् ।
सकारः सर्वसर्गान्तः पादौ पातु स्वयं प्रभुः ।

इत्येतन्मन्त्रकवचां अ × न्ते तु सकृज्जपेत् ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं यथा प्रिये ॥

Colophon :

इति शारदातिलके मृयुञ्जयमन्त्रकवचां सम्पूर्णम् ।

358

Sl. No. 21516 मृत्युञ्जयस्तोत्रम् Ms. No. B. 326/7

(स्कान्दे - रुद्रस्तुतिः – श्रीकृष्णोक्तः)

Beginning:

श्रीकण्ठं दक्षिणामूर्तिं सच्चिदानन्दविग्रहम् ।
स्मरामि सततं साम्बं किन्नो मृत्युः करिष्यति ॥

श्रीमद्गुरुपुराधीशं श्रीमन्मणिपुरेश्वरम् ।
स्मरामि सततं साम्बं किन्नो मृत्युः करिष्यति ॥

End :

मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
अमृतेशाय शर्वाय महादेवाय ते नमः ॥

Colophon :

इति स्कान्दपुराणे श्रीकृष्णप्रोक्तमृत्युञ्जयस्तोत्रं सम्पूर्णम् ।

359

Sl. No. 21517 मृत्युञ्जयस्तोत्रम् Ms. No. C. 694/15

(स्कन्दीयम् श्रीकृष्णप्रोक्तम)

Beginning :

अष्टमूर्तिं वीरभद्रं दक्षाध्यच्छिन्नसूत्रकम् ।
स्मरामि सततं साम्बं किं नो मृत्युः करिष्यति ॥

त्रयी मूर्तिं त्रिनयनं त्रिपुण्ड्राङ्कितमस्तकम् ।
स्मरामि सततं साम्बं किं नो मृत्युः करिष्यति ॥

End

इदं मृत्युञ्जयस्तोत्रं सदा भक्त्या पठेन्नरः ।
मृत्युपापारिभीत्यक्त्वा शिवसायुज्यमाप्नुयात् ॥

मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
अमृतेशाय शर्वाय महादेवाय ते नमः ॥

Colophon :

इति स्कान्दपुराणे श्रीकृष्णप्रोक्तमृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥

360

Sl. No. 21519 मृत्युञ्जयस्तोत्रम् Ms. No. C. 694/137

(मार्कण्डेयपुराणीयम् विष्णुदेवताकम)

Beginning :

नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किं नो मृत्युः करिष्यति ॥

गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवं च प्रपन्नोऽस्मि किं मृत्यु: करिष्यति ॥

End :

श्री भगवानुवाच—

हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्यादपि राजमानं
मृत्युं न योगी चितवासुदेवम् ॥

Colophon :

इति मार्कण्डेयपुराणे मृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥

361

Sl No. 21520 **मृत्युलङ्गूलस्तोत्रम्** Ms. No. P. 7825/2

(वसिष्ठोक्तम् – उपनिषद्रूपम)

Beginning :

अस्य श्रीमृत्युलाङ्गूलस्तोत्रमन्त्रस्य- उलूखल ऋषि: ; कालाग्निरुद्रो देवता ; अनुष्टुप् छन्द: ; मृत्यूपस्थाने विनियोग: ।

ब्रह्मण्यं भुवनेशमादिपुरुषं सान्तं शिवं शाश्वतं ।
सर्वाम्नायशिरो × × चात्मविभवं सद्भक्तचिन्तामणिम् ॥

End :

भवत्यष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सिद्धिर्भवति । यदि कस्य च न ब्रयात् श्विभी कुष्ठी कुनखी भवति । दीप्यमानं गृह्णीयात् । अथो भवति ; पङ्भिर्मोसी: प्रमीड्यते ; नश्यति मन्त्री नश्यति मन्त्र: ; इत्याह भगवान् महादेवो वसिष्ठ: ॥

Colophon :

362

Sl No 21521 . यमस्तोत्रम् Ms. No. C. 3041/9

Beginning :

महाराजं यमं दृष्ट्वा किञ्चिद्भीतो महीसुरः ।
पतित्वा दण्डवद्भूमौ तुष्टावायुर्विवृद्धये ॥

ब्राह्मण —

धर्मराज नमस्तेऽस्तु साक्षाद्धर्मस्वरूपिणे ॥

End :

औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय ते नमः ॥

Colophon :

— — — — —

363

Sl. No. 21522 याज्ञवल्क्यदशनामस्तोत्रम् Ms. No. C. 2368/2

Beginning:

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभुम् ॥

जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम् ।
आनन्दनिलयं वन्दे योगानन्दमुनीश्वरम् ॥

End:

हरिहरप्रभवे नमः । जितेन्द्रियायनमः । जितक्रोधाय नमः । सदा ध्यानपरायणाय नमः । आनन्दनिलयाय नमः । योगानन्दमुनीश्वराय नमः ॥

Colophon :

इति याज्ञवल्क्यदशनामस्तोत्रं सम्पूर्णम् ॥

364

Sl. No. 21523 **रजस्वलास्तोत्रम्** Ms No. P 4538/21

(रुद्रयामलीयम् - कालीतन्त्रान्तर्गतम्)

Beginning :

अस्य श्री रजस्वलास्तोत्रमहामन्त्रस्य ईश्वर ऋषि ; अनुष्टुप् छन्दः ; रजस्वला देवता ; × × क्लीं बीजम ; × क्लीं शक्ति ; ह्रीं ह्रींक्लं कीलकम् ; रजस्वलादेवताप्रीत्यर्थे जपे विनियोगः ॥

End :

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
दुर्जनेभ्यः सदा गोप्यं जननीजारगर्भवत् ॥

इदं स्तोत्रं पठेद्यस्तु सर्वकामफलप्रदम् ।
सर्वविद्यां लभ × × च मुच्यते नात्र संशयः ॥

Colophon :

इति रुद्रयामले उमामहेश्वरसंवादे कालिकातन्त्रे त्रिपुरारजस्वलास्तोत्रं सम्पूर्णम् ॥

365

Sl. No. 21524 **राजराजेश्वरीकवचम्** Ms. No. P. 7982/59

(बृहद्वामकेश्वरीयम त्रिपुरसुन्दरीकवचम्)

Beginning :

अस्य श्री राजराजेश्वरीत्रिपुरसुन्दरीकवचमहामन्त्रस्य-- दक्षिणामूर्तिः ऋषिः ; पङ्क्तिश्छन्दः ; श्रीराजराजेश्वरी देवता । + + + श्रीराजराजेश्वरीप्रसादसिध्दयर्थे जपे विनियोगः ॥

End:

वैष्णवं लोकमासाद्य भुक्त्वा भोगान् यथेप्सितान् ।
तं त्यक्त्वा वैष्णवं लोकं मम लोकमुपेत्य च ॥

उपभोगेषु युक्तोऽपि जीवन्मुक्तस्तु जायते ।
मम स्वरूपतामेत्य पश्चाद्देवीपुरं व्रजेत् ॥

Colophon :

इति बृहद्धामकेश्वरतन्त्रे उमामहेश्वरसंवादे राजराजेश्वरीकवचं सम्पूर्णम् ॥

366

Sl. No. 21525 राजराजेश्वरीकवचम् Ms. No. P. 8032/44

Beginning :

भगवन् देवदेवेश लोकानुग्रहकारक ।
त्वत्प्रसादान्महादेव श्रुता मन्त्रास्त्वनेकशः ॥१॥

÷ ÷ ÷ ÷ ÷

राजराजेश्वरीदेव्याः कवचं सूचितं पुरा ।
श्रोतुमिच्छामि तत्त्वतः कथयस्व मम प्रभो ॥९॥

End :

मद्वक्त्रनिर्गतमिदं कवचं सुपुण्यं
पूजाविधेश्च परतो यदि वा परत्र ।
सौभाग्यभोगललितानि सुखानि भुक्त्वा
देव्याः पदं भजति तत्पुनरन्त्यकाले ॥

Colophon:

367

Sl. No. 21526 राजराजेश्वरीस्तोत्रम् Ms. No P. 4447/3

(दिव्यमङ्गलविग्रहध्यानम् – रुद्रयामलीयम्)

Beginning :

श्री देव्युवाच—

देव देव महादेव सच्चिदानन्दविग्रह ।
पञ्चकृत्यपरेशान चिन्मयानन्ददायक ॥

श्री राजराजेश्वरी × × श्रीत्रिपुरसुन्दरी ।
तस्याः ध्यानं ममाचक्ष्व यदि ते करुणा मयि ॥

End :

भुञ्जानो विविधान् भोगान् मूर्तिमानिव मन्मथः ।
सृष्टिस्थित्युपसंहारकर्ता शिव एव शिवः परः ॥

राजराजेश्वरीरूपो राजराजाभिवन्दितः ।
कुलकोटिं समुध्दृत्य शिवयोरैक्यमाप्नुयात् ॥

Colophon:

इति श्रीरुद्रयामले दिव्यमङ्गलविग्रहध्यानं संपूर्णम् ॥

368

Sl. N. 21528 राजराजेश्वरीस्तोत्रम् Ms. No. P. 9982/8

(रुद्रयामळीयम्)

Beginning :

देवदेव महादेव: सच्चिदानन्दविग्रह ।

पञ्चकृत्य परेशान परमानन्द चिन्मय ॥१॥

श्री राजराजेश्वरी या श्रीत्रिपुरसुन्दरी ।

तस्याः ध्यानं ममाचक्ष्व यदि ते करुणा मयि॥

End :

भुञ्जानो विविधान् भोगान् मूर्तिमानिव मन्मथः ।

सृष्टिस्थित्युपसंहर्ता × × व एव शिवः परः ॥८९॥

राजराजेश्वरीरूपो राजराजाभिवन्दितः ।

त्रिःसप्तकुलमुद्धृत्य शिवयोरैक्यमाप्नुयात् ॥

Colophon :

इति श्रीरुद्रयामले हरपार्वतीसंवादे राजराजेश्वरीस्तोत्रं सम्पूर्णम् ॥

369

Sl. No. 21529 राजराजेश्वरीस्तोत्रम् Ms. No. P. 281/2

(राजराजेश्वरीमन्त्रीयम् – दिव्यमङ्गलध्यानम्)

Beginning :

अस्य श्रीराजराजेश्वरीस्तोत्रमहामन्त्रस्य दक्षिणामूर्तये ऋषये नमः + +

ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं

हेमाभां पीतवस्त्रां करकलितलसद्धेमवर्णां वराङ्गीम् ।

सर्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं

श्रीविद्यां शान्तमूर्तिं सकल .... तां सर्वसम्पत्प्रदात्रीम् ॥

End :

सृष्टिस्थित्युपसंहारकर्ता शिव...... इवापरः ।

राजराजेश्वरीरूपो राजराजादिवन्दितः ॥

कुलकोटीः समुध्दृत्य शिवयोवैक्यमाप्नुयात् ॥

Colophon :

उमामहेश्वसंवादे राजराजेश्वरीतन्त्रे मोक्षप्रदे दिव्यमङ्गळध्यानं नाम षट्त्रिंशः पटलः ॥

370

Sl. No. 21530 राजलक्ष्मीस्तोत्रम् **Ms. No. P. 5756/3**

(पाद्मीयम्)

Beginning :

अस्य श्रीराजलक्ष्मीस्तोत्रमहामन्त्रस्य– विश्वामित्रभगवान् ऋषिः ; अनुष्टुप् छन्दः ; श्रीराज्यलक्ष्मीः देवता ; मम राज्यलक्ष्मीप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

चतुर्मासं जपेत् स्तोत्रं षट्विद्या हि प्रजायते ।
पञ्चमासं जपेत स्तोत्रं देवेन्द्रत्वं हि जायते ॥
षण्मासं जपतः स्तोत्रं त्रिपजा चरिजायते (?) ॥

Colophon:

इति श्रीपाद्मे पुराणे राज्यलक्ष्मीस्तोत्रं सम्पूर्णम ॥

371

Sl. No. 21533 रामकवचम् **Ms. No. P. 895/5**

Beginning :

ईश्वर उवाच–

नमस्कृत्वा रामचन्द्रं सर्वभूतान्तरस्थितम् ।
वदामि रामकवचं सर्वरक्षाकरं परम् ॥

विविक्तदेशे विमले गोष्ठे देवालये गिरौ ।
नदीतीरेऽश्वत्थमूले नवम्यां गुरुवासरे ॥

End:

कवचश्रवणेनैव मुच्यते सर्वपातकैः ।
इहानेकविधान् भोगान् प्राप्नोति श्रियमुत्तमाम् ॥
अन्ते सायुज्यमाप्नोनि सदा सद्भावबोधितः ॥

Colophon :

– – – – – – – –

372

Sl. No. 21540 **रामकवचम्** **Ms. No. P. 8036/1**

(रामानुस्मृतिः – ब्रह्मयामिलीयम्)

Beginning :

भगवन् सर्वदेवेश सर्वदेवनमस्कृत ।
सर्वं मे कथितं देव यद्यहं तव वल्लभा ॥

ईश्वरः–

शृणु वक्ष्यामि देवेशि कवचं परमाद्भुतम् ।
अत्यन्तगोपितं गुह्यं सर्वमन्त्रौघ विग्रहम् ॥

End :

इदं कवचमज्ञात्वा यो जपेद्राममन्त्रितम् ।
शतलक्षं प्रजप्यापि न मन्त्रस्सिद्धिमाप्नुयात ॥
न शस्त्रघातमाप्नोति सोऽचिरन्मृत्युमाप्नुयात् ।
तस्मात्सर्वप्रयत्नेन सुगाढं धारयेत्सुधीः ॥

Colophon:

इति श्रीब्रह्मयामळे उमामहेश्वरसंवादे त्रैलोक्यमोहनं नाम रामकवचं सम्पूर्णम् ॥

373

Sl. No. 21540 श्रीरामकवचम् **Ms. No. P. 10049/4**

Beginning:

अस्य श्रीरामकवचस्तोत्रमहामन्त्रस्य - वृद्धकौशिक ऋषिः ; अनुष्टुप् छन्दः । श्री-रामचन्द्रः परमात्मा देवता ; रां बीजं रीं शक्तिः ; रूं कीलकम् ; मम श्रीरामचन्द्र-प्रसादसिध्यर्थे जपे विनियोगः । + +

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं × × टमकुटमण्डितम् ॥१॥

End:

यः पठेद्धारयेद्यस्तु करस्थाः सर्वसिद्धयः ।
×××पामेदं यो रामकवचं पठेत् ॥१४॥
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ।
तथा लिखितवस्नान्त्रः प्रबुध्दो वृद्धकौशिकः ॥१५॥

य एतत्कवचं दिव्यं पठेद्विद्वान् विचक्षणः ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥१६॥

Colophon:

इति श्रीरामकवचं सम्पूर्णम् ॥

374

Sl. No. 21553 रामकवचम् (हिरण्यगर्भसंहितीयम्) **Ms. No. P. 1716/3**

Beginning:

× × वाच—

भगवन् परमानन्द तत्त्वज्ञ करुणानिधे ।
स्वरूपं रामचन्द्रस्य कवचं वद मे प्रभो ॥

अगस्त्यः—

शृणु वक्ष्यामहं स × × × × × ।
अद्वैतानन्दचैतन्य × × × सम् ॥

End :

अपुत्रो लभते पुत्रान् निर्धनो धनिको भवेत् ।
य यं कामं कामयते कामं तं तं प्राप्नोति सर्वथा ॥

Colophon :

इति श्रीहिरण्यगर्भसंहितायां परमरहस्ये अगस्त्यप्रोक्तं श्रीरामवज्रकवचं समाप्तम् ॥

375

Sl. No. 21554 रामदुर्गाकवचम् Ms. No. C. 4341

(कौशिकऋषिरचितम)

Beginning :

अस्य श्रीरामदुर्गास्तोत्रमन्त्रस्य- कौशिक ऋषिः ; अनुष्टुप् छन्दः ; श्रीरामो देवताः ; श्रीरामप्रीत्यर्थं सर्वदेहरक्षणार्थे जपे विनियोगः ॥

श्रीराघवं × × मे × × ।
× × × × नमाम्यहम् ॥

End :

यः स्मरेद् भयकाले तु शुभं शत्रुविनाशनम् ।
रामदुर्गं पठेद् भक्त्या सर्वोपद्रवनाशनम् ॥
सर्वसम्पत्प्रदं तरणं स गच्छेद्वैष्णवं पदम् ॥

Colophon :

इति श्रीकौशिकऋषिविरचितं श्रीरामदुर्गस्तोत्रकवचमन्त्रं समाप्तम् ॥

376

Sl. No. 21555 रामकवचम् Ms. No. P. 10317/3

(तत्त्वसंग्रहरामायणान्तर्गतम्— वज्रकवचम्)

Beginning :

अस्य श्रीरामवज्रकवचस्तोत्रमन्त्रस्य— अगस्त्यः भगवान् ऋषिः ; अनुष्टुप् छन्दः : श्रीरामचन्द्रो देवता ; रां बीजं ; श्रीं शक्ति ; ऐं कीलकं ; श्रीरामचन्द्रप्रसादसिध्यर्थे जपे विनियोगः ॥

श्रीरामं जानकीजानिं स्वर्णसिंहासनस्थितं ।
प्रणतार्तिहरं ध्यायेत् × × × × मम् ॥

End :

श्रीमद्रघुपतिं क्रुध्दमैन्द्ररथस्थितम् ।
श्रीरामवज्रकवचपठनाद्विजयी भवेत् ॥
आयुरारोग्यमैश्वर्यं भवेत्तस्य न संशयः ॥

Colophon :

इति श्रीतत्त्वसंग्रहरामायणे किष्किन्धाकाण्डे श्रीरामवज्रकवचकथनं नाम चतुर्दशः सर्गः ॥

377

Sl. No. 21556 रामवज्रकवचम् Ms. No. P. 5766/3

(ब्रह्माण्डीयम्— ब्रह्मनारदसंवादरूपम्)

Beginning :

रामाय रामभद्राय रामचन्द्राय शाश्वते (!) ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य ईश्वर ऋषिः । + + + + रामकवचस्तोत्र-मन्त्रपठनं करिष्ये -

इन्दीवरश्यामलमायताक्षं
धनुर्धरं नीलजटाकलापिम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां
निषेव्यमाणं प्रणतोऽस्मि रामम् ॥

End :

रामेति रामभद्रेति रामचन्द्रं सदा स्मरन् ।
नरो न लिप्यते पापैः भुक्तिं मुक्तिञ्च विन्दति ॥
+ + + + +
वज्रपञ्जरनामैव यो रामकवचं पठेत् ।
आहिताग्निस्सर्वत्र लभते जयमङ्गलम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीरामकवचस्तोत्रं समाप्तम् ॥

378

Sl. No. 2155 रामदिनचर्या (पाद्मीया) Ms. No. C. 3732/3

Beginning :

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान्गुरून्
श्रीमल्लक्ष्मणयोगिपुंगवमहापूर्णं मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥

End :

एवं प्रशासिता भूमिं राघवस्स महेश्वरि ।
भक्त्ययाद्वर्षपाहस्र रममाणश्च सीतया ॥

दिनचर्यामिमां शृण्वन् सर्वपापैः प्रमुच्यते ।
सर्वकामानवाप्नोति सोऽश्नुते परमां गतिम् ॥

Colophon :

इति पाद्मपुराणे उत्तरकाण्डे उमामहेश्वरसंवादे एकषष्टितमोऽध्यायः ॥

379

Sl. No. 21559 रामगायत्रीस्तोत्रम् Ms No P. 2706/5

(रामायणान्तर्गतम्)

Beginning :

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥१॥

स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः ।
ऋषिभिः पूजितः सम्यग्यथेन्द्रो विजयी पुरा ।२।

End :

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत् ।
तामेव रात्रिं सीतापि प्रसूता दारकद्वयम् ।२४॥

इदं रामयणं काव्यं गायत्रीबीजसंयुतम् ।
त्रिसन्ध्यं यः पठेन्नित्यं सर्वपापैः प्रमुच्यते ।।२७॥

Colophon :

इत्यार्षे श्रीमद्रामायणे वाल्मीकिप्रोक्ते आदिकाव्ये चतुर्विंशतिरामगायत्रीस्तोत्रं समाप्तम् ॥

380

Sl. No. 21560 **रामदुर्गस्तोत्रम्** Ms. No. C. 227/6

Beginning :

श्रीरामो रक्षतु प्राच्यां रक्षेद्याम्यां च लक्ष्मणः ।
प्रतीच्यां भरतो रक्षेदुदीच्यां शत्रुसूदन. ॥

ऐशान्यां जानकी रक्षेदाग्नेय्यां सूर्यनन्दनः ।
बिभीषणस्तु नैऋत्यां बायव्यां बायुनन्दनः ॥

End :

रटद्भिरथ धावद्भिः समरे रावणं प्रति ।
श्रीरामशत्रुसंघानि जय मर्दय घातय ॥
भूतप्रेतपिशाचादीन् श्रीराम भुवि नाशय ॥

Colophon:

इति विश्वामित्रकृतं रामदुर्गं समाप्तम् ॥

381

Sl. No. 21561 **रामद्वादशनामस्तोत्रम्** Ms. No. P. 6623

(ब्रह्माण्डीयम् उमामहेश्वरसंवादरूपम्)

Beginning :

शुक्लाम्बरधरं + + । + + शान्तये ॥

× ॐ श्रीरामद्वादशनामस्तोत्रमहामन्त्रस्य- विश्वामित्र ऋषिः ; अनुष्टुप् छन्दः ; रामचन्द्रो देवता । + +

प्रथमं श्रीधरं विद्यात् द्वितीयं × × चात्मजम् ।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम् ॥

End :

ब्रह्महत्या सुरापानं गोहत्यादिनिवारणम् ।
सप्तवारं पठेन्नित्यं पापं तस्य न × × × ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उमामहेश्वरसंवादे रामद्वादशनामस्तोत्रं समाप्तम् ॥

382

Sl. No. 21562 **रामद्वादशनामस्तोत्रम्** Ms. No. P. 6808/2

(स्कान्दीयम् – उमामहेश्वरसंवादरूपम्)

Beginning :

प्रथमं श्रीधरं विद्यात् द्वितीयं रघुनन्दनम् ।
तृतीयं रामचन्द्रं च चतुर्थं राम× ×कम् ॥
पञ्च × × × × तम् ॥

End :

उपरागे जले स्थित्वा नरो जप्त्वा विशेषतः ।
अश्वमेधफलं लब्ध्वा ब्रह्मलोकं स गच्छति ॥

Colophon :

इति स्कान्दे उमामहेश्वरसंवादे उत्तरखण्डे श्रीराम × × नामस्तोत्रं समाप्तम् ॥

383

Sl. No. 21563 राममङ्गलम् Ms. No. P. 1716/11

Beginning :

श्रीसाकेतनिवासाय दासानुग्रहकारिणे ।
कौसल्यागर्भजाताय सीतारामाय मङ्गलम् ॥

कौशिकक्रतुरक्षार्थं मायामारीचघातिने ।
अहल्यापापनाशाय रघुनाथायमङ्गलम् ॥

End :

एतद्धि मङ्गलं दिव्यं रामचन्द्रस्य धीमतः [भक्तितः]।
पठित्वा सर्वभोगान्वै लभते नात्रसंशयः ॥

श्रीरामचन्द्रः श्रितपरिजातः
× × × × ।
× × × × श्रीकण्ठप्रिय
× × × श्रितजनस्वर्गापवर्गप्रदम् ॥

Colophon :

इति श्रीवाल्मीकिविरचितं श्रीराममङ्गलस्तोत्रं समाप्तम् ॥

384

Sl No 21565 श्रीराममङ्गलम् Ms. No. P 8760/11

Beginning :

मङ्गलं कोसलेन्द्राय महनीयगुणात्मने ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥१॥
वेदवेदान्तवेद्याय मेघश्यामलमूर्तये ।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥२॥

End :

विभीषणगतप्रीत्या विश्वाभीष्टप्रदायिने ।
जानकीप्राणनाथाय मम नाथाय मङ्गलम् ।।

नळहस्तमवलम्ब्य पाणिना
मन्दमन्दमरविन्दलोचनः ।
सञ्चरन् कनककिङ्किणीरवः
सन्ततं मम तनोतु मङ्गलम् ।।

Colophon :

— — — —

385

Sl. No. 21569 रामहिम्नस्तोत्रम् Ms. No. C 3693/1

(रामार्चनचन्द्रिकीयम्)

Beginning :

अभिषिक्तस्तदा रामो वासिष्ठाद्यैर्महर्षिभिः ।
शुशुभे सीतया सार्धं (देव्या) नारायण इव श्रिया ।।

अत्यमरयतयातीतमुपमातीतमुज्ज्वलम् ।
दृष्ट्वा तुष्टाव × × × माशंकरोदृष्टमागतः ।।

End :

अर्चिता मानवास्सर्वे नरवानरदेवताः ।
बिसृष्टा रामचन्द्रेण प्रीत्या परमया युताः ।।

इत्थं विसृष्टाः × लते च सर्वे
स्वं स्वं पदं जग्मुरतीवहृष्टाः ।

तुष्टाः पठंनस्स्तवमीश्वरोक्तं
रामं स्मान्ते स्म रविस्वरूपम् ॥

Colophon :

इति श्रीरामार्चनचन्द्रिकायां श्रीरामहिम्नस्तवः समाप्तः ॥

386

Sl. No. 21570 राममानसपूजास्तोत्रम् Ms. No. P. 1716/29
(हिरण्यगर्भसिद्धन्तीया)

Beginning :

हिरण्यगर्भसिद्धान्तरहस्ये मुनिसत्तम ।
पूजाविधिं प्रवक्ष्यामि रामचन्द्रस्य नारद ॥

End:

ब्रह्मानन्दैकविज्ञानं त्वन्नामस्मरणं सदा ।
त्वत्पादाम्बुजभक्तिं च देहि मे रघुनन्दन ॥

Colophon :

इति हिरण्यगर्भसिद्धान्ते ब्रह्मनारदसंवादे राममानसपूजाविधिः ॥

387

Sl. No. 21571 राममानसपूजास्तोत्रम् Ms. No. C. 3732/8
(वैनतेयसंहितीयाम्)

Beginning :

ऋषयः ऊचुः—

श्रीरामयजनं सांगं विना जन्मनिरर्थकम् ।
विप्राणां वेदविदुषामपि योगरतात्मनाम् ॥

येन पूजाफलं सांगमुपायान्तरमस्ति चेत् ।
तद्वदस्व महाभाग बृहस्पतिसुत प्रभो ॥

End :

नास्तिकाय न दातव्यं अपि सर्वत्र धायना (?) ।
सीतारामार्चनं स्तोत्रं श्रुतिसारार्थसंग्रहम् ॥
जीवन्मुक्तो भवेन्नित्यं जप्त्वा भक्तो न संशयः ॥

Colophon :

इति श्रीवैनतेयसंहितायां परमरहस्यगोपनं श्रीराममानसपूजास्तोत्र समाप्तम् ॥

388

Sl. No. 21574 **रामरक्षास्तोत्रम् (कौशिकप्रोक्तम्)** **Ms. No. P. 1716/16**

Beginning :

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनं ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥

End :

श्रीराम राम रघुनन्दन राम राम
श्रीराम राम भरताग्रज रामराम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥

Colophon :

इति कौशिकप्रोक्तं रामरक्षास्तोत्रं सम्पूर्णम् ॥

389

Sl. No. 21579 रामवेदपादस्तवः Ms. No. P. 5920/6

(भरद्वाजकृतम्)

Beginning :

भरद्वाज उवाच–

श्रीमद्रामं रघूत्तमं सच्चिदानन्दलक्षणम् ।
कवतं करुणावन्तं गायत्र्या नमसा गिरा ॥ १ ॥

रामे दूर्वादळश्यामो जानकीकनितोज्वला (?) ।
भाति मध्द्दये मेघाविद्युल्लेखेव भास्वरा ॥ २ ॥

End

माणिक्यमञ्जीरपदारविन्दां
भक्तेम्पदारकरारविन्दाम् (?) ।
बालार्कसम्फुल्लमुखारविन्दां
देवीं भजे राघववल्लभां ताम् ॥ ३४ ॥

Colophon :

इति श्रीभारद्वाजकृतश्रीरामवेदपादस्तवं संपूर्णम् ॥

390

Sl. No. 21582 रामषडक्षरीस्तोत्रम् Ms. No P. 5921/3

Beginning :

अस्य श्री रामषडक्षरीस्तोत्रमहामन्त्रस्य– वाल्मीकिः भगवान् ऋषिः; अनुष्टुप् छन्दः; श्रीरामचन्द्रः परमात्मा देवता; ह्रीं बीजम्; ह्रीं शक्तिः; हूँ कीलकम्; श्रीरामचन्द्रप्रीत्यर्थे रामषडक्षरीमन्त्रस्तोत्रजपे विनियोगः ।

ध्यायामि रामं श्रीरामं कौसल्यानन्दवर्धनम् ।
जानकीलक्ष्मणाभ्यां च सहितं × × × तेम् ॥

End :

प्रजानां पालकायास्तु सीतारामय मंगलम् ।
मङ्गलं कोसलेन्द्राय महनीयगुणात्मने ॥
चक्रवर्तितनूजाद सार्वभौमाय मङ्गलम् ॥

Colophon :

-- -- — —

391

Sl. No. 21583 रामसप्तश्लोकी Ms. No. P. 5257/5

(रामसप्तर्षिस्तोत्रम्)

Beginning :

कश्यपः—

नित्यं किं धावसि चलविषयाननुभवितुं
सुखलेशाभासानुरुतरदुःखानपि दुस्साहानत्यन्तायासं भो ।
एतानपि परिहार सीतापतिमाशु परिचरेयम्
मूलानुग्रहभयङ्कररौरवनारकगतिहेतून् ॥ १ ॥
भो चेतः श्रीरामं भज रघुरामं भज शरणम्

End :

वशिष्ठः—

नित्यानन्दं नित्यमनन्तं ब्रह्म परात्परमव्ययममलम्
शुद्धं बुद्धं शान्तं शाश्वतमप्रमेयमनाद्यन्तं (सर्वासामुपनिषदां) अर्थम् ।
श्रीरामः सीतापतिरिति हरिहरचतुराननादिभिर्गीयते यः
तस्य हि द सोऽहं भो चेतः श्रीरामं भज रघुरामं भज शरणम् ॥७॥

एवं स्तुत्वा रामचन्द्रं मुनीन्द्राः
प्रत्येकं ते भक्तिनम्राः तदानीम् ।

आपन्नार्तिध्वान्तभानुं प्रपन्नाः
तूष्णीमासन् रामपादैकनिष्ठाः ॥

Colophon :

— — — —

392

Sl. No. 21584 **रामस्तवराजः** Ms. No. C. 36932

(अगस्त्योक्तम्)

Beginning:

अगस्त्यः—

मन्त्रस्वरूपं वक्ष्यामि शृणु नारद तत्त्वतः ।
अकारादि मकारान्तं मन्त्रं बह्वर्णसंयुतम् ॥

षडक्षरात्मकं मन्त्रं तारकं ब्रह्मसंज्ञिकम् ।
राजेन्द्रराघवं रामं राजानं रघुपुङ्गवम् ॥

End :

अगस्त्यनारदप्रोक्तं यः पठेच्छृणुयादपि ।
स याति वैष्णवस्थानं रामचन्द्रप्रसादतः ॥

एवं स्तवं च ये मन्त्रं षट्सहस्रं दिने दिने ।
सहस्रं त्रिशतं वापि यथाशक्त्यनुसारतः ॥

Colophon :

इत्यगस्त्योक्त रामस्तवराजं सम्पूर्णम् ॥

393

Sl. No. 21587 रामस्तवराजः Ms. No C. 3732/1

(पाद्मपुराणीयः– नारदोक्तसनत्कुमारसंहितान्तर्गतः)

Beginning :

शुक्लांबरधरं + + + + + + + शान्तये ॥

अस्य श्रीरामचन्द्रस्तवराजमहामन्त्रस्य– सनत्कुमार ऋषिः; अनुष्टुप् छन्दः; श्री रामो देवता; सीता बीजम्; हनूमान् भक्तिः; श्रीरामप्रीत्यर्थे जपे विनियोगः ॥

End:

सकलभुवनरत्नं सर्वशास्त्रार्थरत्नं
समरविजयरत्नं सच्चिदानन्दरत्नम ।
दशमुखहररत्नं दानवारातिरत्नं
रघुकुलनृपरत्नं पातु मां रामरत्नम् ॥

Colophon :

इति श्री पद्मपुराणे सनत्कुमारसंहितायां नारदप्रोक्त श्रीरामस्तवराजस्समृद्धिमगमत् ॥

394

Sl No. 21590 रामस्तवराजः Ms. No. P. 10751/9

(ब्रह्माण्डीयः ब्रह्मनारदसंवादः)

Beginning :

सूत उवाच—

सर्ववेदार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

धर्मपुत्र उवाच—

भगवान् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
किं तत्त्वं किं परं जप्यं किं ध्यानं मुक्तिसाधनम् ॥

End :

श्रीरामचन्द्र रघुपुङ्गव राजवर्य
राजेन्द्र राम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन रामभद्र
दासोऽहमद्य भवतः शरणागतोऽस्मि ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे रामस्तवराजं संपूर्णम् ॥

395

Sl. No. 21592 **रामस्तवराजः(सनत्कुमारसंहितीयः)** **Ms. No. C. 2690**

Beginning :

अस्य श्रीरामचन्द्रस्तवराजस्तोत्रमन्त्रस्य– सनत्कुमार ऋषिः अनुष्टुप् छन्दः ; श्रीरामो देवता ; सीताबीजं हनूमान् शक्तिः ; श्रीरामप्रीत्यर्थे जपे विनियोगः । सूत उवाच–

सर्वशास्त्रार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

End:

रघवर तवमूर्तिर्मामकेमान् × ×
नरकगतिहरन्ते नामधेयं सुखे मे ।
अनिशमतुलभक्त्या मस्तके त्वत्पादाब्ज.
भवजलनिधिमग्न रक्ष मामार्तबन्धो ॥

रामरत्नमहं वन्दे चित्रकूटपतिं हरिम् ।
कौसल्याशुक्तिसम्भूतं जानकीकण्ठभूषणम् ॥

Colophon :

इति श्रीसनत्कुमारसंहितायां नारदोक्त श्रीरामस्तवराजस्तोत्रं समाप्तम् ॥

396

Sl. No. 21594 श्रीरामस्तवराजः **Ms. No. P. 5912/19**

(हिरण्यगर्भसंहितान्तर्गतः — नारदप्रोक्तः)

Beginning:

श्रीसूतः उवाच—

सर्ववेदार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् ।
धर्मः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

धर्मपुत्र उवाच—

भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
किं तत्त्वं किं परं जप्यं किं धनं मुक्तिसाधनम् ॥ +

\+ + + + +

श्रीवेदव्यास उवाच—

\+ +

श्रीरामेतिपरञ्जप्यं तारकब्रह्मसंज्ञकम् ॥

End:

इति श्रीरामचन्द्रस्य स्तवराजमनुत्तमम् ।
सर्वसौभाग्यसम्पत्तिदायकं मुक्तिदं शुभम् ॥

ब्रह्मपुत्रेण कथितं वेदानां सारमुत्तमम् ।
गुह्याद्गुह्यतमं दिव्यं तवस्मह कीर्तितम् ॥

यः पठेत् शृणुयाद्वपि + + + +
बीजं धर्मद्रुमस्या प्रभवतु भवतां भूतये राम नामः ॥

Colophon:

इति श्रीहिरण्यगर्भसंहितायां नारदोक्त श्रीरामस्तवराजः समाप्तः ॥

397

Sl. No. 21597 रामस्तवराजः Ms. No. P. 5788/16

Beginning :

अस्य श्रीरामस्तवराजस्तोत्रस्य– अगस्त्य ऋषिः श्रीरामः परमात्मा देवताः ; रां बीजम् रीं ; शक्तीः ; रूं कीलकं ; मम पापक्षयार्थे सकलकामार्थसिध्यर्थे स्तव जपे विनियोगः ।

End :

उत्फुल्लामलकोमलोत्पलदळशामाय रामामनः–
कामाय प्रथमाननिर्मलगुणारामाय रामात्मने ।
ध्यानारूढ मुनीन्द्रमानससरोहंसाय संसारविध्वं–
साय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥

Colophon :

इति श्रीरामस्तवराजस्तोत्रं सम्पूर्णम् ॥

398

Sl. No. 21598 रामस्तोत्रम् Ms. No. P 3816/10

Beginning :

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥
श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीकोनिरन्तरं मङ्गळमातनोतु ॥

End :

मुनिमानसहंसाय मानसौन्दरमूर्तये ।
सीताब्जपत्रनेत्राय सीतारामाय मङ्गळम् ॥

Colophon :

... — — —

399

Sl. No 21599 | रामस्तोत्रम् | Ms. No P. 5921/8

Beginning :

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारणे ॥

नमः सुग्रीवनाथाय अयोध्यापुरवासिने ।
जानकीप्राणनाथाय रामायापन्निवारिणे ॥

End :

नमः खरनिहन्त्रे ते कुम्भकर्णविदारिणे ।
दशकण्ठशिरच्छेत्रे रामायापन्निवारिणे ॥

नमः संग्रामभागाय प्रज्वलच्चित्रभानवे ।
जितरूपाय भक्तेषु रामायापन्निवारिणे ॥

Colophon :

— — — —

400

Sl. No. 21601 | रामस्तोत्रम् | Ms. No. P. 10746/4

(रामनमस्कारस्तोत्रम् – ब्रह्मयामलीयम)

Beginning :

षोडशैरुपचारैश्च रामं सम्पूज्यभक्तितः ।
पूजान्ते च नमस्कुर्यादेभिर्मन्त्रैर्दिनेदिने ॥

पङ्क्तिस्यन्दनभूपाल सुतयः फलशशाये ।
शेषवायवराहाय ससीताय नमो नमः ॥

End :

एवमष्टां संयुक्तो नमस्कुर्याद्दिनेदिने ।
श्रीराघवं नमस्कृत्य चतुर्विंशति वारतः ॥

पदेपदे स्वमेधस्य गंगास्नानस्य यत्फलम् ।
तत्फलं तव देवेशि रामसायुज्यमश्नुते ॥

Colophon :

इति श्रीब्रह्मयामले श्रीरामनमस्कारस्तोत्रं समाप्तम् ॥

401

Sl No. 21602 रामनमस्कारस्तोत्रम् (रामस्तोत्रम्) Ms.No. P 10601/13

Beginning :

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम् ।

आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥

End

चम्पेयकोरवदनं शरचापहस्तं ।
रगुवीररामममनिशं शिरसा नमामी ॥

रामं रामानुजं सीतां भरतं भरतानुजम् ।
वाल्मीकिं वायुसूनुं च प्रणतोऽस्मि पुनः पुनः ॥

Colophon :

इति श्रीरामस्तोत्रं सम्पूर्णम् ॥

402

Sl. No. 21603 रामनमस्कारस्तोत्रम् Ms. No. C 3732/4

(महादेवकृतम्)

Beginning :

महादेव उवाच -

नमोऽस्तु रामाय सशक्तिकाय
नीलोत्पलश्यामले कोमलाय ।
किरीटहारांगद भूषणाय
तेन पुण्यप्रभावेन शत्रूणां प्राणनाशनम् ।
सर्वपापप्रशमनं धन्यमायुष्यवर्धनम् ॥

End :

इत्युक्त्वाऽन्तर्दधे देवः शरभः पक्षिराजकः ।
ततो नारायणो ध्यात्वा श्रुत्वा रूपं च विस्मितः ॥

एतत्ते कथितं देवि हृदयं शरभस्य च ।
पठतां शृण्वतां चैव सर्वमन्त्रादिसिद्धिदम् ॥

Colophon:

इति आकाशभैरवकल्पे शरभहृदय समाप्तम ॥

497

Sl. No. 21830 **शरभाष्टकम्** Ms. No. P. 4525/1

Beginning :

अस्य श्रीशरभाष्टकस्तोत्रमहामन्त्रस्य- कालाग्निरुद्र ऋषिः ; अनुष्टुप् छन्दः ; श्रीशरभेश्वरो देवता ; खं बीजं ; स्वाहा शक्तिः ; फट् कीलकम् ; श्रीशरभाष्टकपारायणे विनियोगः ॥

End :

हुंकारः शरभेश्वरोऽष्टचरणः पक्षी चतुर्बाहुकः
पादकृष्टनृसिंहविग्रहवरः कालाग्निकोटिद्युतिः ।
विश्वक्षोभकरः सहेतिरनिशं ब्रह्मेन्द्रमुख्यैः स्तुतो
गङ्गाचन्द्रधरः पुरत्रयहरः सद्यो रिपुघ्नोऽस्तु नः ।।

Colophon :

— — — —

498

Sl. No 21831 शान्तिस्तोत्रम् Ms. No. B 952/2

Beginning :

भैरव उवाच -

देवि वक्ष्यामि पूजान्ते शांतिस्तोत्रमनुत्तमम् ।
वीरा येन बरानन्दपदं प्राप्यंति निस्पृहाः ।।
योगिनी चक्रमध्यस्थं हृत्कमण्डलवेष्टितम् ।
नमामि शिरसा नाथ भैरवं भैरवप्रियम् ।।

End :

तृप्यन्तुमातरः सर्वाः समुद्रा सः गणाधिपाः ।
योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः ।।
शिवायावनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादिशिवान्तं च स्वजगज्जेन तृप्यतु ।।

Colophon :

इति शांतिस्तोत्रं समाप्तम् ।।

499

SI. No. 21832 **शारदाद्वादशनामस्तोत्रम्** Ms. No. P. 9880/7

(शनैश्चरध्यानश्लोकाः)

Beginning:

प्रथमं भारती नाम द्वितीयं च सरस्वती ।
तृतीयं शारदादेवी चतुर्थं कंसमर्दिनी ॥
पञ्चमं च जगन्नाथः षष्ठं चैव तु पार्वती ॥

End:

सप्तमं चैव कामाक्षी अष्टमं ब्रह्मचारिणी ।
नवमं चैव वाराही दशमं ब्रह्मपुत्रिका ॥
एकादशं च वाग्वाणी द्वादशं वरदाम्बिका ॥

Colophon :

-- — —

500

SI. No. 21839 **शिवकवचम्** Ms. No. C. 5635/113

Beginning :

वृषभ उवाच–

नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥
शुचौ देशे समासीनः यथावत्कल्पितासनः ॥

End :

प्राप्य सिंहासनं पित्र्यं गोप्ताऽशु पृथिवीमिमाम् ।
इति भद्रायुषं सम्यक् अनुशास्य समाययुः ॥
ताभ्यां सम्पूजितस्सोऽथ ययौ स्वैरगतिर्मुनिः (मनुः) ॥

Colophon :

इति श्रीस्कान्दपुराणे शिवधर्म नाम द्वादशोऽध्यायः ॥

501

Sl No. 21840 शिवकवचम् (स्कान्दीयम्) Ms. No. P. 5865/63

(ब्रह्मोत्तरखण्डीयम् - वृषभयोगीश्वरतन्त्रान्तर्गतम्)

Beginning :

अथापरं सर्वपुराणगुह्यं
निश्शेषपापौघहरं पवित्रम् ।
जयप्रदं सर्व विपत्प्रमोचनं
वक्ष्यामि शैवं कवचं हिताय ते ॥

अथ शिवकवचस्तोत्रमहामन्त्रस्य - नन्दिर्भगवान् ऋषिः; अनुष्टुप छन्दः; परशिवो देवता । .. .. परशिवस्तोत्रपारायणे जपे विनियोगः ॥

End :

भस्मधारिणसामर्थ्याच्छत्रुसैन्यं विजेष्यतेयं ।
प्राप्य सिद्धासन× ×गोप्ता × × ×नृपोत्तम ॥
ताभ्यां सम्पूजितो ह्येष योगीश्वरगतिर्ययौ ॥

Colophon :

इति श्रीस्कान्दपुराणे ब्रह्मोत्तरखण्डे वृषभयोगीश्वरतन्त्रे शिवकवचं नाम द्वादशोऽध्यायः ॥

502

Sl. No. 21843 **शिवकवचस्तोत्रम्** Ms No. P. 6377

(स्कान्दीयम्)

Beginning :

अस्य श्रीशिबकबचस्तोत्रमन्त्रस्य— ऋषभयोगी भगवान् ऋषिः ; + +

त्र्यम्बकं यजामहे सुगन्धिं पुष्टवि × × नम् ।
× × रुनमिव बन्धनान्मृत्योर्मुक्षीममृतातु (?) ॥

ध्यानं—

श्रीमत्कैलासवासं शितकरमकुटं शेषभूषं सिताङ्गं
श्रीकण्ठं भूतनाथं शिवमजिनधरं चित्तवारीमृगाङ्कम् ।
गङ्गजूटं गणेशं गजदनुजहरं कञ्जजाध्यक्षवन्द्यं
फालाक्षं शुद्धहस्तं प्रणुतसुरवरं भावयेत्पार्वतीशम् ॥

End :

सार्वबाधाप्रशमनं रहस्यं सर्व × × × नाम् ।
यस्सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ॥

+ + + + +

इति भद्रायुषं सम्यगनुज्ञस्य × × × मरर्षकम् ।
ताभ्यां स × × क्रोधः योगीश्वरगतिं ययौ ॥

Colophon :

इति स्कान्दपुराणे ब्रह्मोत्तरखण्डे शिव × × × कथनं नाम द्वाश-
शोऽध्यायः ॥

503

Sl. No. 21851 शिवकवचम् माधवीयरत्नाकरस्तोत्रम् Ms. No. P. 10061/9

(माधवीरत्नाकरीयम्)

Beginning :

श्रीपार्वत्युवाच--

देवानां देवमीशानं आदिमाध्यान्तवर्जितम् ।

भावगम्यं नमस्कृत्य × प्रच्छेदं षडाननम् ।२॥

स्कन्दौ उवाच--

शिवं सितकरार्धाङ्कमणिमौलिविराजितम् ।

शिवस्य कवचं तत्र मम वक्तव्यमञ्जसा ॥

End :

य इदं पठते भक्त्या तस्य साध्यं न विद्यते ।

स्तवानां राजराजोऽयं तस्मात्सर्वस्य दायिने ॥

Colophon :

इति श्री माधवीयरत्नाकरे शिवकाण्डे सर्वतोरक्षणाय शिवेन प्रोक्तं शिवकवचं संपूर्णम् ॥

504

Sl. No. 21857 शिवकवचम् Ms. No. B 326/12

(लघुशिवकवचम्)

Beginning :-

पार्वत्या सहितं गिरीशशिखरे मुक्तामये मण्टपे

पीठे सुस्थतमिन्दुशेखरमहो नाथादिसंसेवितम् ।

पञ्चास्यं फणिराजकङ्कणधरं गङ्गाधरं सुन्दरं
प्राज्ञं पापहरं नमामि सततं पद्मासनस्थं शिवम् ॥

End:

नैऋत्यां भूतभृत्पातु वायव्यां जलवर्धनः ।
ऊर्ध्वं पातु मखद्वेषी अधः संसारतारकः ॥

सर्वतः सुखदः पातु बुद्धिं पातु सुलोचनः ।
एवं न्यासादिकं कृत्वा साक्षाच्छम्भुमयो भवेत् ॥

Colophon :

इति पद्मपुराणे उत्तरखण्डे सहस्रसंहितायां बिल्वकेश्वरमाहात्म्ये श्रीकृष्णमार्कण्डेय-संवादे वेदसारशिवसहस्रनामान्तर्गतलघुशिवकवचं सम्पूर्णम् ॥

505

Sl. No. 21862 शिवकवचम् Ms. No. C-4654/16

(स्तोत्ररत्नाकरीयम्)

Beginning :

वन्दे शम्भुं सदानन्दं शङ्करं लोकशङ्करम् ।
चन्द्रार्धाचूड × × द्यौः वन्दितं नन्दिवाहनम् ॥

धर्मज्ञानं च वैराग्यं ऐश्वर्यं च चतुष्टयम् ।
बीजाक्षरं वृषारूढ मायातीतं परात्परम् ॥२॥

End :

दशाब्दं यः पठेद्भक्त्या त्रिकालं ध्यानपूर्वकम् ।
अनेनैव तु देहेन जीवन्मुक्तो न संशयः ॥२४॥
य इदं पठने भक्त्या तस्य साध्यं न विद्यते ॥२४॥

Colophon :

इति श्रीस्तोत्ररत्नाकरे शिवकाण्डे शिवषण्मुखसंवादे शिवकवचस्तोत्रं सम्पूर्णम् ॥

506

Sl. No. 21866 — शिवकवचस्तोत्रम् — Ms. No. C. 4722/14

(ब्रह्माण्डविजयकवचम् — ब्रह्मवैवर्तीयम्)

Beginning :

नमः शिवाय शान्ताय स्वाहा कण्ठं सदावतु ।
ओं ह्रीं श्रीपद्मवक्त्राय स्वाहा दन्तान् सदावतु ॥

ओं ह्रीं महेशाय स्वाहा चाधरं पातु मे सदा ॥

× × × च ब्रूहि मत्स्यराज × × ।
× × × × ग श्रोतुं कौतूहलं हि मे ॥

श्री × × × × × × ।

कवचं शृणु विप्रेन्द्र शङ्करस्य महात्मनः ।
ब्रह्माण्डविजयं नाम सर्वावयवरक्षणम् ॥

End

इदं कवचमज्ञात्वा यो भजेच्छङ्करं विभुम् ।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥

\+ + + + +

यत्फलं सर्वतीर्थानां स्नानेन लभते नरः ।
तत्फल सम – – – – – ॥

Colophon :

चतुर्थपत्रे–

इति श्रीब्रह्मवैवर्ते महापुराणे गणपतिखण्डे ब्रह्माण्डविजयाख्यं शङ्करकवचं नाम पञ्चत्रिंशोऽध्यायः ॥

507

Sl. No. 21874 — वेदसारशिवकवचम् (वेदसारशिककवचम्) — Ms. No. C. 694/141

Beginning :

ध्यात्वा मां सकलाधीशं निराकारं निरीश्वरम् ।
पार्वतीसहितं विश्वं जटामकुटमण्डितम् ॥
वसानं चर्मवैय्याघ्यूं चन्द्रार्धकृतशेखरम् ।
त्रियम्बकं वृषारूढं कृत्तिवाससमन्वयम् ।

End :

ईशान्यां फालभुक्केश अग्नेय्यां रविलोचनः ।
नैऋत्यां हुतभुक्या तु वायव्यां बलवर्धनः ॥
ऊर्ध्वं मम मुखद्रेष्टा अधस्संसारनाशनः ।
एवं न्यासविधिं कृत्वा साक्षाच्छिवमयो भवेत् ॥

Colophon :

वेदसारशिवकवचं सम्पूर्णम् ॥

508

Sl. No. 21879 — शिवक्षेत्रस्तोत्रम् (स्कान्दीयम्) — Ms. No. C. 873

Beginning :

ऋषयः—

सूत सर्वज्ञ भगवन् सर्ववेदान्तपारग ।
शिवक्षेत्राणि सर्वाणि भुक्तिमुक्तिप्रदानि च ॥
शम्भुनाधिष्ठितं नित्यं तत्सर्वं वक्तुमर्हसि ।

श्रीसूत–

अथातस्सम्प्रवक्ष्यामि तवाहं मोचकप्रदम् ॥
शिवक्षेत्र × × फलं × × × घ ॥

End :

मुच्यते सर्वपापेभ्यो त्रिसन्ध्यं नियतः पठन् ।
कामार्थी काममाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥

संशयो नात्र कर्तव्यः सन्देहात्तु फल न हि ।
यावत्तच्च जपेद्यस्तु न पुनगर्भमाविशेत् ॥

Colophon :

इति श्री स्कान्दपुराणे त्र्यम्बकखण्डे शिवक्षेत्रोत्तमवर्णनं नाम पञ्चदशोऽध्यायः ॥

509

Sl. No. 21880 शिवनवकं (शिवस्तोत्रम्) Ms. No. P. 9714/2

Beginning :

× × × सर्वाङ्गास्सनन्दजललोचनाः ।
भक्तया गद्गदया वाचा स्तोत्रं चक्रुर्मुनीश्वराः ॥

पतञ्जलिः–

सुवर्णपाद्मिनीतटान्तदिव्यहर्म्यवासिने
सुवर्णवाटनिर्जप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रधारिणे
सदानमः शिवाय ते सदाशिवाय शम्भवे ॥

End :

मधुरिपुविधिशक्रदेवैरपि

नियमचितपादपङ्कजाय ।

कनकगिरिशिरसीनाथ तुभ्यं
रचितसभापतये नमः शिवाय ॥९॥

Colophon:

— — — —

510

Sl. No. 21881 शिवताण्डवस्तोत्रम् Ms. No. C. 694/92
(रावणकृतम्)

Beginning :

जटाकटाहसम्भ्रमभ्रमन्निलिम्पानिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनी ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावकी
किशोरचन्द्रशेखरे रतिप्रतीक्षणं मम ॥

End :

पूजावसानसमये दशवक्त्रगीतं
यश्शम्भुपूजनमिदं पठति प्रदोषे ।
तस्य स्थिरां मदगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं प्रसादसमये प्रददाति शम्भुः ॥

Colophon :

इति श्रीरावणविरचितं शिवताण्डवस्तोत्रं सम्पूर्णम् ॥

511

Sl. No. 21883 शिवद्वादशनामस्तोत्रम् Ms. No. C. 3535/4

Beginning :

अस्य श्री शिवद्वादशनामस्तोत्रमहामन्त्रस्य— नारायण ऋषिः ; अनुष्टुप् छन्दः ; मृत्युञ्जयरुद्रो देवता ; साम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ॥

End :

एतानि द्वादश नामानि त्रिमध्यं यः पठेन्नरः ।
गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः ॥

स्त्रीबालघातकश्चैव सुरापो वृषली यतिः ।
मुच्यते सर्वपापेभ्यो रुद्रसायुज्यमाप्नुयात् ॥

Colophon :

इति शिवद्वादशनामस्तोत्रंसंपूर्णम् ॥

512

Sl. No. 21884 शिवपञ्जरम् Ms. No. B. 326/16

(ब्राह्मण्डीयम्)

Beginning :

वटतरुकृतवासबद्धतृष्णं
मुनिनिकरे हि विवेकमासयन्तम् ।
पशुपतिमृगराजकन्यकायै
स्मर हृदयाशु वितीर्णवामभागम् ॥

प्रणम्य साम्बमीशानं शिरसा वेणुको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

End :

कैलासे सुचिरं स्थित्वा शिवमूर्तेश्च सन्निधौ ।
तस्मादवाप्य विज्ञानं प्राप्य रुद्रत्वमेव च ॥

विलयं यान्ति तत्वार्थे नात्र कार्या विचारणा ।
तस्मात्सर्वप्रयत्नेन क्षेमार्थस्सर्वदा पठेत् ॥

Colophon :

इति ब्रह्माण्डपुराणे गुरुनारदसंवादे शिवपञ्जरे अष्टाशीतितमोऽध्यायः ॥

513

Sl. No. 21885 **शिवपादामृतस्तोत्रम्** Ms. No. P. 6351/3

(ब्रह्मोत्तरखण्डीयम्)

Beginning :

सत्य ब्रवीमि तव लोकहितं ब्रवीमि ।
सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तोः
सारोऽयमीश्वरपदाम्बुरुहस्य सेवाम् ॥१॥

End :

अतः प्रदोषे शिव एक एव
पूज्योऽथ नान्ये हरिपद्मजाद्याः ।
तस्मिन् महेशे विधिनेज्यमाने
सर्वे प्रसीदन्ति सुराधिनाथाः ॥

Colophon :

इति ब्रह्मोत्तरखण्डे शनिप्रदो××हात्म्ये शिवपादामृतस्तोत्रं सम्पूर्णम् ॥

514

Sl. No. 21886 **शिवपूजामहिमास्तुतिः** Ms. No. C. 4677/1

(ब्रह्मोत्तरखण्डीया)

Beginning :

सत्यं ब्रवीमि परलोकहितं ब्रवीमि
सारं ब्रवीमि उपनिषध्दृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तोः
सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥१॥

End :

प्रदोषकाले शिवपूजनं च
अपूजनं स्यात्प्रथदर्शनं (?) च ।
अदर्शनस्तोत्रजपाधिकैश्च
ध्यायेत्परं तत्र स एव मुक्तः ॥१०॥

Colophon :

इति श्रीब्रह्मोत्तरखण्डे शिवपूजामहिमावर्णनं नाम षष्ठोऽध्यायः ॥

515

Sl No. 21900 शिवमहिम्नस्तोत्रम् Ms. No P. 6375
(पुष्पदन्तकृतम्)

Beginning :

महिम्नः पारं ते परमविदुषां यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥

End :

महेशान्नापरो देवो महिम्नो नापरस्तवः ।
अघोरान्नापरो मन्त्रः नास्ति तत्त्वं गुरोः परम् ॥

दीक्षा दानं तपस्तीर्थहोमयज्ञक्रियादिकाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥

Colophon :

इति पुष्पदन्तविरचितं महिम्नस्तोत्रं सम्पूर्णम् ॥

516

Sl. No. 21924 शिवमहिम्नस्तोत्रपारायणविधिः Ms. No. C. 3757/2

(न्यासमहिम्निका)

Beginning :

ओं पञ्जन उषाच—

ओं अस्य श्रीमहिम्नःस्तोत्रमन्त्रस्य भगवान् विष्णुः ऋषिः ; रुद्रो देवता ; विराट् छन्दः ; महिम्नस्तोत्रसूक्तजपे विनियोगः । ओं महिम्ने नमः ॥

End :

विश्वेश्वराय विरूपाक्षाय नमः । शंभवे नमः । नमस्ते अस्तु भगवते विश्वेश्वराय, महादेवाय, त्रिपुरान्तकाय, त्र्यम्बकाय, त्रिकालाग्निकालाय, हिरण्यगर्भाय । ओं नमः शिवाय नमः ; ओं नमः शिवाय नमत् ; ओं ध्यानम् । वाडव प्रियाय षोडशाङ्ग पूजयेत् , मूलेन निर्माल्यं विसृजेत् ॥

Colophon :

इति न्यासमहिम्निका समाप्ता ॥

517

Sl. No. 21625 (शिवमहिम्नःस्तोत्रटीकाटीका-कार्णाटी) Ms. No. P. 5233/2

Beginning :

टी ॥ हर–ಎಲೈ ಸದಾಶಿವನೇ, ते–ನಿನ್ನ , महिम्नः–ಮಹತ್ವದ, पारं - ಕಡೆಯನ್ನು परं–ನಾಗೆ, अविदुषः - ಅರಿಯದಿದ್ದಂಥಾ; मम–ಎನಗೆ, स्तुतिः - ಸ್ತೋತ್ರವನಮಾಡುಹರು, यदि एत्तलानु + + + निरपवादः–ಅಪವಾದವಲ್ಲ ॥

End :

दीक्ष दानं–ದೀಕ್ಷಾವಿಧಾನವು, तपस्तीर्थं–ಕಾಯುವನ್ನು ಕುಗ್ಗಿಸುವ ಮನವನ್ನು ಅಡಗಿಸುವ ತಪಸ್ಸು ಮತ್ತು ತೀರ್ಥಂಗಳು ಇವುಗಳು ಹಾಗೂ हेमयज्ञादिकाः क्रियाः–

ಹೋಮಯಜ್ಞಾದಿ ಕರ್ಮಂಗಳು ; महिम्नःस्तवपाठस्य - ಮಹಿಮ್ನ ಸ್ತೋತ್ರ ಪಾಠದ, षोडशीं कलां— ಹದಿನಾರನೆಯ ಒಂದು ಕಲೆಯನ್ನು, नार्हन्ति ಹೊಂದುತ್ತಿರದು ॥

Colophon :

– – – – – – – –

518

Sl. No. 21927 शिवमहिम्नस्तोत्रटीका Ms. No. C. 4334/19B

(पदभञ्जिका - निरञ्जनीया)

Beginning:

क × × तेशं नमस्कृत्य श्रीनागेशभट्टान् गुरून् ।
निरञ्जनेन यतिना क्रियते पदभञ्जिका ॥

हे हर तव महिम्नो × × × स्वस्य परं पारंपर्यावसानमविदुषो अजानतः पुरुषस्य स्तुतिर्यद्यसदृशी अननुरूपा यदि ब्रह्मादीनामपि गिरा वाचस्त्वयि × × विषये अवसन्नाः कुण्ठिताः। + + + एषः परिकरो यत्नो निरपवादो नि × × षि इति वाक्यार्थः ॥

End :

असितमिति हे ! ईश ! स्वामिन् असितगिरिसमं अञ्जनगिरिसमं अस्ताचल × × × × × ·षी सा तु भवन्त क्व सिन्धुपात्रे सिन्धुऽ समुद्र एव पा × × × धुपात्रे सुरतरुवरशाखा कल्पवृक्षशाखा लेखनीकरणरूपेण · अक्षरकर्त्री स्यात् यदि शारदा सरस्वती सर्वकालं + + लिखति + + + तव गुणानां + + परमन्तं × × तमवसानं न याति न प्राप्नोतीति वाक्यार्थः ॥

महिम्नस्तवटीकेयं निरञ्जनेन निर्मिता ।
प्रियतां यतिना रामः पदभञ्जिकयानया ॥

Colophon :

इति श्रीमन्महिम्नस्य टीकायां निरञ्जनी समाप्तिमगमत् ।

519

Sl. No. 21932 **शिवमहिम्नस्तोत्रटीका** Ms. No. P. 2189/3

(कौमुदी– पेद्दिभट्टीया)

Beginning :

श्रीचेन्नुभट्टात्मजपेद्दिसूरिणा
टीका महिम्नो रचिता च कौमुदी ।
याभूच्चिरं तिष्ठतु मेदिनीतले
नत्वा गणेशं प्रमथाधिनायकम् ॥

श्रीचेन्नुभट्टात्मजपेद्दिसूरिणा प्रमथाधिनायकं गणेशं विघ्नेशं नत्वा महिम्नः कौमुदीति या टीका रचिताभून् सा मेदिनीतले चिरं तिष्ठतु । स्थेयादित्यस्माकं मनोरथः । महिम्न इति ॥

End :

यदा कुत्रापि प्रकृतिर्नास्ति तदा सत्त्वगुणस्य × × × भावात् त्रैगुण्यं भवति । अतः केवलमङ्गलरूपत्वात्तदुचितेन शिवशब्देन नमस्कारः कृतः । नमो नम इति वीप्सायां द्विवचनम् ॥

Colophon :

— — — —

520

Sl. No. 21933 **शिवमहिम्नस्तोत्रटीका** Ms. No. P. 5090/2

(व्याख्या– येनकेनापि निर्मिता)

Beginning :

गजाननकटद्वन्द्वनिस्सृता मदनिर्झराः ।
प्रक्षालयन्तु नः क्षिप्रं विघ्नसङ्घातकर्दमम् ॥

नमश्चराचरोत्पत्तिस्थितिसंहृतिहेतवे ।
शम्भवेऽपारमहिमस्तोमाय करुणाब्धये ॥

श्रीमदुमाकान्तं स्तोतुमारभमाणः + + + समाधत्ते ॥ महिम्न इति ॥

End :

दीक्षादानं तपस्तीर्थं होमयज्ञादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥

महिम्नस्तोत्रव्याख्याने सुकृतो योऽस्मदुद्यमः ॥
ख × × वकारणं तत्र प्रीतस्तेनास्तु शङ्करः ॥

Colophon :

इति श्रीमहिम्नस्तोत्रव्याख्यानं समाप्तम् ॥

521

Sl. No. 21934 शिवमहिम्नस्तोत्रटीका Ms. No. B. 915/2
(अहोबलीया)

Beginning :

ईशानं सर्वभूतानामीश्वरं पार्वतीपतिम् ।
भजामि श्रीमहादेवं सर्वदेवोत्तमोत्तमम् ॥

महेश्वराराधनदत्तशीलः
श्रीमन्महिम्नोऽर्थविचारशीलः ।
अहोबलः पूजितकालकालः
टीकां महिम्नस्तनुते सुशीलः ॥

End :

श्रीपुष्पदन्तमुखपङ्कजनिर्मितेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।

कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेश्वरः ॥

Colophon :

इति श्रीमन्महेश्वरभजनैकध्यानेन भास्करीयवंशोद्भव सिंहभट्टात्मजाहोबलेन विरचिता महिम्नः स्तवव्याख्या सम्पूर्णा ॥

522

Sl. No. 21935 शिवमहिम्नस्तोत्रटीका Ms. No. C. 762/2

(मधुसूदनसरस्वतशिष्यकृता – व्याख्या)

Beginning:

विश्वेश्वरं गुरुं नत्वा महिम्नाख्यस्तुतेरयम् ।
पूर्वाचार्यकृतव्याख्यासङ्ग्रहः क्रियते मया ॥ १ ॥

एवं किल व्याख्यायते – कश्चिद्गन्धर्वराजः कस्यचिद्राज्ञः प्रमदावनकुसुमान्याहरन्नासीत् ॥

End:

अयं श्लोकः स्तोत्रान्तर्गतः सुगमार्थश्चेति सर्वं भद्रम् । ३३॥
इमावपि श्लोकौ पठति । ३५॥

हरिशङ्करयोः + + शोधयन्तु ॥ १॥
यत्नतो वक्रया रीत्या + + प्रदर्शितः ॥२॥
श्लोकानुपात्त + + प्रतिपादितम् ॥३॥
महिम्नाख्यस्तुतेर्व्याख्या + + अर्पिता मया ॥४॥
भूतिभूषितदेहाय + + + + हराय च ॥५॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-श्रीविश्वेश्वर-सरस्वतीचरणारविन्दमधुकरेण श्रीमधु-सूदनसरस्वतीसमाराधकेन केनचिद्विरचिता महिम्नाख्यस्तुतिव्याख्या परिपूर्णा ॥

Extra Information :

शाके रूपनगाङ्कभूपरिमिते मासे शुचौ शुक्लके,
पक्षे जीवदिनेऽपि पञ्चमतिथौ पुर्यां पुरारेरिमाम् ।
श्रीकण्ठस्य महिम्नसंज्ञकवरस्तोत्रस्य टीकां शुभां
आनन्त्याय सतां सदा शिवमुदे श्रीबालकृष्णोलिखत् ॥१॥

टत्कृत्यं ·· ·· ·· चरितम् ॥१॥

इति ग्रन्थान्ते दृश्यते ॥

523

Sl. No. 2198 — शिवमहिम्नस्तोत्रटीका — Ms. No. P. 1149/2

(लघुटीका— भट्टाचार्यकृता)

Beginning :

पुरा भट्टाचार्यो बौद्धैः साकं निरीश्वरवादं कृत्वा तद्दोषपरिहाराय शिवमहिम्नः स्तोत्रं विवृणोति- महिम्न इत्याद्यश्लोकेषु ॥

End :

महेशादीश्वरात् अपरोऽन्यो देवो नास्ति महिम्नः महिम्नस्तुतेः अपरा अन्या स्तुतिर्नास्ति । अघोरात् अघोराख्यमन्त्रात् अपरो मन्त्रो नास्ति । गुरोः परमन्यद्ब्रह्म नास्ति ॥

Colophon :

इति पदवाक्यप्रमाणज्ञेन सकलशास्त्रार्थतत्त्वज्ञेन बौद्धाचार्यवर्यभञ्जकेन जैमिनिकण्ठीरवेण भट्टाचार्याभिधानेन मया विहितस्फोटकरेणसन्तापेन पराकृतद्वैतवृन्देन महिम्नःस्तोत्रलघुटिका सम्पूर्णीकृता ॥

524

Sl. No. 21939 **शिवरक्षास्तोत्रम्** Ms. No P. 5788/12

(भविष्योत्तरीयम्)

Beginning :

अस्य श्रीशिवरक्षास्तोत्रमन्त्रस्य– याज्ञवल्क्य भगवान् ऋषिः; अनुष्टुप् छन्दः; श्रीसदाशिवो देवता ; गङ्गाधरेति वीजम् ; वागीश्वरेति शक्तिः ; श्रीकण्ठेति कीलकम् ; श्रीसाम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ॥

End :

अभयंकरनामेदं कवचं पार्वतीपतेः ।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्रयम् ॥

इमां नारायणः स्वप्नशिवरक्षां यथादिशेत् ।
प्रातरुत्थाय योगीन्द्र याज्ञवल्क्य तथाखिलात् ॥१२॥

× × × × ×
× × × न संशयः ॥१२॥

Colophon :

इति श्रीभविष्योत्तरपुराणे शिवरक्षास्तोत्रं सम्पूर्णम् ॥

525

Sl. No. 21940 **शिवरक्षास्तोत्रम्** Ms. No. C. 4681/20

(भविष्योत्तरीयम्)

Beginning :

चरितं देवदेवेश महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गैकसाधनम् ॥

ध्यात्वा कर्पूरगौरं तं सोमसूर्याग्निलोचनम् ।
गौरीविनायकोपेतं शिवरक्षां पठेन्नरः ॥

End :

अभयंकरनामेदं कवचं पार्वतीपतेः ।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्रयम् ॥
इमां नारायणः स्वप्ने शिवरक्षां यथादिशत ॥
प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यस्तथालिखत् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे शिवरक्षास्तोत्रं समाप्तम् ॥

526

Sl. No. 21942 शिवशक्तिमहिम्नस्तवः Ms. No. P. 5943/14

Beginning :

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवीर्योज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभां ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥१॥

End

छत्रं चामरयोः युगं व्यजनमादर्शस्तथा मर्दलो
भेरीशंखमृदङ्गकाहलहलं गीतं च नृत्यं तथा ।
साष्टाङ्गप्रणतिस्तुतिर्बहुविधा चैतत्समस्तं मया
सङ्कल्पेन समर्पितं तव शिवे सन्तुष्टये कल्पताम् ॥

Colophon :

इति शिवशक्तिमहिम्नस्तवः सम्पूर्णः ॥

527

Sl No. 21943 **शिवस्तवराजः** Ms. No. B. 326/17

(पद्मपुराणीयः— वेदसाराख्यः)

Beginning :

सूत उवाच—

एकदा नारदो योगी परानुग्रहतत्परः ।
विमत्सरो वीतरागो ब्रह्मलोकमुपाययौ ॥

तत्र दृष्ट्वा समासीनं धातारं जगतः पतिम् ।
प्रणाम्य शिरसा भूमौ कृताञ्जलिरभाषत ॥

End :

पार्वत्या सहितं गिरीशशिखरे मुक्तामये मण्टपे
पीठे संस्थितमिन्दुशेखरमहो नाथादिसंसेवितम् ।
पञ्चास्यं फणिराजकङ्कणधरं गङ्गाधरं सुन्दरं
प्राज्ञं पापहरं नमामि सततं पद्मासनस्थं शिवम् ॥

स्तवराजमिमं पुण्यं प्रातरुत्थाय भक्तिमान् ।
× × × × × अन्ते शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति श्री पद्मपुराणे वेदसाराख्ये ब्रह्मनारदसंवादे शिवस्तवराजस्तोत्रं सम्पूर्णम ॥

528

Sl No. 21946 **शिवस्तोत्रम्** Ms No. P. 7982/42

(उपमन्युस्तोत्रम)

Beginning :

जय शङ्कर पार्वतीपते
मृड शम्भो शशिखण्डमण्डत ।
मदनान्त भक्तवत्सल
प्रिय कैलासदयासुधाम्बुधे ॥

End :

उपमन्युकृतं शिवस्तवं
पठतः शम्भुसमीपवर्तिनः ।
अभिवाञ्छितभोगसम्पदं
परमायुः प्रददाति शङ्करः ॥१॥

Colophon :

इति उपमन्यु › × × × रचितं × × × × × समाप्तम् ।

520

Sl. No. 21948 **शिवस्तोत्रम्** **Ms. No. P. 5576/3**

Beginning :

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रधारिणे
सदा नमः शिवाय ते सदाशिवाय शम्भवे ॥

End :

मधुरिपुविधिशक्रमस्य देवैः
अपि तियमार्चति(?) पादपङ्कजाय ।
कनकगिरिश चारानायत (?)
× × × रजतसभापतये नमः ।

हालास्यनाथाय महेश्वराय
हालाहलालङ्कृतकन्धराय ।
मीनेक्षणायाः पतये शिवाय
नमोनमः सुन्दरताण्डवाय ॥

Colophon :

-- — . . . --

530

Sl. No. 21952 शिवस्तोत्रम् (मार्कण्डेयीयम्) Ms. No. P. 5557

Beginning :

मार्कंडेय उवाच-

असिभीषणकटुभीषण यमकिङ्कर पटली
कृतताडनपरिपीडनमरणागतसमये ।
उमया सह मम चेतसि हिमशासन निवसन्
शिव शङ्कर शिव शङ्कर हर मे हर दुरितम् ॥

End :

शरणागत भवतामृत करुणामृतसिन्धो
शरणं शिव शरणं शिव मम संहदिवसते (?) ।
वर चिन्मय जगदामभि त्रिषजन्म नरपते (?)
शिव शङ्कर शिव शङ्कर हर मे हर दुरितम् ॥

Colophon :

— — — —

531

Sl. No. 21954 शिवस्तोत्रम् Ms. No. P. 5865/24

Beginning :

मार्कंडेय उवाच-

महेश्वरं महदेवं त्रिनेत्रं चन्द्रशेखरम् ।
मृत्युभीतः प्रपन्नोऽस्मि तस्माद्रक्ष महेश्वर ॥

विश्वेशं गिरिजाकान्तं कमनीयकलेवरम ।
मृत्युभीतः प्रपन्नोऽस्मि × × × × × ॥

गौरीपतिं महादेवं गणेशपितरं हरम् ।
मृत्युभीतः प्रपन्नोऽस्मि रक्षनां भक्तवत्सल ॥

End :

मयापि विस्मितस्तत्र मुनिस्तत्रैव शङ्करः ।
पूजिताः × × देवेशः सर्वभीष्टप्रदायकः ॥

तत्तु क्षेत्रं तस्य नाम्नैव कथितं पापनाशनम् ।
तस्य क्षेत्रे कृतं दानं तत्तत्कोटिगुणं भवेत् ॥

Colophon:

इति श्रीमार्कण्डेय (कृतं) स्तोत्रं सम्पूर्णम् ॥

532

Sl. No. 21961 शिवस्तोत्रम् Ms. No. P 8719/7

(मार्कण्डेयस्तोत्रम्)

Beginning :

मार्कण्डेय उवाच—

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदशालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः १८॥

End :

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरन्तमघप्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमावृतं
चन्द्र – – – – ॥८॥

Colophon :

इति श्री × × × × × धारीण × × × मार्कण्डेयेन विर-
चितं शिवपरमरहस्य × × × × स्तोत्रं समाप्तम् ॥

533

Sl. No. 21967 | शिवस्तोत्रम् | Ms. No. B. 917/6

(मार्कण्डेयस्तोत्रम्)

Beginning :

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं न्मो मृत्युः करिष्यति ॥

कालकण्ठं कलामूर्तिं कालाग्निं कालनाशनम् ।
नमामि शिरसा देव किन्नो मृत्युः करिष्यति ॥२॥

End :

मार्कण्डेयकृतं स्तोत्रं यः पठच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं न संशयः ॥८॥

सत्य सत्यं पुनः सत्यमुद्धृ त्यभुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं शङ्करात्परम ॥९॥

Colophon :

— — — —

534

Sl. No. 21975 | शिवस्तोत्रम् | Ms. No P. 10683

(यमकृतम्)

Beginning :

भूतभूतो ह्याहं तव ॥

धर्मेण भाषितं श्रुत्वा गत्वा चैव शिवान्तिकम् ।
कृत्वा प्रणामं देवस्य कृताञ्जलिरुवाच ह ॥

नन्दिकेश्वर उवाच–

प्रसीद मे जगन्नाथ यमस्त्वां द्रष्टुमागतः ।
चित्रगुप्तादिभिस्सार्धं किमागच्छतु गच्छतु ॥

शिवस्येङ्गितमाज्ञाय नन्दीश्वर उपागमत् ।
यमं प्रवेशयामास चित्रगुप्तादिभिस्सह ॥ ·I· ·I· ·I·

दृष्ट्वा यमस्तदा देवं दण्डमुद्रां निवेद्य च । ·I· +
यमस्थितस्समुत्थाय भक्त्या परमया युतः ।
कराभ्यामञ्जलिं कृत्वा स्तोतुमेवोपचक्रमे ॥

नमस्सकललोकानां सर्गस्थित्यन्तहेतवे ।
सर्वज्ञाय वरेण्याय भक्तिगम्याय शम्भवे ॥

End :

महापातकयुक्तो यः युक्तो वा सर्वपातकैः । ·I· +
सर्वपापविनिर्मुक्तः स याति शिवमन्दिरम् ॥

Colophon :

... — — —

535

Sl. No. 21976 | शिवस्तोत्रम् | Ms. No. C. 227/11

(वरुणकृतास्तोत्रम्)

Beginning :

वरुण उवाचः–

कल्याणशैलपरिकल्पितकार्मुकाय
पृथ्वीरथाय कमलापतिसायकाय ।
मौर्वीकृताखिलमहोरगनायकाय
हालास्यमध्यनिलयाय नमः शिवाय ॥

End :

गीर्वाणदेशिकगिरामपि दूरतो: य-
द्वक्तुमिह को भवत: प्रवीण: ।
शम्भो क्षमस्व भगवच्चरणारविन्द-
भक्त्या कृतां स्तुतिमिमां मम सुन्दरेश ॥

Colophon :

वरुणस्तोत्रं समाप्तम् ॥

536

Sl. No. 21977 **शिवस्तोत्रम्** **Ms. No. P 5748/13**

(दारिद्र्यदु:खदहनस्तोत्रम् वा वसिष्ठकृतशिवस्तोत्रम्)

Beginning :

विश्वेश्वराय नरकार्णवतारकाय
यज्ञप्रदाय करुणामृतसागराय ।
कर्पूरकुन्दवळाय जटाधराय
दारिद्र्यदु:खदहनाय नमश्शिवाय ॥१॥

End :

फालेक्षणाय फणिकुण्डलमण्डिताय
मञ्जीरपादयुगळाय वृषध्वजाय ।
मोक्षप्रदाय मुनिमानसमन्दिराय
दारिद्र्यदु:खदहनाय नमश्शिवाय ॥८॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवर्तकम् ।
सर्वकामप्रदं नणां हत्याकोटिविनाशनम् ॥

Colophon :

537

Sl. No. 219 8 शिवस्तोत्रम् Ms. No. C. 771

(हरिवंशीयम्)

Beginning:

तथा दत्त्वा वरं तस्य पर्वतस्य तु केशवः ।
दध्यौ गङ्गां सरिच्छ्रेष्ठां नमस्कृत्य वृषध्वजम् ॥

\+ + + +

अथाययौ विष्णुपदी स्मृता कृष्णेन भारत ।
सम्पूज्य तां ततः कृष्णः स्नातस्तस्यामधोक्षजः ॥

End :

अवन्ध्यानामदेशोऽस्मिन् गङ्गा चैव भविष्यति ।
गङ्गास्नानसमं स्नानं मत्तोऽत्र भविता तथा ॥

Colophon :

इति हरिवंशे पारिजातप्रकरणे श्रीकृष्णकृता शिवस्तुतिः समाप्ता ॥

538

Sl.No. 21979 शिवस्तोत्रैकश्लोकी Ms. No. P. 8904/2

(कार्तिकेयोक्त— शिवयमकैकश्लोको)

Beginning :

वाश्वारेड्ध्वजदग्धतोऽधिपतिः कुम्रेड्जानिर्गणे
द्रूगोराडरुड्रुड्सरेड्रुरुतरग्रैवेयकभ्राडरम् ॥

End :

क्रुडिड्रुजारकास्थिदेक्त्रिद्रुगिभेडाद्राजिनाददः ।
सत्तादम्बुमदम्बुदालिगलरुग्देवो मुदे वो मृडः ॥

Colophon :

इति कार्तिकेयोक्ता शिवमर्कैकश्लोकी समाप्ता ॥

539

Sl. No. 21980 शिवस्तोत्रैकश्लोकीव्याख्या Ms. No. P. 8904/3

Beginning :

अस्यार्थः— मृडयति रक्षयतीति । मृडरक्षण इति धातुः । सः मृडः साम्बसदाशिवः, वः— युष्माकं मुदे सन्तोषाय स्तात्— भूयादित्याशीः । स कीदृग्विध इत्याकाङ्क्षायमाह— वाश्चारेडित्यादि । वार्षु जलेषु चरन्तीति वाश्चाराः शफराः । तेषामिट् वाश्चारेट् । स एव ध्वजे यस्य सः वाश्चारेड्ध्वजः मदनः तं दहतीति वाश्चारेड्ध्वजधः ॥

End :

साम्बसदाशिवः वः युष्माकं मुदे रथकरितुरगपदातिच्छत्रचामरान्दोलिका प्रज्यमाम्राज्य-निरोगशतायुरूपसुगुणानेकसुघटरत्नप्राप्तिरूपकियः प्राप्तये स्तात् भूयादित्याशीर्वादः ॥

Colophon :

— — — —

540

Sl. No. 21981 शिवहृदयम् Ms. No. B 326/15

Beginning :

अस्य श्रीशिवहृदयस्तोत्रमहामन्त्रस्य— दक्षिणामूर्तिं ऋषिः ; अनुष्टुप् छन्दः ; श्री-साम्बसदाशिवो देवता ; ह्रां ह्रीं बीजम् ह्रुं ह्रैं शक्तिः ॥

End :

पठन्नेतत्स्तवं पुण्यं सर्वसिद्धिमवाप्य च ।

ब्रह्मविष्णवग्निरुद्राणां कमलोकमवाप्नुयात् ॥

Colophon :

इति शिवहृदयं सम्पूर्णम् ॥

541

Sl. No. 21983 शिवहृदयम् (पाद्मीयम्) **Ms. No. C 4663/1a**

Beginning :

प्रणम्य शिरसा पादौ शुक्रो व्यासमुवाच ह ।
को देवः सर्वदेवेषु कस्मै देवाश्च सर्वशः ॥१॥

यस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्ति ते ।
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिना शुकम् ॥२॥

End :

गीतासहस्रं नाम्नां च स्तवराजश्च पञ्चके ।
कवचं हृदयं शम्भोः पञ्चरत्नान्यनुक्रमात् ॥२५॥

शिवस्य पञ्चरत्नानि प्रातरुत्थाय यः पठेत् ।
यद्यदिच्छति कार्यन्तु तत्तत्प्राप्नोति निश्चितम् ॥२६॥

Colophon :

इति श्रीपद्मपुराणे श्रीशुकव्याससंवादे श्रीशिवहृदयं समाप्तम् ॥

542

Sl. No. 21984 शिवपामार्जनस्तोत्रम् **Ms. No. C. 4663/23**

Beginning :

श्रीजैमिनिरुवाच–

अकालमृत्युं जितवान् श्वेतो राजा कथं मुने ।

तां शान्तिं कृपया विद्वन् यथावद्वक्तुमर्हसि ॥१॥

End :

नश्यन्ति व्याधयः सर्वे
भूतानि विविधानि च ॥ ३४ ॥

देवदुममहासेन विश्वरूपपरात्पर ।
निरञ्जन विरूपाक्ष देहिनः स्वस्तिमुत्तमाम् ।

पलयानलसंङ्काशं × × × प्र × ।
द्रुदेवं महादेवं स्मरन्नित्यमतन्द्रितः ॥३६॥

Colophon :

— — —

543

Sl. No. 21985 शिवाष्टकस्तोत्रम् Ms. No. C. 461/22

Beginning :

× × × × उवाच—

विश्वेश्वराय नरकार्णवतारणाय
ज्ञानप्रदाय करुणामृतसागराय ।
कर्पूरधामधवलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥१॥

End :

शिवाष्टकं पठेन्नित्यं त्रिकालं भक्तिपूर्वकम् ।
सर्वसौख्यफलप्राप्तिं वशिष्ठेन कृतं स्तवम् ॥

Colophon :

इति श्रीशिवाष्टकस्तोत्रलेखनं समाप्तम् ॥

544

Sl. No. 21986 | शिवोत्कर्षस्तोत्रम् (स्कान्दीयम्) | **Ms. No C. 694/138**

Beginning :

अगस्त्य उवाच—

अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफलं ज्ञानं शम्भो त्वत्पाददर्शनात् ॥
कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं महेश्वर ।
अद्य ते पादपद्मस्य दर्शनाद्भक्तवत्सल ॥

End :

शिवोहमिति भावयन् शिवशिवेति चोदीरयन्
शिवं हृदि समर्चयन् शिवकथाः समाकर्णयन् ।
शिवात्मकतया जगत्सकलमेतदालोकयन्
नयामि दिवसानहं नयतु यत्रवामा शिवः ॥

Colophon :

इति श्रीकाशीखण्डे शिवोत्कर्षस्तोत्रं सम्पूर्णमगमत् ॥

545

Sl. No. 21988 | शीतलापरमेश्वरीस्तुतिः (श्रीदेवीरहस्यकल्पान्तर्गता) | **Ms. No. P. 10592/45**

Beginning :

अस्य श्रीशीतलापरमेश्वरीस्तोत्रमहामन्त्रस्य— ईश्वर ऋषिः ; अनुष्टुप् छन्दः ; शीतिका परमीश्वरी देवता ; ओं बीजम् ; × × शान्त्यर्थे शीतलापरमेश्वरीस्तोत्रपारायणे विनियोगः ॥

+ + + +

नमामि शीतलां देवीं रासभस्थां सुशोभनाम् ।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥

End :

पाहिशीतले स्वाहा ।

+ + + +

अष्टोत्तरं जातवेदं दुर्गामष्टोत्तरं शतम् ।
× × × × × समाचरेत् ॥
सर्वज्वरं संनिपातं स्फोटिकाग्रंथिनाशनम् ।
सर्वरोगग्रहं नाशं सर्वरक्षा × × × × ॥

Colophon :

× × पार्वतीशिवसंवादे शीतलापरमेश्वरीस्तोत्रं समाप्तम् ॥

546

Sl. No. 21989 शीतलाष्टकम् Ms. No. P. 4524
(शीतलस्तोत्रम्– स्कान्दीयम्)

Beginning :

अस्य श्रीशीतलास्तोत्रमहामन्त्रस्य पुरन्दर ऋषिः ; अनुष्टुप् छन्दः ; शीतलामहेश्वरी देवता ; बीजम् ; ह्रीं शक्ति ; स्वाहा कीलकम् ; शीतलामहेश्वरी प्रसादेसिद्धयर्थे विनियोगः ॥

End :

इतीदं शीतलादेव्याः स्तोत्रं स्फोटकनाशनम् ।
पठितव्यं सदा तेन श्रद्धाभक्त्यन्वितेन च ॥
प्रसन्नायान्त्वयि सदा ना बाधा स्फोटकादिना ।
भवन्ति भूतले तस्य सत्यं सत्यं न चान्यथा ॥

ॐ मूलमन्त्रम् । ॐ ह्रीं शीतले स्पोटकनाशीनी + + + + यंत्रं सदा धारय शीतलाया: ॥

Colophon :

इति काशीखण्डे शीतलास्तोत्रं समाप्तम् ॥

547

Sl. No. 21990 शीतलाष्टकम् Ms No. P. 4580/27

Beginning:

दिग्वस्त्रे घटमार्जने करतले शूर्पोक्तमागेतले
तत्पादर्चितभूतले कृतपदे काशीतलाशीतले ।
पादव्याप्ततलातलस्वशिरसा संक्रामितव्योऽतले
विस्फोटामयमाशु नाशय नृणां क्षोणितले शीतले ॥

End :

हे मर्त्या भुवि शीतलाष्टकमिदं सन्ध्यात्रयं सादरात्
नित्यं शुद्धतम: पठति परमां ध्यात्वोदितां शीतलाम् ।
तेषां पापभयं महाज्वरभयं विस्पोटकादिर्भयं
रोगान् मृत्युभयं च नाशय सदा काशीपुरीशीतलाम् ॥९॥

Colophon :

इदं शीतलाष्टकं समाप्तम् ॥

548

Sl No. 21991 शीतलाष्टकम् (शीतलास्तोत्रम्) Ms. No. P. 5748/1

Beginning :

नमामि शीतलां देवीं रासभस्थां दिगम्बराम् ।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥

End:

अथ फलश्रुतिः–

अष्टकं शीतलायास्तु यः पठेन्मानतस्सुधीः ।
विस्पोटकभयं घोरं गृहे तस्य न जायते ॥

Colophon :

इति श्रीशीतलास्तोत्रं समाप्तम् ॥

549

Sl No. 21998 . शुकस्तोत्रम् Ms. No. P. 6969

(भागवतीयम्– विष्णुस्तोत्रम्)

Beginning :

यंप्रवजन्तमनुपेतं + + + + मुनिमानतोऽस्मि ॥१॥

श्रीशुकः–

नमः परस्मै पुरुषाय भूयसे
सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनां
अन्तर्भवायानुपलक्ष्यवर्त्मने ॥२॥

End :

एतदेवात्मभू राजन्
नारदायानु पृच्छते ।
वेदगर्भोऽभ्यधात्साक्षात्
यदाह हरिरात्मनः ॥१३॥

Colophon :

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे वैशम्पायायनं प्रति, शुकप्रोक्ता शुभा स्तुतिर्नाम चतुर्थस्सर्गः ॥

Extra Information :

ग्रन्थान्ते -

नारदः—

देवदेवनमस्तेऽस्तु ·/· + निदर्शनम् ॥१॥

इति दृश्यते ॥

550

Sl. No. 22000 शुक्रकवचम् Ms. No. P 6609

(स्कान्दीयम्)

Beginning :

अस्य श्रीशुक्रकवचमहामन्त्रस्य- भरद्वाज ऋषिः ; अनुष्टुप् छन्दः ; शुक्रो देवता ; ·/· ·/· ·/· + + ध्यानम्—

मृणालकुन्देन्दुसमानभासं
पीताम्बरस्रक्धरमब्जमालिनम् ।
समस्तशास्त्रश्रुतितत्वदर्शिनं
ध्यायेत्कविं वास्तुस्तमस्तलढ्नये ॥
शिरो मे भार्गवः पातु ·/· + + + ॥

End :

य इदं कवचं दिव्यं पठति श्रद्धयान्वितः ।
न तस्य जायते पीडा भार्गवस्य प्रसादतः ॥

Colophon :

इति स्कान्दे पुराणे शुक्रकवचं समाप्तम् ॥

551

Sl No. 22007 **शुक्रस्तोत्रम्** Ms. No P. 6608

Beginning :

श्रुत्वा तु मुनयस्सर्वे × × स्त्रोत्रमिदं शुभम् ।
रहस्यं सर्व × × नां शुक्रप्रीतिकरं शुभम् ॥

+ + + +

तानि शुक्रस्य नामानिकथयामि शुभानि च ।
शुक्रश्शुभो महाश्रीमान् + + + + ॥

End :

स्तोत्रं भृगोरिदमनेकशुभप्रदं यो
भक्त्या पठेत मनुजो नियतश्शुचिस्सन् ।
प्राप्नोति नित्यमतुलां श्रियमीप्सितार्थान्
राज्यं समस्तधनधान्ययुतं समृद्धम् ॥

Colophon :

इति श्रीशुक्रस्तोत्रं समाप्तम् ॥

552

Sl No. 22008 **शूलिनीकवचम्** Ms. No. P. 8756/12
(महाशैवतन्त्रीयम्)

Beginning :

ईश्वर उवाच—

अथ वक्ष्यामि शूलिन्याः कवचं सर्वसिद्धिदम् ।
समाहितेन मनसा शृणु गुह्यं सनातनम् ॥१॥

शूलिन्याः कवचं दिव्यं जगद्रक्षणकारणम् ।
सर्वसिद्धिप्रदं श्रेष्ठं सर्वपापप्रणाशनम् ॥२॥

End :

महेश्वर उवाच–

धर्मार्थकाममोक्षैकसिद्धिदं बलवर्धनम् ।
त्रिसन्ध्यं यो जपेन्नित्यं न्यासभावपुरस्सरम् ॥३१॥

शूलिन्याः कवचेनैवसंवृतः पूज्यतेऽखिलैः ।
अनेनैव शरीरेण जीवन्मुक्तो भविष्यति ॥३२॥

Colophon :

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वर-संवादे शङ्करेण विरचिते शूलिनीकवचं नाम द्वाविंशोपदेशः ॥

553

Sl. No. 21011 **शूलिनीप्रतिक्रियास्तोत्रम्** **Ms. No. P. 8756/12**

(महाशैवतन्त्रीयातिरहस्यम्– आकाशभैरवकल्पीयम्)

Beginning :

देव्युवाच–

श्रीमहाकालसूक्ष्मैकबोधकेशजगत्पते ।
प्रतिक्रियास्तोत्रमन्त्रं प्रबदस्व दयानिधे ॥१॥

\+ + + +

शिव उवाच–

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ।
प्रतिक्रियाशूलिनीयस्तोत्रमन्त्रमभीष्टदम् ॥२॥

End:

इति श्रीशिवायाः प्रसादानुभूति
प्रदाशेषसूक्ष्मप्रयोगप्रभावः ।
समस्तप्रकारैः श्रुतं सम्यगुक्तं
पुनः श्रोतुमिच्छस्युमे किं रहस्यम् ॥६०॥

Colophon:

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षेष्टार्थसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते दुर्गाविश्वचालनविधाने प्रतिक्रियास्तोत्रं नाम एकविंशोपदेशः ॥ २० ॥

554

Sl. No. 22012 शूलिनीविश्वरूपस्तुतिः Ms. No. P. 8756/10

(मार्कण्डेयस्तोत्रम्)

Beginning :

देव्युवाच—

सर्वशक्तिप्रदायिन्याः शूलिन्याः सर्वबोधकः ।
विश्वरूपस्तुतिः श्रोतुमिच्छाम्यहमथादरात ॥१॥

\+ \+ \+ \+

शिव उवाच—

साधुकल्याणि तत्सर्वं यद्यदुक्तं त्वयाधुना ।
अतिगुह्यतमं श्रेष्ठं स्मरणात्सर्वसिद्धिदम् ॥

End :

इति परमरहस्यस्तोत्रमेतत्पराया:
प्रथितमुषसि भक्त्या ध्यानपूर्वं जपेद्यः ।
जगति निखिलभाग्यं दीर्घमायुः सुपुत्रान्
विपुलविमलकीर्तिं प्राप्य मुक्तोभवेत्सः ॥८९॥

Colophon:

इति श्रीशैवतन्त्रे अतिरहस्ये श्रीआकाशभैरवकल्पे प्रत्यक्षेष्टार्थसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते दुर्गाक्रिया भो + + वधाने विश्वरूपमहास्तुतिर्नामाष्टमोपदेशः ॥

555

Sl. No. 21014 शूलिनीसर्वशान्तिस्तवः Ms. No P. 8756/9

Beginning :

श्री शिव उवाच—

सर्वशांन्ति प्रवक्ष्यामि दुरितान् सकलात्मनाम् ।
यस्य स्मरणमात्रेण शान्तिमाप्नोत्यघौघतः ॥ १॥

साधकानामशेषाणां केवलानां द्रुतात्मनाम् ।
नानाविधमहापापरोगमोहोपशान्तये ॥ २॥

End :

इति विरचितमेतत्सर्वशान्तिस्तवं यः
पठति च रतिभक्त्या सर्वदा वा द्विरन्व्यम् ।
विपुलकरणसौख्यं ब्रह्मविद्यानुभूम
प्रथितपदमवाप्य श्रीशिवाकारमेति ॥८॥

Colophon :

इति श्रीमहाशैवतन्त्रे अतिरहस्ये श्रीआकाशभैरवकल्पे प्रत्यक्षपरमसिद्धिप्रदे उमामहेश्वर-संवादे शङ्करेण विरचिते शरभ-सालुव-पक्षिराजमहाकल्पे दुर्गाविश्वचालनविधाने सर्वशान्ति-महास्तवो नाम चतुर्दशो(ध्या)पदेशः ॥

556

Sl. No. 21015 शूलिनीसुमुखीकरणस्तुतिः Ms. No. P. 8756/11
(आकाशभैरवकल्पीयम्—महाशैवतन्त्रातिरहस्यम्)

Beginning :

शिव उवाच—

अथ ते शूलिनीदेव्याः सुमुखीकरणस्तुतिम् ।
प्रवक्ष्यामि समासेन सर्वकामार्थसिद्धये ॥ १॥

ऋषिन्यासौ षडङ्गं च मूलमन्त्रं यनमुच्यते ॥

End :

इति परमशिवायाः शूलिनीदेवतायाः
स्तुतिमतिशयसौख्यप्राप्तये यास्त्रिवारम् ।
स्मरति जयति विद्वान् संवृताशेषलोकै
र्निखिलसुखमवाप्य श्रीशिवाकारमेति ॥४॥

Colophon:

इति महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे उमामहेश्वरसंवादे [illegible]रेण विरचिते दुर्गाक्रियाभेदविधाने सुमुखीकरणस्तुतिर्नाम नवमोपदेशः ॥

557

Sl. No. 22016 शूलिनीहृदयम् Ms. No. P 8756/13

(आकाशभैरवकल्पीयम्–महाशैवतन्त्रातिरहस्यम्)

Beginning :

देव्युवाच–

सर्वज्ञ भगवन् शम्भोसर्वसूक्ष्मैकबोधक ।
श्रीशूलिनीमहामन्त्रहृदय कथयस्व भो ॥१॥

शिव उवाच -

साधु कल्याणि वक्ष्यामि सर्वसूक्ष्मैकसूक्ष्मकम् ।
यस्य स्मरणमात्रेण मन्त्रवित्सर्वविद्भवेत् ॥२॥

End :

विश्वप्रकाशरूपस्य किमसाध्यं सुखात्मनः ।
रतीशात्परशूलिन्याः सबीजहृदयं क्रमात् ॥
प्रसमीक्ष्याथ कथितं भावयेत्सशिवोभवेत् ॥

Colophon :

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वर° संवादे शङ्करेण विरचिते उमाविश्वनालनविधाने मन्त्रबीजहृदयं नाम षोडशोपदेशः । १६॥

558

Sl No. 22017 श्यामलावर्मरत्नम् Ms. No. P 8278/7

(सौभाग्यकल्पीयम्)

Beginning :

सेनापतित्वं देवानां पुरा प्राप्य षडाननः ।

सदाशिवमुपागम्य पितरं वाक्यमब्रवीत् ॥

महादेव × × × सर्वज्ञ करुणानिधे ।

+ + + + +

सबलस्तारको वध्यो मया बालेन वीर्यवान् । + +

यथा मद्दर्शनादेव निर्वीर्यस्स भविष्यति ।

यथा वज्री भवेद्देहो मम रक्षां तथा कुरु ।

इति पृष्टः कुमारेण देवश्चन्द्रकलाधरः ।

ध्यात्वा मुहूर्तं प्रोवाच महादेवो निजं सुतम् ॥

शृणु पुत्र महाप्राज्ञ तव रक्षां वदाम्यहम् ।

वर्म सृष्टं रत्नं मया सृष्टं रक्षार्थे जगतां पुरा ॥ +

अथास्य वर्मरत्नस्य ऋषिर्देवस्सदाशिवः ।

छन्दोऽनुष्टुप् तथा प्रोक्त देवता श्यामलाम्बिका ॥

End :

मयोक्तो महिम लेशो वर्मरत्नस्य × × × त्रकौ ,

विस्तरेण, मया वक्तुं न शक्यं वर्षकोटिभिः ॥

Colophon:

इति सौभाग्यकल्पे चतुर्लक्षग्रन्थविस्तारे श्यामळावर्मरत्नं नाम दशमः पटलः ॥

559

Sl. No. 22018 श्रीदेवीक्रमपादस्तवः Ms. No. C 3596/A

(मेरुप्रस्तशतसहस्रसंहितासमूहान्तर्गतम्)

Beginning :

रक्तामृताम्बुनिधिमध्यलसत्प्रवाल-
द्वीपस्फुरत्वरनन्दनकाननान्तः ।
श्रीकल्पवृक्षतलपश्चिमवक्त्ररत्न
गेहान्तराद्भुतमहामणिपीठिकायाम् ॥१॥

End :

त्वां पूजयेत्क्रमकुलां सकलार्थसिध्यै
स्तोत्रं पठिष्यति जनस्त्वपि जातभक्तिः ।
तस्मान्मयापि तव भक्तिरसेन विद्य-
द्भक्तार्थसिद्धिकरि सत्यमिदं व्यधायि ॥५६॥

Colophon :

इति मेरुप्रस्थशतसहस्रसंहितासमूहे श्रीदेव्याः क्रमस्तवः समाप्तः ॥

560

Sl. No. 22019 श्रीनगरचक्रसंग्रहमञ्जरी Ms. No. B. 326/4

(ब्रह्माण्डपुराणीयम्)

Beginning :

शुक्लाम्बरधरं + + विघ्नोपशान्तये ॥
जय त्वं देविचामुण्डे जय भूतापहारिणि ।
जय सर्वगते देवि भद्रकालि नमोऽस्तु ते ॥

End :

इदं पवित्रं पापघ्नं पठतां शृण्वतां सदा ।
श्रीदेवीपादभक्तानां सर्वाभीष्टप्रदं शुभम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे ललितोपाख्याने अष्टविंशाध्यायमारभ्य त्रयस्त्रिंशाध्यायपर्यन्तं समालोक्य संगृह्य भक्त्या विरचितः पञ्चविंशतिसालशोभितश्रीनगरमध्यवर्तिनवारणात्मकचिन्तामणिगृहवर्णनरूपः श्रीनगरचक्रसंग्रहमञ्जरीनामको ग्रन्थः समाप्तः ॥

561

Sl. No. 22020 श्रीनगरपट्टाभिषेकवर्णनम् Ms. No C. 326/3

(ब्रह्माण्डपुराणीयम्)

Beginning :

एतस्मिन्नेव काले तु ब्रह्मलोकपितामहः ।
आजगामाथ देवेशो द्रष्टुकामो महर्षिभिः ॥
आजगाम ततो विष्णुरारूढो विनतासुतम् ।
शिवोऽपि वृषभमारुह्य समायातोऽखिलेश्वरीम् ॥

End :

तापत्रयविहीनश्च पुरुषार्थैश्च पूर्यते ।
त्रिसन्ध्यं यो जपेन्नित्यं ध्यात्वा सिंहासनेश्वरीम् ॥
षण्मासान्महतीं लक्ष्मीं प्राप्नुयाज्जापकोत्तमः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे ललितोपाख्याने कामेश्वरीकामेश्वरवैवाहिकोत्सवश्रीनगरपट्टाभिषेकवर्णनं नाम चतुर्दशोऽध्यायः ॥

562

Sl. No. 22022 **श्रीरामद्वादशनामस्तोत्रम्** Ms. No. P. 3816/15

(स्कान्दीयम्)

Beginning :

अस्य श्रीरामद्वादशनामस्तोत्रराजमहामन्त्रस्य- ईश्वर ऋषिः ; श्रीरामचन्द्रो देवता ; श्रीरामचन्द्रप्रसादसिध्यर्थे जपे विगियोगः ॥

End :

सप्तवारं पठेन्नित्यं सर्वारिष्टनिवारणम् ।
ग्रहणकाले जले स्थित्वा नदीतीरे विशेषतः ॥
अश्वमेधशतं पुण्यं ब्रह्मलोकं गमिष्यति ॥

Colophon :

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे रामद्वादशनामस्तोत्रं समाप्तम् ॥

563

Sl. No. 22023 **श्रीरामवज्रकवचम्** Ms. No. B. 673

(हिरण्यगर्भसंहितीयम्- अगस्त्योक्तम्)

Beginning :

सुतीक्ष्ण उवाच-

भगवन् परमानन्द तत्त्वज्ञकरुणानिधे ।
स्वरूपं रामचन्द्रस्य कवचं वद मे प्रभो ॥

अगस्त्य उवाच-

शृणु वक्ष्यामहं सम्यक् सुतीक्ष्ण मुनिसत्तम ।
अद्वैतानन्द चैतन्य शुद्धसत्त्वैकलक्षण ॥

End :

श्रीरामचन्द्र रघुपुङ्गव राजवर्यं
राजेन्द्र राम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन रामभद्र
दासोऽहमद्य भवतः शरणागतोऽस्मि ॥
त्रायस्व मां रघुपते भगवन्नमस्ते ॥

Colophon :

इति श्रीहिरण्यगर्भसंहितायां परमरामरहस्ये अगस्त्यप्रोक्तं श्रीरामवज्रकवचं समाप्तम् ।

564


Sl. No. 22024 श्रीवासस्तोत्रबन्धः **Ms. No. P. 7243/6**

Beginning :

					स	वं	ते	ह
मुर	सा	भू	पा	रा	म	पा	द	स्या
	वि	भू	पा	स्ते	स	पा	र	ता
	ता	र	पा	स	कृ	पा	नु	घटे
	पू	र	पा	रा	म	पा	द्रु	का
नव-	क	क्य	का					
		सा	वी					
	च्छ	वे	न					

End :

व	सु	दा	त्र	स	दा	न	न्द
धी	सु	दा	न्त	सु	दा	न	ता
ता	न	दा	सु	कि	दा	र	म्या
सा	न	दा	तृ	स	दा	र	स



Colophon :

— — — —

565

Sl. No 22025 — **षडाननस्तोत्रम्** (स्कान्दीयम्) — **Ms. No. P. 5668/38**

Beginning:

व्यास उवाच

गिरिं प्रदक्षिणी कृत्य श्रीसंज्ञं कलशोद्भवम् ।

तत्राद्राक्षीन्मुनिश्रेष्ठोऽगस्त्यः साक्षात् षडाननम् ॥

प्रणम्य दण्डवद्भूमौ सपत्नीको महातपाः ।
तुष्टाव गिरिजासूनौ सूक्तैः श्रुतिसमुद्भवैः ॥

End :

यस्तु स्कन्दस्तवं पुण्यं शृणुयान्दा पठेत वा ।
कार्तिकेयसमो भूत्वा शैवं पदमवाप्नुयात् ॥
श्रुत्वा स्तवमिमं पुण्यं सर्वपापात्प्रमुच्यते ।
नोपसर्पभयं तस्य काशीवासफलं लभेत् ॥

Colophon :

इति श्रीस्कान्दपुराणे काशीखण्डे अगस्त्यप्रोक्तं षडाननस्तोत्रं समाप्तम् ॥

566

Sl. No. 22026 — षोडशीकवचम् — Ms No. P. 4524/10

(मन्त्रचूडामणीयम्)

Beginning :

स्क × × ×–

कैलासशिखरे रम्ये × × × जगद्गुरुम् ।
कवचं षोडशाक्षर्या वद मे परमेश्वर ॥२॥

ईश्वर उवाच–

शृणु पुत्र महाभाग कवचं म × × वि × हम् ।
गोप्याद्गोप्यं महागोप्यं गुह्याद्गुह्यतरं महत् ॥२॥

End

इति परमरहस्यं सर्वमन्त्रार्थसारं
व्रजति परमलोकं निश्चलं निर्मलं च ।
निवसतु भुवि मध्ये पुत्रपौत्रार्थयुक्तं
धनसकलसमृद्धि भोगमोक्षप्रदं च ॥

Colophon :

इति श्रीमन्त्रचूडामणौ षोडशी तुरील(?) कवचं सम्पूर्णम् ॥

567

Sl. No. 22028 | सङ्कटनाशकगणपतिस्तोत्रम् | Ms. No. C- 4.97/1

(नारदीयम्)

Beginning :

नारद उवाच–

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तवासं स्मरेन्नित्यमायुष्कामार्थसिद्धये ॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥२॥

End :

अष्टानां ब्राह्मणानां च लिखित्वा यस्समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥८॥

Colophon :

इति श्रीनारदपुराणे सङ्कटनाशनद्वादशस्तोत्रं समाप्तम् ॥

568

Sl. No. 22029 | सन्तानगोपालस्तोत्रम् | Ms. No. C- 575/2

(ब्रह्माण्डीयम्)

Beginning :

सन्तानगोपालस्तोत्रप्रारम्भः

श्रीशं कमलपत्राक्षं देवकीनन्दनं हरिम् ।
सुतसम्प्राप्तये विष्णुं नमामि मधुसूदनम् ॥

नमाम्यहं वासुदेवं सुतसम्प्राप्तये हरिम् ।
यशोदाङ्कगतं बालं गोपालं नन्दनन्दनम् ॥

End :

भक्त्या पठति यो नित्यं पुत्रलाभो भवेध्द्रुवम् ।
ऐश्वर्यं राजसन्मानं पुत्रलाभं यशस्करम् ॥
वासुदेवप्रसादेन सद्यो याति न संशयः ।
इदं स्तोत्रं लिखित्वा तु पूजयेद्यस्तु भक्तितः ॥
तस्य सिध्यन्ति तत्सर्वं विष्णोः परमकांक्षितम् ॥

Colophon :

इति श्रीमद्ब्रह्माण्डपुराणे गोपालकल्पे भवदुक्तश्रीसन्तानगोपालस्तोत्रं समाप्तम् ॥

569

Sl. No. 22030 सन्तानगोपालस्तोत्रम् Ms No. C 694/70

Beginning :

अस्य श्रीसन्तानगोपालमहामन्त्रस्य— सन्दीपनो भगवान् ऋषिः ; अनुष्टुप् छन्दः ; श्रीसन्तानगोपालो देवता ; श्री बीजम् ; क्लीं शक्तिः ॥

End :

बालाय नीलवपुषे नवकिङ्कणीक-
जालाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूसुरभूषिताय
नन्दात्मजाय नवनीतमुषे नमस्ते ॥

× × × त्यादि पञ्चपूजा । अनन्तरं मूलमन्त्रः । पुनः हृदयादिन्यासः । ध्यानम् । पञ्चपूजा ॥

Colophon :

570

Sl No. 22031 सद्गुरुस्तवराजः (रुद्रयामलीयः) Ms. No. C 3780/26

Beginning :

देव्युवाच–

इदानीं श्रोतुमिच्छामि स्तोत्रमस्य महात्मनः ।
मन्त्रगर्भं परं देव सहस्रं परमेश्वर ॥
योग्या यदि प्रिया तेद्यन × × × महेश्वर ।

ईश्वर उवाच–

वारितासि पुनर्नित्यं मुहुर्मुहुरतन्द्रितः ।
श्रुत्वा परमहंसस्य सहस्रं परमेश्वर (?) ॥

End :

गोपनीयं सदा गुप्तं गोप्तव्यं च विशेषतः ।
अभक्तेभ्योपि पुत्रेभ्यो दत्वा यां नरकमाप्नुयात् ॥
विना शिष्याय सो दत्वान्यस्य कस्यापि कर्हिचित् ।
दुर्जनेभ्यः सदा गोप्यं गोप्तव्यं सर्वदा प्रिये ॥

Colophon :

इति श्रीरुद्रयामले उत्तरतन्त्रे परमहंसोपाख्याने श्रीसद्गुरुस्तवराजं सम्पूर्णम् ॥

571

Sl No. 22032 शूलिनीकवचम् Ms. No. P. 4611/58
(महाशैवतन्त्रीयम्)

Beginning :

स्कन्दपुराणोत्तरखण्डस्थ शिवरात्रीव्रतकल्पोक्तलिङ्गोद्भव श्रीसदाशिवमूर्तिध्यानम्–

गौरीभूषितवामाङ्कं सच्चिदानन्दविग्रहम् ।
प्रफुल्लकमलोद्भासि पञ्चविंशन्मुखोज्वलम् ॥१॥

End :

सर्वलोकान् समुद्धर्तुं महालिङ्गसमुद्भवम् ।
महादेवं प्रभुं साक्षात् ध्यायामि श्रीसदाशिवम् ॥९॥

श्रीमहालिङ्गोद्भवसदाशिवमूर्तिं ध्यायामि ॥

Colophon :

— — —

572

Sl No 22042 सप्तर्षिस्तोत्रम् वा नारायणस्तवः Ms.No. P. 1266/28

Beginning :

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणात्
औदार्यादघशोषणादगणितश्रेयःपदं प्रापणात् ।

सेव्यः श्रीपतिरेक एव जगतमेते च षट् साक्षिणः ।
प्रह्लादश्च बिभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः॥१

End :

पित्रा भ्रातरमुत्तमासनगतं भक्तोत्तमश्च ध्रुवः
दृष्ट्वा तत्सममारुरुक्षुरनघो मात्रावमानं गतः ।

यं दृष्ट्वा शरणं समवाप तपसा हेमाद्रिसिंहासनं
आर्तत्राणपरायणस्स भगवान् नरायणो मे गतिः ॥

Colophon :

इति नारायणस्तवस्समाप्तः ॥

573

Sl No. 22045 **शारदास्तोत्रम्** Ms. No.! . 5668/5

(अगस्त्यकृतम्)

Beginning :

अगस्त्य उवाच-

सरस्वति नमस्तुभ्यं सर्वदेव्यै नमो नमः ।
शान्तरूपे चन्द्रचूडे सबदेवी नमो नमः ॥१॥

नित्यानन्दे निराधारे निष्कलायै नमो नमः ।
विद्यालयै निर्मलायै शुद्धज्ञै नमो नमः ॥२॥

End :

ब्रह्मविष्णुशिवानन्दे बिन्दुरूपे नमो नमः ।
अश्विनीगर्भदीप्तायै प्रदीप्तायै नमो नमः ॥९॥

इद सारस्वतं स्तोत्रं अगस्त्यमुनिना कृतम् ।
सर्वशुद्धिकरं शान्तं सर्वकामार्थसाधकम् ॥१०॥

Colophon :

इति श्रीअगस्त्यकृतं शारदास्तोत्रं सम्पूर्णम् ॥

574

Sl. No. 22053 **शारदास्तोत्रम्** Ms. No. P. 5816/2

(अगस्त्यकृतम्)

Beginning :

ऋषय ऊचुः—

कथं सारस्वतप्राप्तिः केन ध्यायेत सुव्रता ।
महासरस्वती येन तुष्टा भवति तद्वद ॥

अश्वलायन उवाच— + + + ।

श्रृण्वन्तु ऋषयस्सर्वे + ।
दशश्लोकमिदं स्तोत्रं वदामि + + + ।।

अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारैस्समायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ।

End :

इत्याश्वलायनऋषिर्निजगाद देव्याः
स्तोत्रं समस्तफलभोगनिधानभूताम् ।

रातः पठन् द्विजवरः शुचितामुपैति ।
सन्ध्यासु वाञ्छितमुपैति नसंशयोत्र ।।

Colophon :

— — — — — — — —

575

Sl. No. 22055 **सरस्वतीस्तोत्रम् वा सरस्वतीध्यानम्** **Ms. No. P. 7486/52**

Beginning :

ऋषय ऊचुः—

कथं सारस्वतावाप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भवतु तत्त्वतः ।।

आश्वलायन उवाच—

श्रृण्वन्तु मुनयस्सर्वे गुह्याद्गुह्यतमं महत् ।
दशश्लोक्यमिमं मन्त्रं ध्यानपूर्वं वदाम्यहम् ।।

+ + + + +

प्रणोदेवीत्यस्य मन्त्रस्य भरद्वाज ऋषिः ; गायत्री छन्दः ; महासरस्वती देवता

End :

यः कवित्वं निरातङ्कं भुक्तिमुक्ति च वा × × × ।
× × दशश्लोक्या भक्त्या स्तोतुं सरस्वतीम् ॥

+ + + + +

नमस्ते शारदादेवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थयिष्यामि विद्या × × ।

× × × × हारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा पूजिता
सा × . × सरस्वती भगवती निश्शेषजाड्यापहा ॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिनिभा भासमान समान
सा मे वाग्देवतेय निवसतु × × सर्वदा सुप्रसन्ना ॥

Colophon :

— — — —

576

Sl. No. 25058 सरस्वतीस्तोत्रम् (दशश्लोकी) Ms. No. P. 9433

Beginning :

सुरारिशिखरे रम्ये मारोरश्रीवनालये ।
आश्वलायनमेकाग्रं पप्रच्छुः ऋषयः पुरा ॥

वेदवेदाङ्गतत्त्वज्ञ तपोध्यानपरायणम् ।
ध॰ र्वांरपरिज्ञान अचार्याणां वचोऽब्रवीत् ॥

End :

न काञ्चन स्त्रियं निन्देत न देवान् नापि तु द्विजान् ।
अनार्येनापि भाषेत सर्वत्रैव क्षमी भवेत् ॥

सर्वत्रैव प्रियं ब्रूयात् यदीच्छेत् सिद्धिमात्मनः ॥

Colophon :

इति दशश्लोकीसरस्वतीस्तोत्रं समाप्तम् ॥

577

Sl. No. 22065 सरस्वतीस्तोत्रम् (द्वादशनाम) **Ms. No. C 2966/14**

Beginning:

सरस्वतीमयं दृष्ट्वा वीणापुस्तकधारिणीम् ।
हंसवाहसमायुक्ता विद्यादानकरी मम ॥
प्रथमं भारती नाम द्वितीयं च सरस्वती ।
तृतीयं शारदा देवी चतुर्थं हंसवाहिनी ॥

End :

एकादशे क्षुद्रघण्ठा द्वादशे भुवनेश्वरी ।
ब्राह्मा द्वादश नामानि त्रिसन्ध्यं यः पठेन्नरः ॥
सर्वसिद्धिकरी तस्य प्रसन्ना परमेश्वरी ।
सा मे वसतु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥

Colophon :

इति श्रीसरस्वती द्वादशनामानि सम्पूर्णानि ॥

578

Sl. No. 22067 **सरस्वतीस्तोत्रम्** (सनत्कुमारसंहितांतर्गता) **Ms No. B 4868/17**

Beginning :

अस्य श्रीसरस्वतीस्तोत्रमहामन्त्रस्य– मार्कण्डेयाश्वलायन ऋषिः ; स्रग्धरा अनुष्टुप् छन्दांसि । श्रीसरस्वती देवता । ऐं बीजम् ; ह्रीं शक्तिः क्लीं कीलकं ; श्रीमहासरस्वतीप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

सनत्कुमारः—

पक्षद्वयं च यो भक्त्या एकविंशतिसंख्यया ।
अविच्छिन्नं दठेद्भक्त्या स कवित्वं लभेत् ध्रुवम् ।

सर्वपापविनिर्मुक्तो शुभगो लोकविश्रुतः ।
वाञ्छितं फलमाप्नोति लोकेऽस्मिन् नात्र संशयः ॥

Colophon :

इति सनत्कुमारसंहितायां विद्यादानसरस्वतीस्तोत्रं सम्पूर्णम् ॥

579

Sl. No. 22068 सरस्वतीस्तोत्रम् विद्याप्रसाददायिनी स्तोत्रम्) Ms. No C. 694/38

Beginning :

अस्य श्रीसरस्वतीस्तोत्रमहामन्त्रस्य— मार्कण्डेय ऋषिः; स्रग्धरानुष्टुप् छन्दांसि ; श्रीसरस्वती देवता मम वाञ्छतार्थे जपे विनियोगः ॥

शुद्धब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां च दधतीं पद्मासने संस्थितां
वन्दे त्वां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

End :

पक्षद्वये त्रयोदश्यामेकविंशतिसंख्यया ।
अविच्छिन्नं पठेद्यस्तु स कवित्वं लभेद्ध्रुवम् ॥

सर्वपापविनुर्मुक्तः स भवेल्लोकविश्रुतः ।
वांच्छितं फलमाप्नोति लोकेऽस्मिन्नात्र संशयः ॥

Colophon :

इति श्रीविद्याप्रसादसरस्वतीस्तोत्रं सम्पूर्णम् ॥

580

Sl. No. 22070 सरस्वत्यष्टकम् Ms. No. C 2966/13

(पद्मपुराणीयम्– दिव्यज्ञानप्रदायकम्)

Beginning :

शतानीक उवाच–

महामते महाप्राज्ञ सर्वशास्त्रविशारद ।
अक्षीणकर्मबन्धस्तु पुरुषो द्विजसत्तम ॥१॥

मरणे यज्जपेज्जाप्यं पद्मभावमनुस्मरन् ।
परं पदमवाप्नोति तन्मे ब्रूहि महामुने ॥२॥

End :

बृहस्पतिरुवाच–

लभन्ति परमं ज्ञानं यत्सुरैरपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥७॥

सरस्वत्युवाच–

त्रिसन्ध्यं प्रयतो नित्यं पठेदष्टकमुत्तमम ।
तस्य कण्ठे सदा वासं करिष्यामि न संशयः ॥८॥

Colophon:

इति श्रीपद्मपुराणे सरस्वत्यष्टकस्तोत्रं दिव्यज्ञानप्रदायकं समाप्तम् ॥

581

Sl. No. 22071 सर्वशांतिस्तवः Ms No. P. 2595/2

